नं० २१०-घ
काव्यप्रदीपोद्योतः
काव्यप्रकाशव्याख्या
काव्यप्रदीपटीका
पत्राणि १६८

का वा

सं॰ ११

काव्यप्रदीपोद्योत पुस्तकं राम-
चंद्र पाठकस्य ॥

११००

सं २२०८

[illegible]

[illegible]

[illegible]

१८ [illegible]

[illegible]

[illegible]

...नियमं तेस्या... सोस्मादयोध्यं मर्म ... नेति नियतिरसा... पन्नत्वादि व्याप्य च म... पस्तद्रहितं च ... ताव
प्रसक्तत्वे व्यवस्थित्वात् पित्रादिनाम ... मानं पूर्वक ... नामाभिधेयं दर्शयति सोमोदेव्या इति ... विः सपत्नेत्रा ता इति ... व्याख्या ... मंगलमाचरन् ... तदेव तात्पर्यं ... उच्यते प्रतिपाद्यते ... वाक्यानि तेषां
संदर्भो ... वाक्यानि नियावत् ॥ ... प्रकाशत इति व्याख्यातृ ॥ २

का॰टी॰ १ ॥ श्रीगणेशाय नमः ॥ याचकानां कल्पतरोररिपक्षहुताशनात् शृंगवेरपुराधीशाद्रामतो लब्धजीविकः नागेशभट्टः कुरुते प्रण-
म्य शिवयोः शिवं काव्यप्रदीपविवृतिं मतिमूढार्थसंविदे सोद्द्योतो चित्यं हेतुः वचनेत्यादि विशेषणस्य तात्विकानां व्यवहारा दुर्ज्ञेयः प्रा-
रंभ आद्यतातिः सनातनदव्यवहितपूर्वकालत्वमपि मंगलस्य सूचितं तादृश्यात्रापि वैरि देवतात्वफलादातत्वाद्दाहमेवमातायाते-
आद्यधाती ५ ति ग्रंथकृत इति शेषः कविवाण्या देवतात्वाभावादाहतदाभिन्नत्वेनेति ग्रंथकृन्मम्मटः कवेर्भारतीकाव्यं वाग्देवीरूपभारत्यभिन्नं
जलाद्युपयोगाभावेद निर्मितिं सुरगादावनिर्वचनीयकमलादिनिर्माणं कुर्वती जयतीत्यन्वयः पद्मत्वादिरूपइतितत्कृतनियमस्य कमलादौ जलाद्युपयोग + ५ प्रमेयव्याप्तिः
व्यवच्छेदरूपः सोरभविशेषाद्ययोगव्यवच्छेदरूपस्य नियमेत कृत त्वस्याप्रयनिरूपत्वेन पद्मएवपुष्पपदप्रयोगः पद्मत्वरूपव्याप्य प्रमातिव्याप्तिः ५
तीतो व्यापकीभूतसोरभविशेषावगमइत्येवंरूपस्य नियमः तद्राहित्यं च कविनिर्मितौ प्रियामुखसंनिधाने तेषां पितदभावदर्शनान्मुखा-
दावपि पद्मपदप्रयोगाच्च पद्मादिसादृश्येन च नीलादावपि सोरभविशेषावगतेस्य कमलादौ जलाद्ययोगव्यवच्छेदरूपनियमराहित्य पुरुषोदेः सका
मपि कवेः कमलाद्यात्मकनिर्माणे सुरगादावव्याहतं अदृष्टं वेति व्यावहारिककमलादिहेतवदृष्टानपेक्षत्वं बोध्यं पूर्वकालेकेतिसमा- तत्वं ५
से एक ह्लादेतिस्यादतस्माह ह्लादेनेति अभेदेतृतीया धान्येनधनमयमितिवत्प्राचुर्येमयट् तत्फलितमाह ह्लादमात्रस्वभाव-
मिति प्राचुर्यमत्रापरिच्छिन्नत्वरूपमितिभावः मात्रपदेन दुःखमोहयोर्व्यवच्छेदः नियतिकृतेत्यादि समासः अन्यपरतन्त्रयोः पौनरुक्त्यं परि- रम॰ १
हरन्नाह कवेरिति आत्मनइति भारत्या इत्यर्थः तदायत्तत्वेतिच नि बंध कात्वेतामाभावादीनां तत्प्रतिभायामेव हेतुत्वमिति भावः रसादिना
...विप्रतिभानिर्मितसोरभविशेषाद्... कथं च निवतिकृतरादि ... किं च देवं ... नियतिर्विधिरिति कोशात् नियति
... तावमपहरतीति ... अदृष्टं ... नियमः ... पद्मादिपदेन सोर
... स्वर्गादि ... नियमः स्वर्गादि ... तत्फलं ... नि वस्वर्गप ...
... प्रियामुखपद्ये प्रतीति ... पद्मादिपदेन ... प्रयोगनियमस्य ... साहृदयावत
... विनीर्विप्रियामुखादौ पद्मपदप्रयोगात् ॥ ५

टी=३

मनाक्शोषरूपा उक्तिमेव कार्यत्वेन परिणमते अत एव शोकः श्लोकत्वमागत इति रामायणोक्तमिति बोध्यं कर्मधारय इति नवर
सरुचिरपदयोर्वैदूर्यादिहिरण्यगर्भः कर्मधारय इत्यर्थः नरर्षीदिति एकं चार्थे द्वे तत्त्वस्य श्लोकोक्तस्य व्यतिरेकप्रदर्शनमिति भावः तृतीयेति
हिरण्यगर्भपदक इत्यर्थः नवेगमिति अकोशिनोनरपद इत्थं द्विगोः स्त्रीत्वादिति भावः इत्यादिवदिति मदमद्यो गुणाद इति वनवावयवको रस
इति मध्यमपदलोपी समासः एकपदे नोक्तेनावयवभेदतत्समुदाययोर्विवक्षित इति भावः नवेति षड्रसेत्युक्तेति भावः अयोगव्य
वच्छेदीति नेन मधुरादिभिन्नस्याऽपि तृप्त्युत्वमित्युपात्तं व्यंग्य इति निर्माणव्यतिरेको विशेषणद्वारा स्फुटं व्यंग्य अयं तु शब्दव्यंग्य
इति भावः नियतेः शक्तेति नियते स्वरूपायाः शक्त्या स्वभावेन कृतो यो नियमः जलकमलादावेव कमलत्वमोरभादिरित्येवंरूप
स्तदात्मयस्तरूपेत्यर्थः सुखादिजनकत्वेन सत्त्वादीनां तदात्मकत्वं मोहो भ्रमः तत्त्वभूतीति निमित्तसंग्रहः असमवायिकारणेऽपि यी
सहकारित्वं मधुरादिषड्रसेति रसशब्दश्लेषमहिम्ना तेषामेषां वरसानामभेदप्रतीत्या ब्रह्मनिर्मितिगतरसानां तत्त्वासत्वेऽपि ना
स्तिकप्रतीतिर्ने व्यतिरेकप्रदर्शनविरोधः मनोरमेति एतेन ब्रह्मनिर्मितेरपि मधुरादौ ईदृशीति पराभूतो ह्लादैकेत्येनेन चालंकारा
भीना ह्लादजनकत्वमुक्तमिति नपौनरुक्त्यं साह एववती चेति उपमानोपमेययो रेखाव्यतिरेकोपि नरूक्त इति भावः ब्रह्मणो निर्मि
तेरिति उत्कर्षजातियोगत्वमुपादानेऽपि शमिहतादियमेव तत्त्वेति भावः अत्र ब्रह्मनिर्मित्यपेक्षया भारती निर्मितौ यो व्यतिरेकस्तन्मूल
को ब्रह्मापेक्षया भारत्यां व्यतिरेक इति लक्ष्यक्रमव्यंग्यध्वनिः कविभारतीनिर्मितेति निर्दिष्टेति पाठः व्यक्त इति विशेषणद्वारा स्फुटं व्यंग्य

का॰टी॰ १ इत्यर्थः एतावताधर्मेति धर्मश्च निर्मितिरूपः निर्मितेर्धारणं तु रचनपश्चादेव तत्तात्पर्यतुल्यो व्यापारः आदधतीत्यस्यार्थः शालिनीति
यदा निर्मितिरिति कर्मणि क्तिन्। शिल्पोत्कर्षे शिल्पोत्कर्षस्यार्थे सिद्धत्वादिति भावः नन्वर्तमानतामिति वर्तमाननिर्देशः प्रयोगचिरंतन
2 त्वविधिनिर्देश इति भावः युक्तिमित्ती चेति नतिमात्रनाशपाविघ्नसंशंकितत्वेन तन्नाशार्थमेव शपापेक्षणीयेत्यर्थः नतिरपि नि
त्यैवेति। जयत्यर्थ उत्कर्षः स च विशेषानुपादानात्सर्वेश इति योगिकोलभ्यते इति भारत्यां सर्वोत्कृष्टत्वज्ञाने तु न्यायेन वेदात्वन्या
येन प्रकारांतरेण वा भारत्यपेक्षया सर्वस्यापकृष्टत्वज्ञाने सर्वोत्तः पातित्वात्मिन्नप्यारायापेक्षयाऽपकृष्टत्वज्ञानेवां जनयाह
नमेवेति भावः तदेवाह यत इति। आक्षिप्यत इति। व्यज्यत इत्यर्थः वक्तृवैशिष्ट्यं च स्वापेक्षया पिभारत्युत्कृष्टत्वज्ञाने उपयुक्त
मिति बोध्यं। ननु सर्वः प्रणत इति लाभेप्याह प्रणात इति नलक्ष्यं तथा प्रणतिरेव चमत्कारनिर्वाध्यते तत आह। तेनेति। व्यंजनेनेत्यर्थः
प्रणत इति कर्तरि क्तदर्शनेन धातोरकर्मकत्वान्नामितिप्रतियोगे द्वितीयेत्याशयेनाह तां प्रणतीति। नंलभ्य इति। सर्वं जगतो ह
मप्यपकृष्ट[illegible]त्यापि व्यंजनये वलभ्यत इत्यर्थः व्यतिरेकालंकारस्यैवेति आंतरालिकव्यंग्यमादाये दं तेन पायंतिकदेवताविष
यकभावेनापिध्वनित्वेन क्षतिः अभिधेयं। वक्ष्यमाणमित्यर्थः तदाह ग्रंथस्तपमिति। न चेहैतस्यासंगतिः इह ग्रंथे इत्यर्थात्। अभि
धेयं च तद्दोषावित्यारभ्य बोध्यं ननु मिभेयप्रयोजने न नाभिधायकस्य प्रयोजनवत्वं वक्तिरित्या यमिधानस्यानत्वादित्याह राम॰
अभिनइति। किंचाइति तादर्थ्ये चतुर्थी इत्यपि बोध्यं व्यवहारश्चाचारः शिवेतरमरिंड इतिं तदुपदेशायुजे। उपदेशनिमाराणायेत्य १

र्थः उपदेशश्च युजेगम्यताव्यशान्तत्तदुपदेशएवयात्वाः लोकोत्तरेति· चमत्कारिबोधजनकेत्यर्थः तादृग्बोधजनकज्ञानविषयतावच्छेदक
धर्मवत्वं च वेद्यमानास्य अनुपहसनीयकाव्यलक्षणस्य लक्षणतावच्छेदकमित्यनेन दर्शयति वर्णनानिपुणेत्यादेः कमलत्वादिरूपेणाक
थनादि यश इत्यादि कर्मणां करोतीत्यनेनान्वयः धावकः कविः स हि श्रीहर्षनाम्नो रत्नावलीं कृत्वा बहुधनं लब्धवानिति प्रसिद्धिः मधु
रशर्मा हर्षशतकेन कुष्ठाद्विमुक्तोऽभूदिति च प्रसिद्धेः कारिकास्थ सद्यः पदं व्याचष्टे श्रवणानन्तरमेवेति ननु यागादिवद्देहान्तरापेक्षेत्यर्थः
परपदार्थमाह सकलेति· तत्रहेतुमाह स्थायीभावेति आस्वादनं च विभावादिमिलनस्य संयोजनमित्यर्थः तावन्मात्रापेक्षित्वाद् देववाविलं
बइति भावः शब्दार्थविषयव्यासंगाद्विलंबः स्यादत आह वेद्यान्तरेति· स्वविषयातिरिक्तवेद्यान्तरेत्यर्थः आनन्दमित्यस्य निर्मिमीत इत्यनेना
न्वयः व्यवहारविदे इत्यंशं व्याचष्टे राजादिगतेति· दुष्टाचारनिरहतयोपसमुचितेति उपदेशयुजइति व्याचष्टे रामादिवदिति· हितकर्तव्यत्वा
हितकर्तव्यत्वपरमेतत् तेनरामकृतगालिधमहत्वस्याप्यकर्तव्यत्वं रावणकृतहरणादेश्च कर्तव्यत्वं बोध्यं नन्वेवं किं कवेः रामाद्वा
दोनास्त्येव तत्राह काव्येतिशब्दप्रधानइति· तत्वं च समीहितार्थलाभायात्यन्तमानप्रत्यायकत्वं उपदेशकविधेयांशस्य लक्षणादिना
न्यथानयनाभावादिति भावः आदिना स्मृतिः शासना· प्रवर्तना· निष्फलेपीति अकरणप्रसक्तप्रत्यवायपरिहारातिरिक्तफलरहिते
पीत्यर्थः अर्थतात्पर्यवानिति नीत्यादेरुद्देश्यप्रतयानदङ्गुरोधेन शब्दस्य लक्षणाद्यपितत्रनाश्रीयत इति भावः इतिहासः प्राचीनवृत्तवर्ण
नं आदिना आख्यानादि· वैलक्षण्येहेतुः रसेति अंगभूतः उपायभूतः रसादिव्यक्तिनिष्पादकत्वं च रसभावादिसंयोजनफलकविभावाद्युप

संयोजनेनात्मा यजनात्पोवा॰ तन्निष्पाद्यरसादिव्यक्ति निष्पादकतया शब्दार्थयोर्गुणत्वाद्रसस्यैव प्राधान्यं स च कान्तासम्मिततयेनोपदेशं करोति तेनैतदुक्तं भवति ये सुकुमारमतयो
सुखित्वस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्यास्तान्काव्यकान्तेव रसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति गुडजिह्विका यथा
काव्यरसानभिज्ञाः शास्त्रमप्युपयुज्यते। प्रथमं लीढमधुराः पिबन्ति कटु कौषधम् इति यत एवं विशिष्टं काव्यमतस्तद्रूपादेयः नन्वेवमप्यभिधेयविना

का॰टी॰ स्थापनद्वारा बोधं संयोजनं मेलनं तस्यापि स्वतोऽसंभवादाह व्यंजनारूपेणेति गुणत्वादिति॰ एवं च गुणीभूतशब्दार्थाभ्यां कांतमेव का
३ व्ये वैलक्षण्यमिति भावः अभिमुखीकृत्येति॰ स्वं प्रतिपाद्यार्थबोधानुकूलयत्नाश्रयीकृत्येत्यर्थः सरसतेत्यादिना कांतासादृश्यं दर्शि
तं उपदेशं रामादिवदिति शास्त्रोक्तं कांता यथा स्वाभिमुखीकृत्य स्वेष्टं वर्णयति एवं काव्यं उपदेशरूपं स्वार्थं प्रवर्णयतीति भावः एवं वि
3 शिष्टं एतावद्विशिष्टमित्यर्थः साक्षात्काव्यविषयकयत्नासंभवादाह तद्धेतुरिति तस्य काव्यस्येत्यर्थः अभिधेये इति प्रकृतत्वे
ऽद्वैत्यर्थः काव्यांगत्वं हेतुतयेत्यर्थः बीजेति॰ जलादिकमिव कुत्सितादिसहकार्यासाद्य बीजादिभिरंकुरस्येव कवित्वस्य तयाजनता
हीजत्वं संस्कारविशेषः देवताराधनादिजन्यं विलक्षणादृष्टं शक्नोति काव्यं निर्माणं यानयेति योगात्म शक्तिरित्युच्यते तत्तद्रसादि
वासनावा प्रतिभाव्यपदेशः प्रतिभापदव्यपदेश्यः अनुपहसनीयकाव्यप्रसरस्येति उपहसनीयं च दोषवैशिष्ट्यादिना॰ ननु वक्ष्यमाण
वे॰ लक्षणानुसारात्तस्य काव्यत्वमेवेति चेत् न तद्दोषाविरुद्धलक्षणानुच्छेदकमध्येतदेवेत्यदोषात् लोकवृत्त इति योगस्य धर्मि सावारण
त्वादाह उपचारादिति नटचेष्टानंतादनंतवर्णनानिर्वाहः॰ इतिहासादीति॰ आदिना व्याकरणकोशछंदः षष्टिकलाधर्मार्थकाममोक्षा
णां प्रतिपादकस्य स्त्रीपुंलक्षणादीनां च संग्रहः विमर्शनात् युक्तायुक्तत्वपदार्थरसादिगोचरानुसंधानात् व्युत्पत्तिः पूर्वोक्तगोच
र॰ तदुपदेश इति एतद्रूपतया च प्रकृतग्रंथोपयोग इति बोध्यं तया॰ शिक्षया॰ मिलितोपेति पूर्वोक्तसमुदायपरामर्शकत्वेनेति भावः राम॰
अन्योन्यापेक्षत्वेन मिलितत्वं॰ उत्कृष्टोत्पत्तिः उपहासाकरणाभिन्नकाव्यस्योत्पत्तिः इदमुपलक्षणं उत्कृष्टबोधस्यापि अत एव घटयितुं ३

चयेज्ञानं तीतिपूर्वोक्तस्य नवैयर्थ्यं शक्तिपदेन च कारणशक्तिर्वा इत्यशक्तिश्चोच्यते उपधानं कारणत्वेन ज्ञानं· मिलितस्य दंडचक्रादी
नामिव कारणत्वं न तु तृणारणिमणीनामिवेति ध्वनयितुमेव हेतुरित्येकवचनं एकधर्मावच्छिन्नकार्यतानिरूपितकारणत्वबोधक
त्वात् मंत्राद्यधीनकाव्येपि निपुणतायाः पदतदर्थवासनारूपायाः पदतदर्थस्मारकतया तस्योपयोगः परं तु जन्मांतरीयासा· अ
भ्यासोपि अन्वयव्यतिरेकानुविधानासिद्धो जन्मांतरीयः कल्प्यत इति भावः मंत्राद्यधीनाशिशुकाव्ये शक्तेरेवमेवेति दिक् का
रणतैवेति कारणतैव मिलितत्वेनेति न भ्रमः· मिलितत्वं कारणतावच्छेदकमिति न भ्रमः कार्य इति· किंतु मिलितानां परस्प
रसहकारितानां फलोपधायकत्वमित्येवेति बोध्यं लक्षणं· इतरभेदकं इष्टतावच्छेदकं च· तत्प्रकारकज्ञानस्य प्रवर्तकत्वादिति
बोध्यं शब्दार्थाविति अर्थाश्रयत्वाच्छब्दस्यापि शुक्तिः आस्वादव्यंजकत्वस्योभयत्राप्यविशेषात् प्रागुक्तलक्षणतावच्छेदकस्योभ
यत्रेतित्वात्तत्काव्यं पवित्रं तु तत्काव्यं तु दृष्टमित्युभयविधव्यवहारदर्शनाच्चेति भावः तत्पदार्थः काव्यं तद्व्यंजकेति मूर्ध्नि वर्गान्त्य
गा इत्यादिना वक्ष्यमाणवर्णसंघटनादीत्यर्थः तेन नीरसेऽव्याप्तिरपि नेति बोध्यं अनन्तुः पंथ्या इति एवं हि सालंकारावित्येव वदे
दित्यत आह अस्फुटांतरमप्याहवयंतीति चमत्कारहेतुरिति चमत्कारनिदानस्यैव काव्यत्वादिति भावः अनलंएवेति अलंकार
निरपेक्षमित्यर्थः छायातिशयं पुष्णातीत्यनेनान्वेति अलंकारविरहेपीत्यस्यैवार्थकथनं· क्वचित्तु अनलंएवेति पाठः मत्स्यक
छपदर्शनं छायातिशयं पुष्णातीत्यतो ध्वनिरित्यर्थः छाया चमत्कारः रसोत्यंतरत्वमिति। रसात्यंतरशाह अस्पर्शच्याद्यंजनः रसप

का·टी·
४

५

दंचभावादीनामप्युपलक्षणं क्वचित्तु रसान्यतरत्वमित्येवपाठः यथोदाहृतेति · नचात्र जयहेतोर्योगींद्रत्वादेरेकत्र चुलुके म
त्स्यकच्छपदर्शनहेतोर्माहात्म्यादेरुपादानात्काव्यलिंगमस्तीति वाच्यं · तस्यानुत्तरत्वाविरोधित्वात् एकचुलुके मत्स्यकच्छपयो
र्विरोधाभासस्त्वसत्त्वपि न स्फुट इत्याहुः यदिति तत्रि · अतएव हतो क्वचित्स्फुटालंकारविरहेपि न काव्यत्वहानिरित्यत्र स्फुटे
त्युक्तं अलंकारत्वं च चमत्कारितोध्वजनकत्वगर्भमेवेत्याशयवतानुक्तलप्रि स हेः शाख्यः शोषेत्तु ल्लसत्येषध्वमइत्यादौ नका
व्यत्वं सत्त्वप्यनुमानेलंकार एवोक्ते इत्याहुः स्वाधीनपतिका काचिदसमक्षमुपभुक्तोष्ठपिवरोपकरणादिषु उत्कंठासक्तापि ते
षामर्पणोपादेयतां सूचयंती सखीमाह यः कौमारेति · अत्र तत्पदार्था उपभुक्तत्वार्थकाः हिशाहोयद्यप्यर्थकः सचसर्वत्रान्वेति ·
अस्ति क्रियाध्याहारश्च · यः कौमारहरः वरः यद्यपि सएवास्ति चैत्रकृपायद्यपि ताएवसंती ता दि क्रमेणान्वयः कौमारं बा
ल्यं परमरासि कतयातत्रापि संभोगेच्छोत्पादनेन हृतवान् · क्षियतेष्वियत्वेन स्वयमंगीक्रियते इति वरः एते लोभ्याभ्यानुरागः रूप एव ·
उपभुक्ता एव नानुपभुक्ता इत्यर्थः उन्मीलिताः विकसिताः स्तेन यौवनलाभः कलिकावस्थायामेव शैशवात् · मालतीवासं
ति कलनाः स्वतु जातिः चैत्रैतस्यासंभवात् · प्रौढाइन्दुदीपनादिशागल्भ्यशालिनः अतो मंदत्वेप्यविरोधः कदंबगोल्लीकदं
बः तेन चैत्रक्षपाइत्यनेनाविरोधः चोवधारणेन एवेत्यर्थः अत्र प्रौढा युवान इति श्लिष्टविशेषणावलात् निलमालत्योर्नायकना राम०
यिकात्वप्रतीतिः स्तुरमिति नवास्याः पश्चिनीत्वलाभः चकारोप्यर्थे लीलाहमर्थकाव्ययं नेतारं योन्यः अस्मीत्यस्यतिरं · तत्वोहिसेवे ४

त्यस्य शब्दो हेतुफलाभावो न स्यात् तथा वाहमपि सैव॰ उक्तं ग्रहेत्यवस्थान्तरं न शब्देनेत्यर्थः तथापि तन्नदस हेतुपयुक्तम सकलसाम
ग्रीसत्त्वेपि॰ न ह्येतत्पयुक्तम् इत्यर्थः कं स्मरतेत्यादि सन्नमंतत्रयेप्यन्वेति तेन सर्वेषां प्रपयुक्तत्वलाभः तेन स्मरजलीलाविधिरपि नात्राहे
शोयेन क्रीडास्थाने कोपपुत्कं ठास्यादिति व्यज्यते रेवायानर्मदायाः रोधस्तीरं वेतसीलताविशालतयालतांतरा प्रपत्वेन सेवतत्रूत्कस्यतल
म्भो देशस्ता स्मिन्ध्रुरतेहेतुर्यौवनापरोगमनादि ज्ञातं संवधिनी लीलाविषविन्यासादिः आत्मनः प्रकृतिविशेषो वहुकालव्यवधानेवा
तेषामसत्त्वेनोपादेयत्वं वा रत्सुत्कं ठयाविभावनीयमिति विरोधमूलकोविभावनालंकार इति दीपिका॰ तत्र प्रकृतिविशेष इत्यस्य इत
रज्जनविलक्षणः प्रकृतिविशेष इत्यर्थः एतेन प्रकृतिविशेष इत्ययुक्तं सा चेवास्मीत्यनेन परिहृतत्वादिति परास्तम् अत्र तत्राः अनुप
युक्तता॰ विशेषणायोगस्येति विशेषणसंबंधाभावस्येत्यर्थः विशेषणशब्देनात्र विधेयमुच्यते एवं विशेष्यशब्देनोद्देश्यं ननु सए
व वर इति पद्याक्रांतेनत्वावच्छिन्नमुद्देश्यवरत्वस्य विधेयतत्प्रतीतेर्विशेष्यसंगतएवायमेवकार इत्यतआह एवं विशेष्येति नन्वत्रैवे
वेति अत्रमाहेश्वरस्य विधेयत्वेन तत्तीयांतमुख्यपदार्थस्याप्युद्देश्यत्वमित्यभिमानः न चेदृशमस्फुटत्वम किंचित्करं॰ फलाभावत्व
कारणाभाववत्त्वाभ्यां प्रतीतेः कल्प्यतयाप्युरस्फूर्तिकत्वाभावेन चमत्काराननाधायकत्वादिति भावः किंच विप्रलंभे नायकादेर्गुणस्म
रणस्यैवोद्दीपकत्वं नतु विशेषोक्त्यादिपर्यवसितवरोपकरणादेरुपयुक्तत्वेनाकिंचित्करत्वस्येति रसानतुगुणत्वमप्येतयोर्बोध्यं॰ स
हशादर्शनाप्रयोज्यत्वात्स्पृहवहीत्यादेः ग्रत्यभिज्ञाशरीरत्वाच्च न स्मरणालंकारः यतः स्तुरभयोतः श्रेदाः स्वकार्यसमर्था इति काव्यलिं

का·टी· ग्रमप्यस्फुटं· अशाठत्वाद्रेफहत्यनुशासनस्यापि विप्रलंभीयमाधुर्यगुणाननुगुणाभ्यां सविसर्गतया गुरुभ्यां रेफाभ्यां घटितत्वाद्
५ चमत्कारित्वमिति बोध्यं· शृंगारेति· विप्रलंभे इत्यर्थः अप्रधानेइति इतररसोपपादकत्वे इत्यर्थः पार्यंतिकास्यादहेतुज्ञात्रविप्र
5 लंभः स्वाधीनपतिकाया अपि गुरुसान्निध्यादिना क्रीडास्थानाप्राप्त्या एवं जनमिथुनस्य निधिस्थानाप्राप्ते वस्तुरतप्रतिबंधेन तल्लंभ
वात् अतएवात्र विधेयाविमर्शाद्यो न दोषाः दुःखितकविनिबद्धोक्तौ दुष्टत्वातिशयव्यंजकत्वेन गुणत्वादिति दिक्· दोषाणां दुर्वारत्वात्
इति अयंभावः अदोषत्वं यत्किंचिद्दोषाभाववत्त्वं यावद्दोषाभाववत्त्वं वा नाद्यः अव्यावर्तकत्वात् नांत्यः काव्यत्वस्य विरलविषयत्वाप
त्तेः इदं काव्यं दुष्टमिति व्यवहारानापत्तेश्च· कीदृगिति अनुपहसनीयकाव्यत्वरूपलक्ष्यतावच्छेदकाक्रांतस्येदं लक्षणं· दोषवत्त्वेप ह
सनीयत्वस्य दुर्वारत्वात् सामान्यलक्षणं तु अदोषपदाघटितमेव अतएव दुष्टं काव्यमित्यादेरुपपत्तिरिति भावः भेदानिति· भेदो वि
भागः अत्रोत्तमत्वादिना तत्तन्नियत ध्वनित्वादिना च विभागः शेषं लक्षणं ननु निःशेषेत्यादौ वक्ष्यमाणरीत्या संभोगरूपव्यंग्यस्यापा
र्यंतिकविप्रलंभरूपव्यंग्यापेक्षया गुणीभावाद्वाह्यवाच्यादिति शक्तिलक्षणाभ्यां बोधविषयादित्यर्थः वाच्यार्थरसयोरांतरालिक
व्यंग्योत्कर्षानुत्कर्षाभ्यां ध्वनिगुणीभूतव्यंग्यत्वव्यवस्थेति भावः पदादिभिः वर्णैरिति· क्रमोपलभ्यमानतत्तद्घटकैर्वर्णैरित्यर्थः स्फोटरूप दू२
मिति अखंडमेकं वाचकमित्यर्थः अयंभावः एकस्मात्पदादप्यर्थो बुद्ध इति व्यवहारात् एकमखंडं मध्यमावस्थं वाचकं· पराख्यस्य ब्रह्म राम॰
णो नाभौ पश्यंत्याख्यो विवर्तस्ततो हृदयावच्छेदेन मध्यमाख्यः स एव पदादिपदात्मकत्वे वैखर्या ध्वनिरूपया अभिव्यंजितो वाचकः वैखरी ५

त्मकस्य वाच्यत्वविना शिल्वादर्थोपस्थापकत्वेन ध्वनित्वमुच्यते निषिद्धानित्यव्यवहार इति वैयाकरणमतं मंजूषायां प्रतिपादितमस्माभिः
व्यंग्यव्यंजकत्वेति एतेन वैयाकरणानामपि व्यंजनाभ्युपगमो दर्शितः गुणीभूतव्यंग्यमितितत्र उदाहरणं निःशेषेति· वापीस्नानव्याजे
न नायकसंभोगाय चेन्द्रागमोपयंती दूतीं प्रति विदग्धोत्तमनायिकाया उदासीनप्रतारणाय स्नानकार्यत्वप्रतिपादनमुखेन वसंभोग
चिह्नोद्घाटिकेय युक्तिः एतेन स्नानस्य हृद्यभ्युपगमनत्वेन तीनिवेदितयोः स्नानतदंतिकगमनयोरन्यतरस्य मतत्वे परस्यापि मतत्वाप
त्तौ तदंतिकगमने मिथ्यात्वोपन्यासो निर्बीज इत्यपास्तं अस्तत्वेपि स्नाने मत्स्यत्वारोपस्यादिदग्धजनप्रतारणोपयोगित्वात् एवं त
दंतिकगमने मिथ्यात्वप्रतिपादनस्यापि मिथ्यावादिनि तदंतिकमगतत्वेवमेयागत्वावकुधाप्रमाधितोपि नागत इति वादिनि·दूति।
ननु सखि मत्वं तारणादिकं नैत्वात वांधवजनस्य·म तद्ध्रुणस्य·पीडाजनकं तदुद्देशेण संपादनादीतिज्ञानस्याने· इतः मत्सकाशा
त्·वापीमिति स्नानकालातिक्रमभयात् नदीमतिशीययोरंतिकमगत्वेवेत्यर्थः तस्यापरोदेनानभिज्ञस्य पुनरेवार्थेने हृस्यर्थः अध
मस्य बन्धुधाकृतापराधस्य स्वशरणागरूकस्य वा·वापीस्नानोपपादकमाह निरिति यत स्तव स्तनयोरतं दशांतममदेशः निःशेष
यथा स्यात्तथा सतलितं चंदनं यस्मात्तथा ननु उरस्थलं नापि संध्यादिरूपाति मोन्नतभागोपि·वाप्या गंभीरजलाशयत्वात्पिच्छिल
तीरत्वात् तदुक्तवहलपयुजनमपि पारवशणादंसहृयलगाय स्वास्तिकी क्रमभुजलतापुरुलेनतदस्पैवोन्नततया परामर्शात् च्युतत्
वयुतं·ननु ध्वाविनं क्षालितं वा·व्यंग्यपक्षे तत्रैव महं नाधिक्यात्·संध्यादौ नायककरपरामर्शायोगाच्च·एवमुत्तानतं याव हल जल

संबंधाद्दूरनशोधनं नागुल्फादीनामधिकसंमर्दवहनाच्चाधर एवातितरां मृष्टरागः तत्त्वीषन्मृष्टरागोष्ठः स्नुज्ञतयातत्तंबंधमांद्यात्·
त्वरयास्मभ्यगक्षालनाच्च· व्यंग्यपक्षेतुनेत्रेचचुंबननिषेधः श्रोष्ठेतत्रिषेधाच्च नेत्रेचतत्क्षततथात्वं· नेत्रेदूरं पुंतभागएवानंजने· स्नानका
लेमुद्राणतमध्येजलसंबंधाभावात् व्यंग्यपक्षेपांतएवचुंबननिषेधः मध्येतत्रिषेधाच्च नेत्रेवानंजनत्वं· इयंतवतनुः तन्वी· कृशा· स्ना
नोत्तरमभोजनात् अतएवपुलकिता· जनभयाद्गजलाद्दूरीकरणात्· पुलकोरोमोद्गमः व्यंग्यपक्षेकापुंपेहरतत्रमात्·पुल
कस्तुतनत्रातुभनाद्धुतरस्मरणात्· स्नानसाधारणसंपादनायवापीमित्युक्तं नतुगृहेस्मरणेवा· अत्रपदकृतज्ञायां बांधवत्वादि
र्यं चतस्मिन्नधमेतथाभेमतद्युक्तमेवमप्येवंविधवंचनायात्रत्वमितीर्ष्याहितकविप्रलंभसंचारिनिर्वेदध्वनिः तदनुगुणास्त्रदूतीभोगः
चेदनच्यवनादीनां चवाच्यानां व्यंग्यानां चपरिरंभचुंबनाद्यनुभावानां संभोगोत्कर्षद्वारेणोच्चयाउद्वेजकानां निर्वेदोत्कर्षकत्वमि
त्यन्यत्रविस्तरः प्राधान्येनेति· विशिष्टमित्यध्याहारः प्राधान्यंचेतरनायिकासंभोगस्यविप्रलंभोद्दीपकत्वेन वाच्यापेक्षयातिशयि
त्वात् अधमपदेनेति अयंभावः विदग्धायाग्रदत्तास्यर्थपानयावाचोयुक्त्यास्नानसाधारणेनैतेष्वर्थेष्वगतेषुवक्तृबोद्धव्यादिवैशि
ष्ट्यवलात् दुःखप्रयोजककर्मशीलत्वरूपाधमपदार्थघटककर्मपदार्थोवाच्यतादशायांकर्मान्तरसाधारणेनावस्थितोपि व्यंजनया
दूतीसंभोगरूपतादृशकर्माकारेणापर्यवस्यतीतिइदमेवाधमस्यव्यक्तंधमपदेनेत्युक्तिध्वनितंप्राधान्यं· मदितिइतरानपेक्षतयास्वं
गपबोधकत्वाच्च· चंदनच्यवनादीनांतुस्नानकार्यतयानिवद्धानांयोग्यतयासंभोगांगमर्दनाश्लेषचुंबनादिकार्यत्वस्यापिप्रतीतिसंभवात्ते

सन्निधं जनन्हारा तस्या हितस्यैनैव संभोगागमकत्वमिति विशेषः एतेन नीचकर्मकारित्वस्याधमपदगाच्यमस्या साधकं संग्राममितस्यापास्तं ·
दूतीशेषरागमापेक्षत्वेन विस्मृतप्रेमतयापि तत्संभवात् अत्र विप्रलंभस्य प्रधानतया निःशेषेत्यादिवाक्ये श्रुतवेत्यध्याहारेऽपि नस्यू
नपदतादोषः उक्तासामग्र्यस्य निर्वेदातिशयव्यंजकत्वेन गुणत्वात् · अत एव विधेयाविमर्शोऽपि न दोष इति दिक् · मुख्यार्थबाधा
दिति · स्नानस्याचारत्तवत्वाद्बाध इति भावः किं तज्ज्ञानमिति · संगमार्थं गते बाधज्ञानं ते किं चित्करं · बाधाभावादिति वाक्यार्थबो
धात्पूर्वं बाधानवतारादित्यर्थः उत्पन्नेऽपीति उत्पन्नेत्यर्थः न च तात्पर्यं विषयतदंतिकगमनान्वयानुपपत्त्या लक्षणेति वाच्यं विद
ग्धायावैदग्ध्यरक्षायै अविदग्धजनप्रतारणाय च स्नानपदनीतिप्रवृत्तेन तत्वकाश एव तात्पर्यात् · अनतिशायनीति · अनतिशयस्य
न्नत्वेन तत्वप्रत्वेन चेति बोध्यं अस्फुटमात्रमितिमात्रपदेनास्फुटतरमेव व्याख्यायते इति बोध्यं संकेतस्थले व्यासंगवशेनानाग
तां स्त्रीयत तत्स्थलगमनं ज्ञापयितुं तत्रत्यवंजुलमंजरीमादायोपस्थितं नायकं दृष्ट्वा खिद्यमानायाविप्रलंभवतीनामिदं · ग्रामतरुणा
मिति · ग्रामे एक तरुणः तेन ग्रामस्य सकलयुवतिजनप्रार्थ्यमानतया दुर्लभत्वं व्यज्यते तरुणापदं इति योषित्तरुणत्वेन परस्परानु
रागोत्कर्षो व्यज्यते नवेत्यादि मलिनीभावोपपादकं विशेषणं · वंजुलोऽशोकः नवेत्यनेन नूतनवयाः नः कारणं हस्तगतोऽचित्येनाभि
तर्कणीयता · मनाक्पदो युक्तः नायमहितत्व · तेनातिशोभाशालितया नायिकया दर्शने पिबविततर्कणीयता सूचितः वारंरंजनं ना भये
न दर्शने साऽस्य विरहात प्रशंसा भवतीति वर्तमाननिर्देशाभ्यां दर्शनमलिनीभावयोरविरामः सूच्यते · ग्रामतरुणां सूचः प्रशंस्या
त१

का०टी० स्तनस्तपामुखच्छायामलिनाभवतीतिसंबंधः छायाकांतिः दत्तसंकेतेति। स्वयमेवसंकेतं दत्वा विफलीकृत इत्यनुतापातिशयोमा
७ लिन्यकारणं गुणीभूतत्वेहेतुमाह तदपेक्षयेति। चमत्कारस्यास्वादः तस्यातिशयइति। पौर्वापर्यविपर्ययलक्षणादित्यर्थः तदुपपा
७ दकंदर्शनकालेऽप्यवतत्कार्यं मालिन्यमिति तद्रूपइत्यर्थः वाच्यप्रतीयतइति। अत्रव्यंग्येनसंकेतभंगेनवाच्यमुखमालिन्याति
शयरूपानुभवमुखेनैवविप्रलंभाभासपोषणं नकेवलेन। संकेतभंगस्याकर्तव्यत्वबुध्यापिसंभवादितिमदनातिशायित्वंव्यंग
स्येतिभावः विशेषेत्यत्रतदोषदूतीवेशिश्येराअधमपदेनचव्यक्तसंभोगेनैवनिर्वेदद्वाराविप्रलंभपोषकत्वमितिबोध्यं। पर्यंतव्यंग्य
विप्रलंभाभासेनतु अस्यापिध्वनित्वमेवेतिदिक् अध्याहार्यमिति अन्यथाश्वयोरिवास्यसंज्ञान्तराकरणोऽन्नतास्यादितिभावः तद५
ननुव्यंग्यरहितंकाव्यमप्रसिद्धं पार्यंतिकरसादिव्यंग्यशून्यस्यप्रहेलिकात्वादतआह अस्फुटतरेति। ईषत्वस्यानर्थत्वात् अव्यं
ग्यमस्फुटतरव्यंग्यमित्यर्थः [illegible] इत्येके। गुणालंकारयोगीति। तन्मात्रेनतुरसादिरूपआत्माव्यंग्यस्यास्तीतिभावः तदुक्तं रसादिरा ३प
त्मानुगुणाः शौर्यादिवत्दोषाःकाणत्वादिवत्। अलंकाराः कटकादिवत्शब्दार्थौचशरीरमितिः स्वच्छंदेति। मंदाकिनीगंगावः युष्मा
कंमंदतां अज्ञानं पापं वा अस्मज्ञाय करोतिमिघ्यादितियोजना। तीर्थांतरात्व्यतिरेकं दर्शयितुं विशिनष्टि स्वच्छंदेति। स्वच्छंदंस्ववशंन
तुवातादिपरतंत्रं यथातथा उच्छलनत उच्छलत अंबु विशेषणं तेनांबुवाहुल्याद्गांभीर्यलाभः अच्छं निर्मलं। कच्छस्य जलप्रायदेशस्य। रम्म०
गुहरेतरंगकृतविलेखातंदुर्वलंतदितरत्वेगातिशयेनवलवत् इदमप्यंबुविशेषणं। अंबुनश्छटा परंपरा। तयाम्रृच्छ इवविनश्यन्नमो ७

होऽज्ञानं येषां अनतस्य हर्षः स्नानस्याह्निकत्वेन लाभेऽपि श्लाघात्वात् यथोक्तिः न... तराद्व्यतिरेकं दर्शयितुं प्रमदविशिनष्टि · उद्यंतः यं १
प्रकाशमानाः उदारा महांतो दर्दुरा अमेकायास्तु एवं विधा दर्यः कंदरा यस्यां सा तथा दीर्घा आयता अदरिद्राः शाखा विवाकुलत्वनाकु
शापेक्षा मासे येषां मदन्यो पि दीर्घ इति द्रोहः पातनकारणं ते न उद्रेकं उर्ध्वप्रसरणं तद्युक्ता ये तरंगाः तत्र एव मेदुर मदो निविडा ह्रीकारो य
स्याः महोर्मीति पाठे तेन उद्रेको येषां मीदृशाये महोर्मयः इति व्याख्येयं धीतेरभिव्यक्तेरिति अत्र मंदाकिनी आलंबनं तत्कुंजा उ
दीपनं · तद्वोनुभावः स्मृत्यौत्सुक्यादयः संचारिणः · इदमुपलक्षणं · महर्षिसेवनीयमीर्थीनराद्व्यतिरेकोपि अंगत्वेनोधाः विभाव दि·ना ५
त्वेनापीति · उद्दीपनविभावत्वेनापीत्यर्थः अस्फुटतरमिति उद्दरालंकारकृतोत्कर्षेणाविनापकर्षान्नत्वजानीतिव्यवहितप्रतीतिक
त्वाद्धित्वभिमानः तरंगाग्रादिगम्यमानगंगानिष्ठोजः प्रकाशकत्वयानुरजितिकट्टप्रशस्थपददघटितविकटवर्णादीर्घसमासा देर्गुणत्वेन स्तु ६
तदनुष्णासस्यापि भावानुगुणत्वे बोध्यं व्यतिरेकस्यापि अंगत्वस्य मत्वात् शाढ् चित्रमात्रोदाहरणत्वात् चिंत्यं · विनिर्गतमिति · यं प्रकृतं
हयग्रीवं · मानदं · शत्रुमानखंडकं मित्रमानदातारं विनिर्गतं नतप्रशिथितं नाम्य मरावत्यां प्रविष्टं यदृच्छया अमरावती विजयाविष
यिरापापि ... कः याम्बेदिच्छया · उपक्षुत्य ... कर्णेपि ... कारिकिकयास्तुत्वा · ननु हतमुखेन · संबंधमेणा भयेन इंद्रेण अव्याहते सूर्ये
रणापि · स्वयमेव दौवारिकाज्ञाने विलंबासहत्वात · द्रुतं शीघ्रं पातिता यथाकथंचिन्निक्षिप्ता · ननु विस्रब्धं निहिता · अर्गलानतु कंपा
रफलके प्रवलापितेइति भावः उपक्षिप्तेति · पातनक्रियया समानकर्तृकं · अत्र अमरावत्या स्त्रीत्वं "वोत्प्रेक्षेति · नायके दूभयप्रदर्श

का·टी· नष्टभ्रष्टममरावतीस्त्रीभयमपि वीररसपोषकादिति व्यस्तालंकारत्वं बोध्यं एतेन संशयरूपायाउत्प्रेक्षायाः संशयतोभयाभावप्रापक
८ त्वस्यापि सत्त्वाद्वीररसानुगुणत्वमिपास्तं · भावांशे एवोत्कर्षकोटिकत्वेनादोषात् रसादाविति · अत्र वीररसः तस्य हयग्रीवआलं
बनं · प्रतिपक्षैःक्षमयमुद्दीपनं · मानखंडनमनुभावः यद्वह्वान्संचरणागम्याधृतिः संचारिणी · आदिना प्राकृतश्लोकीयभावपरिग्रहः म
स्तोयोमेति · योस्तोमयः सोऽस्मदर्थः स्तुमनोधन्वा कामः शानवक्रं · चक्राकारं शातपूर्तेः प्रापसंपादकं पाषाणजयंत्रमुच्यते · पुलिनं
तीरं · तत्रागत इत्यर्थः अहं केसे · सायंसमये · स्त्रीत्वेन भयवशात्त्वरितगमनं ।। ।।इति शिवभट्टसुतसतीगर्भजनागोजी
भट्टकृते काव्यप्रदीपोद्योते प्रथम उल्लासः ।। ।।स्वरूपलक्षणादिभिरिति यथायोगमभिधत्ते स वाचक इति स्वरूपं तथाविधात्
त्वेव लक्षणं एवमन्यत्रापि स्वं · त्यादिना विभागः प्राधान्यादिति · काव्यशास्त्रप्रयोजनेन लक्षणघटकेतरपदार्थमपेक्ष्य तयोः प्राधा
न्यं · स्वरूपमिति · विभागानंतरं तन्निरूपणस्य सांप्रदायिकत्वादिति भावः सामान्यलक्षणं तु शक्तत्वजातिमत्त्वं शक्यस्य तदभि
धेयत्वं चार्थस्य प्रसिद्धमेव · एकवचनेन सामान्याभिप्रायेण · तत्र लाक्षणिकव्यंजकयोर्वाचक उपजीव्यः व्यंजकस्य वाचकलाक्ष
णिकाविति उपजीव्यक्रमेणोपन्यासः त्रिधेति · वाचकत्वाद्युपाधिभित्तिं वोध्यं शास्त्रे · वैशेषिकादौ · लाघवार्थमिति · प्रकरणला
घवा[illegible]नुरोधादित्यर्थः अन्यथा प्रकरणचतुष्टयापत्तेरिति परमानंदचक्रवर्ती · वाच्यलक्ष्येति · वाचकत्वादिव्यापारेणावगम राम०
णागावकादिप्रतिपाद्यत्वं तल्लक्षणं बोध्यं · एतेनाग्रे एषां लक्षणानुक्तेर्न्यूनतेति परास्तं ।।४ यादीति · आदिना भाट्टमीमांसकाः ८

मी१

नत्र इति। श्यामाकरेति शेषः। तात्पर्यार्थ इति। आकांक्षावशाद्भासमानस्य हि तात्पर्यार्थत्वेन व्यवहारः। आनुपूर्वीविशेषकारणत्व
ज्ञानरूपाकांक्षा। एकपदार्थे परपदार्थस्य प्रकृतसंसर्गवत्त्वं योग्यता। अव्यवधानेनान्वयप्रतियोग्युपस्थितिस्त्वसंनिधिः। वशात्। ग
द्रूपात्वयोजकाः। स्वपदार्थः प्रत्येकपदवृत्त्या विषयः। अतिप्रसंग इति। अशक्यीयान्वयमानरूप इत्यर्थः। घटवद्भूतलमित्यत्रापरीयसंयो
गस्याभानापत्तिः। अतिहितस्यापि संयोगत्वेन योग्यतेत्यभिमानः। शक्यान्वयत्वस्येति तेषामपि नानात्वं संभवेत्तात्पर्यज्ञानकारणत
याऽतिप्रसंगो वारणीय इति बोध्यं। अतिप्रसंगादिति। गोपदादश्वादेरपि बोधापत्तिरिति भावः। अन्विताभिधानवादिनामिति। अन्वित
मेवाभिधत्त इति वादिनामित्यर्थः। अन्नानुचिकीर्जितत्व अन्वितत्वेन शक्तावपि अन्वयविशेषभानाय आकांक्षादिकमवश्यं कारणं वाच्यं। ए
वं च विशेषरूपेणाशक्यस्येव भानमिति तथाप्यवश्यं वाच्यमिति सर्वस्यापीति। वाच्यलक्ष्यव्यंग्यस्येत्यर्थः। एवं च वाच्यादिज्ञानं विना त
स्यानिरूपयितुमशक्यत्वात्तत्पूर्वमतो वाचकादिनिरूपणमिति भावः। प्रधानस्य रसादेर्व्यंजकत्वादाह प्रायश इति व्यंजकत्वमपीत्य
पिना व्यंजकतादशायामपि वाचकत्वाद्यप्रच्यवः सूचितः। शाब्द व्यंजनायाः सकलसंमतत्वेनार्थव्यंजनायामसांप्रदायिकत्वशंकावा
रणाय प्रायश इव्यंजनामनुदाहृत्यैव तां प्रथममुदाहरति। भवद् इति। काचिदुपनायकसंगमार्थिनी बहिर्गन्तुं मातरमाह। मातर्गृहोपकर
णमद्य खलु नास्तीति साधितं त्वया। तद्भण किं करणीयमेवमेव न वासरः स्थायी। मातरित्यनेनादेशयोग्यत्वमलंघनीयाज्ञत्वं च सूच्यते।
गृहेत्यनेनावश्यकता। उपकरणं इंधनशाकादिसामग्रीत्यर्थकं। तेनान्यथासिद्धिपरीहारः। एकैकसंबंधनादेरसत्वेपि पासर्वाभिनोपि ग्र

का०टी० ९ १

ह्रणसंभवः अद्येत्यनेनाद्यैवसंपाद्यत्वं साधितं ज्ञातमिति सत्वंशंकाराहित्यं त्वयेत्यनेन स्वकल्पनाराहित्यं तदित्यनेन हेतुर्थके
नावश्यवक्तव्यत्वं किंकरणीयं कर्तव्यं भणेत्यनेन सत्शेषणं एवमेवाभूनाहृश्यमानावस्थाय. जेनादिनावसानेनत्व त्वरणायोग्यमपाना
गंतव्यमिति दीप्त्यनेनाद्यैनास्थिरोनेत्यर्थः ६ अत्रवाच्येनेवेति सप्रश्नोत्तकथाकाइत्याशयः यथेह विहारेच्छायांवाकार्यार्थग्रहो
त्तरंप्रतीयमानायांशब्दस्यनव्यापारोविरतत्वात् अर्थस्यचव्यापारांतरासंभवाद्व्यंजनेवेतिभावः व्यज्यतइति स्वैरविहाराशीनीप्र
चेतिसामाजिकैर्व्यंजनयाबुध्यतइत्यर्थः प्रियानुनयार्थप्रहितांतमुपभुक्तागतां दूतींप्रतिनायिकाआह साहंतीति सापयंतीस
खिस्तुभगं कृणे १२ नास्मिन्समकाले सद्भावस्नेहकरणीयसदृशं तावद्विरचितंत्वया ममकृतेमदर्थं सुभगं सुंदरंतेनायकं सापयंतीस
न्तुनयंतीत्वं कृणोदपतिकृशांगनासि रक्तासि व्रणानावत एवं सद्भावः साधुत्वंस्नेहः माहितयस्तयोः करणीयंकार्यंसदृशं उचि
तं तथाच सद्भावस्ययत्कार्यं स्नेहस्यचयदुचितं तद्विरचितमित्यर्थः तेपनयव्याख्याति सद्भावस्नेहाकरणीयसदृशमिति काचि
त्तुसद्भावस्नेहकरणीयविसदृशमिति पाठः तदासो केताभ्यां यत्करणीयंतेनसदृशं कार्यं त्वयाविरचितमित्यर्थोवोध्यः परंत्वत्रा
मपुरुषः लंकृणामूलीभूतगाधस्य दृष्टिमुपस्थितयेसद्भावस्नेहकार्यंकृतमित्यस्यैववक्तुंयुक्तत्वादितिदिक् ममसान्निध्यादे
तद्व्यंजनानंतरमपिनविरोधप्रतीतिः ग्रामसमशनि कुंजगमनयोरविरोधादितिदीपिकायांस्पष्टं अन्नापकारिणामिति राम०
ज्ञानायकारिणामित्यर्थः मास्मियरमणेनेति इदंनलक्ष्यांतर्गतं किंतु प्रतिपाद्यमरत्नौ वैशिष्ट्यबोधनद्वाराव्यंग्यप्रकरणायोक्तं ज्ञा ९

म. ३

प्यत्वं तृतीयार्थः तेन चेति लक्ष्यवाक्यार्थेनेत्यर्थः लक्ष्यघटितवाक्यार्थो लक्ष्य एवेति भावः प्रकाशनं व्यंग्यमिति · कामुकविषयसा
पराधत्वमेषा प्रकाशयतीति मन्दस्य दैवं जनयागमस्य तइति भावः उअ इति पश्येत्यर्थः व्याख्यानं तु अ इति · पश्य निश्चलनिस्पंदा बिसिनीप
त्रे राजते बलाका · निर्मलमर कतभाजनपरिस्थिता शंखशुक्तिरिव · कस्याश्चिन्नायिकाया उपनायकं प्रतीयमुक्तिः · बिसिनीप
त्रिनीलता · चलनं शरीरक्रिया · स्पंदस्त्ववयवक्रिया · स्पदि किंचिच्चलन इति धात्वनुस्मरणात् कर्मधारयसमासः तेन तत्कर्मधारयेति · ना४
यद्वा निश्चलजनशंकया विहारव्यापारनिरुद्धो गतिका मुकसंबोधनं यन्निश्चला अचला एच्यति द्विनिस्पंदेत्यर्थ इति तत्र अचला
पदस्यैव तत्र प्रयोगात् · ए व्यालाचकस्मान्नित्यस्त्रीलिंगत्वेन भाषितपुंस्कत्वाभावात् नेवद्भावाउपपन्नेश्च · मरकतो नीलमणिः भाज
नं · पात्रं · शंखशुक्तिः शुक्त्याकारं शंखघटितं पात्रं · अत्र चाचेतनोपमया लेशतोपि क्षोभाभावः तेन निर्जनत्वं गम्यते केचित्तु नायिका ना६
या विरहवेदनां कामुकं प्रति निश्छंनिवेदयन्त्यास्सख्या इयमुक्तिः निस्पंदासा नायिका बलाकाया तुल्यातिशयाननत्वेनाध्यवसिता बि
सिनीपत्रे तापापकर्षितारा जते · अत्र निश्चलत्वमस्मेति कामुकसंबोधनमेव अचेतनोपमया निश्चेष्टत्वातिशयो व्यंग्य इत्याकूः
८ संयोगवाहिप्रलंभस्यमधुरत्वेन तत्र योजयति अथवा निस्पंदे · अतो नेति · अभिधया प्रतिपादयतीत्यर्थः वैयर्थ्यं स्पष्टमेव · इदं वेश्या
यामिति · पदघटितः संकेत इत्यभिमानः इतरस्माल्स्वरसा दाहास्यशृंगारादिवर्गो इति · माधुर्यादिनिरूपिंगा चकत्वापत्तिरिति भावः ॥ ता२
चेष्टातिव्याप्तिस्तु विशेषत्वतया शङ्कनिवेशाद्वारणीयेति बोध्यं · विषयः देशः तत्रेति · तदीयसंकेत इत्यर्थः अयं चव्यवहितसंकेतत्वादि

का॰टी॰ तिपाठः संकेतसत्वादिति पाठे तत्र तेषु पदादेशो इत्यर्थः व्यवहितत्वं च शाब्दसंकेतग्रहप्रयोज्यग्रहाविषयत्वं सत्वे षं हृच्छविशेषः स्वेतत्
१० पदाद्बोध्यः तद्योगी देशश्च तत्पदाद्बोध्य इति लक्षणायै वेति नन्वत्र च्छेदे पि यथा कथंचित् शक्यसंबंधी स्त्येव नादृशसंबंधलक्षणाप्र
10 योजकत्वादिति भावः वाच्यार्थेति द्वितीयवाच्यार्थ इत्यर्थः यस्य शब्दस्य यद्वेति कालेइतिशेषः अभ्यंशादौ वाचकत्वस्येति २१
नतज्ञाति व्याप्तिर्नशंक्या अन्यथा वाच्यव्यंजकतायामप्य इत्यादेरुदाहरणत्वापत्तेः संकेतो गृहीत इति इह्नो गृह्यते इत्य यद
र्थ इति पदत्रये इत्यादिः साक्षात्संकेतग्रहप्रकारेण यदा यदर्थ इति पाठे इति फलितोर्थः संकेतपदेन च शक्तिग्राहकः समयः सचा
६७५ स्मादयमर्थो बोद्धव्य इत्याकारः अस्मायं वाच्योऽस्मायं वाचको यं समयमित्यादिशब्दप्रयोगरूप इत्यादिमञ्जूषायां इति पाद्ते अत्र वा
चकव्यवहारविषयत्वं लक्षणतावच्छेदकमतो न लक्षणतावच्छेदकलक्षणयोरभेदः ननु लक्षणास्थले तत्तत्पदात्तत्तदर्थो बोद्धव्य
इत्यादिः संकेतस्य वनास्ति शक्यसंबंधेनैव तद्बोधात् एवं च तद्भावस्यर्थसंकेतविशेषणं साक्षात्पदं व्यर्थमित्यरुचेराह वस्तुतस्त्वि
ति संकेतितमिति तु साक्षादेव माधुर्यादिव्यंजके स्पर्शादिवर्णेति व्याप्तिवारणाय अनेनैव चैतत्पादियोगि देशबोधकचैत्यादिप
देनातिव्याप्तिः व्यवधानाभावादिति गंगादिपदादपि साक्षात्तीराद्युपस्थितिरित्यभिमानः इत एवारुचेराह स्पर्शादीति वस्तुतो न
च संकेतितपदं वैयर्थ्यमित्यादि स्पर्शादिवर्णानां साक्षादेव माधुर्यव्यंजकत्वाच्चेत्यं तद्योगेऽथो वक्ष्यमाणके स्तुन हह शब्द्यते लक्षणापत्ति राम॰
रिति इतरा चेतेश शक्तौ इतरत्वेनतीरस्यापि भानादित्यभिमानः विशेषणमिति अभिधानक्रिया या इत्यर्थः साक्षात्वे तरप्रतीत १०

व्यवधानेन ज्ञायमानत्वं· शृंगारादिव्यंजकत्वादिति· तद्गतमाधुर्यादिव्यंजकत्वादित्यर्थः अतो न पूर्वापरविरोधः व्यंजकतादशायामिति·
तद्बोधके शब्दे इति शेषः· शेषेति· अभिधत्त इतीत्यर्थः जात्यादिरिति· आदिना गुणक्रियासंज्ञाः योग्यार्थो व्यक्तावेवेति नयनानय
नाद्यनुमितत्वतद्बोधाचरणहेत्वानुमितस्वजनकव्यक्तिज्ञानजनकत्वानिर्वाहकशक्तेः सा ज्ञानविषयव्यक्तावेवाभिहितस्वाचितेति भावः आ
नन्त्यादिति· तथा च शक्तिग्रहासंभव इति भावः यतोगृहीतेति न हि विषयकशाब्दबोधे सामान्यतो गृहीतसंकेतपदज्ञानं कारणमिति सं
गीकारे इत्यर्थः न हि विषयसंकेतवत्पदज्ञानं कारणमित्यंगीकारे त्याह· किं चेत्यादेति अभिधाया व्याप्तिः कृतथा कार्यकारणभाव
स्य व्यक्त्यमशक्यत्वात्तत्र संकेत एव नेति भावः व्यक्तावेव शक्तिरिति पक्षे दूषणांतरमाह अपि चेति· विशिष्टशक्तो जात्याद्युपलक्षणीकृ
तव्यक्तौ शक्तिरिति पक्षे च नागृहीतविशेषणान्यायेन व्यक्तौ शक्तेर्जात्यादौ तदवच्छेदकत्वस्य चास्वीकारे गोरेव गवा च विशेषणमेव
सोचितेत्याह तस्मादुपाधावेवेति· विशेषणे जात्यादावेवेत्यर्थः व्यक्तिबोधस्य तु व्यंजनया निर्वाहः संज्ञिवेशितः संकेतसंबंधेन
तत्तद्धर्मिणि स्थापितः नामरूप इति· डित्थडपित्थादिशब्दरूपः संज्ञाशक्तादेव च प्रागुक्तरीत्या संज्ञाविशिष्टधर्मिबोध इति बोध्यं
कदाचिदपेत्यपीति पाके नरंजनेन च वर्णांतरकरणे इत्यर्थः गोःस्वरूपे गो इति· अज्ञातगोत्वके न धर्मिस्वरूपमात्रे गोत्वर्थः त्वाप्यगो
व्यवहारस्येति· अभावज्ञाने प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य कारणत्वादिति भावः गोत्वाभिसंबंधात्वेति· एवं च याव
द्गोव्यवहारं तत्रापि डे गोत्वस्य सत्तास्मरणाप्रदत्वमिति भावः विशेषाधानहेतुरिति· गत्वं च यावदाश्रयास्थितिसंबंधकमित्यन्वेसानि डु व्यक्ति

यावत्कालं आश्रयस्य स्थितिसंबंधो यस्य ---- स यावदा
श्रयस्थितिसंबंधकः

पूर्व४ कोमावर

का॰टी॰ याप्यत्वं · साध्यास्विति · साध्यत्वेन विवक्षितः तदेव दर्शयति · पूर्वापरेति · येष्वधिकरणाद्यवयवकारकाणां तद्व्यापारसमूहो हि पाकक्रिया ·
११ तेन सर्वं प्रागभावेष विषयत्वं सर्वेषां सेधनत्वं · कस्यचिद्वर्तमानेतरत्वं · एवं च भासमानपौर्वापर्यकावयवकत्वसमानाधिकरणो धर्मविशेषः
साध्यत्वमिति फलितं · क्रियारूप इति · धातुवाच्य इति यावत् तथा च पचादीनां क्रियायां शक्तिः किंचित्प्रकाशितमिति · अल्पावयवा
वच्छेदेन चक्षुःसंनिकर्षे पटस्येवेत्यर्थः अन्त्यवर्णेति · पूर्ववर्णानुभवजनितसंस्कारसहकृतयेत्यर्थः निःशेषत इति · सर्वावयवावच्छे
देन तत्संनिकर्षे संपूर्णपटस्येति भावः घटपदवदिति · मतांतरसिद्धस्य व्यतिरेके दृष्टांततेति बोध्यं वर्णक्रमशून्यमिति वर्णक्रमशू
न्यमित्यर्थः यथा पटश्रुत्स्त्रेन तं तु क्रमभानं नहीत्यर्थः एकः पट इतिवदेकं पदमिति व्यवहारात् स्फोटाख्यः स्वीक्रियत इत्यर्थः तदाहुः
स्फोटाख्यमिति · एतेन नानावर्णात्मकत्वव्यवहितोच्चारणत्वादिकमघटितपदस्य शक्ततावच्छेदकत्वे गौरवमानंत्यं चेत्यपास्तं यदृच्छयेति ·
डित्थादिपदं डित्थादिनामविशिष्टतत्तदर्थबोधकं भवत्वित्याकारयेच्छयेत्यर्थः यदृच्छाकल्पितत्वाच्च यदृच्छाशब्द इति व्यवहारस्तदाहुः
यदृच्छात्मक इति अयमेव संज्ञाशब्दो द्रव्यशब्द इति च व्यवह्रियते अथ वर्णज्ञानस्य शब्दबोधे हेतुत्वं गोकाराद्यनात्म अयः इति बोध्यं चंडी
दासइति · अंत्यवावच्छेदं · तत्र · स्वलक्षणां धर्मिस्वरूपं बुद्धा · तद्वारा · निर्गलितं यस्य शब्दरूपस्य शब्दज्ञानेन धर्मिप्रत्यायनात् गवादिपदे
हि विशेषणाप्रतीत्यनंतरं व्यक्तिप्रत्यय इति क्रमः तत्फलं · आह तेषु धर्मिप्रत्यायनादिति भावः उपाधित्वेनेत्यस्य व्याख्या पदार्थोपस्थितत्व राम॰
क्लृप्ततयेति · संकेत्यते केवले धर्मिण्येवेति शेषः तदेवाह उपाध्यंतरमिति · पदान्निर्विकल्पकं तु आकाशपदादाविष्टमेव · अत एवास्य द्व्य ११

शाब्दत्वेन व्यवहार इति तद्भावः यद्वाऽत्रत्वं अंत्यवर्णोपरत्वस्य स्वेदाग्रात्वंः स्वलक्षणं शाब्दरूपं यस्यार्थस्य बुध्याज्ञानेन निःशेषतः स्वरूपतो
र्थ तस्यग्रात्यं अर्थबोधकं हि पदस्वरूपं पद्यते बोध्यत इति व्युत्पत्तेः तादृशं डित्थादिपदानां स्वरूपं स्वेन रित्यादिपदेन रूप्यते बोध्यत इत्य
र्थ रूपं तत् डित्थादौ अर्थे च पदार्थोपस्थितिस्तु अकल्पतया स्वात्मकस्वरूपसंबंधेन तत्तदवच्छेदकतयेत्यर्थः तत्र भाष्ये ति किं च पदरूपे पंजेता २३
दित्यर्थे सर्वेषामेव शाब्दज्ञानं स्वज्ञानव्यवहारार्थज्ञानजनकत्वात् अर्थज्ञानानंतरमेव स्वरूपतोऽर्थतो बोधात्वे स्वरूपशब्दस्य शाब्दज्ञानार्थशक्त्व
भावात्त्वं अपि च वक्रवीक्षे बुद्धिनिर्ग्राह्यात्मकमिति स्यात् विशेषणत्वात् किं वाद्यव्याख्या या प्रत्युपाधितत्वेनेत्यसमंजसं सर्वेषामेव श
ब्दानां तथात्वेनास्यैव लक्षणपातापत्तेः पदकृत्येपि लक्षणापत्तेश्चेति दिक् तत्र डित्थादिपदं डित्थादिपदवाचिशक्तमित्याकारकः श
क्तिग्रहः गुणगुणिनोरिव वाच्यवाचकयोरपि तादात्म्यांगीकारस्यावश्योपपत्तिः चतुष्टयीति उपाधेर्विशेषणस्य चातुर्विध्यादित्यर्थः
प्रवृत्तिरिति त्यस्य अवाचेति शेषः प्रवृत्तिः प्रवृत्तिनिमित्तं परमाणवादीनि आदिना परममहत्त्वसंग्रहः परमाणुशब्दः परिमाणवि
शेषत्वहेतिवं शुक्लत्वं तुल्यादिशब्दानामिति तन्निष्ठविवक्षितीनां भेदे तदनुकूलव्यापाराणामपि भेद इति भावः कारणभेदस्य कार्य
भेदनियामकत्वादित्याशयः उक्तदोषः आनंत्यव्यभिचाररूपः भेद इवेति प्रत्यभिज्ञालक्षणादिभिः शुक्लादीनामैक्यसिद्धौ भेदप्र व्याघ्रवादि भिः३
ती तिराश्रयभेदोपाधिकी तत्संबंधस्येव च नाशोत्पादाविति भावः आलंबनं प्रवृत्तिविषयः प्रतीतेरिति अबाधिततारतम्यप्रतीते
स्त्यपि बोध्यं अनुगतः एकाकारः प्रत्ययस्तदभिधानं स्यादुपलक्षणं अभिधानं शब्दव्यवहारः सर्वं अनुगतप्रत्ययाभिधानाभ्यां

मतेद

का·टी· शब्देष्वपि भेदस्य शास्यतयोपमानत्वायोगात्सादृश्यग्रहेति · सर्वेष्वेव वाच्यो विभेति पाठः भाष्यकारीत्यादित्यादिशब्देषु शब्दस्य वाच्यत्वा
१२ दितिभावः शक्तोनोपाधिरिति · किं तु निर्विकल्पकबोधइतिभावः तेषां मते इति · धर्मिमात्रस्य तत्तबोधोपयोगीकरणात् मतेज्ञाते वीर्यावि
षयत्वादितिभावः आकाशादिपदानां चेति · एकव्यक्तिमात्रवृत्तिज्ञात्वं नंगीकारादित्यर्थः आनंत्यव्यभिचाराभावेन व्यक्तावेव श
क्तौचित्यादितिभावः चिंतावीजं तु जातिपदमखंडोपाधिपरं तेनाकाशत्वाभावत्वादिपरिग्रहइति · जातिरेवेति पक्षे स्वाश्रयाश्र स्वाश्रयाश्र ४
यान्यतरस्यैव बंजनया बोधस्तात्पर्यवशादिति न दोषः न चानुरूपादिति तथा सति व्यक्त्यानुपस्थितत्वेन शाब्दबोधविषयत्वानुपपत्ति
रितिभावः सर्वत्रसौकर्यादिति संकेतग्रहस्येत्यर्थः अनुगमाभावादिति कृताभंगवादिनो स्थिरसामान्याभावादित्यर्थः प्रकृता सः ८८
नुपयोगादिति उपाधिशक्तौ हि विशेष्यस्य वाच्यत्वसंभवान्नस्वरूपतोपयोगि नैवमुपहितशक्त्यादिमतमिति भावः अभिधारूपो व्या
पारइति · ज्ञायमानवृत्तेर्व्यापारत्वमित्यभिमानः सोभिधेत्युच्यतेइति एवं च संकेतितार्थबोधजनकव्यापारत्वमभिधालक्षणम् · मु
श्रोत्र ४ ख्यत्वेति · तत्रमुख्यः तत्रमुख्यइत्यनेनेत्यर्थः कारिकायां संकेतग्राह्यः शक्यारव्यपदार्थान्तरमभिधातात्पर्यं शब्दार्थयोस्तादात्म्यमभि
क धेतिमीमांसकपातंजलमतमुपनिबद्धमिति बोध्यं पातंजलमतं वैयाकरणसिद्धांतमंजूषायामस्माभिर्निरूपितमिति · तदाधश्च रः
सरेति · अस्य मुख्यत्वेऽपि तदभावे ... अयथार्थमित्यर्थाल्लभ्यते · लोकेऽपि ग्रामे कस्यचिन्मुख्यत्वे तत्कृतेतदभावे गौणाग्र्यत्वात्तिनद्योगो राम·
प्रयोजनादिति · प्रयोजनाभिसंधेरित्यर्थः प्रयोजनाभिसंधिपूर्वकं लाक्षणिकशब्दप्रयोगे वक्तुः प्रवृत्तिर्भवतीति तल्लक्षणाश्च यो १२

नभा २ स्मा १ शक्यार्थयोगे २

जकत्वं बोध्यं व्यंजनायां तज्ज्ञानस्य बोधे। शक्तिस्मृताविति। शक्तेः शक्यार्थादन्यत्राविरतिभावः। सम्बन्धमुख्यार्थसंबंधेनेति न योगाइ
त्यनेन तद्द्वारा हेतिः। योगस्य च हेतुमिति। प्रागृहीतसंबंधेन पुंसा तेन संबंधेन ततदादिस्मृतौ पश्चात्तेन तात्पर्यग्रहे लक्ष्यार्थबोधः अनुपपत्तिप्रति
संधानस्यापि तात्पर्यग्रहप्रयोजकत्वाद्बोधः। गुणीभूतेति। कारकविशेषकबोधकत्वे इदं। क्रियाविशेषकबोधकत्वे तु न कश्चिद्दोषः
तेन शक्यसंबंधेनेति। तज्ज्ञानहेतुकेत्यर्थः। पदार्थशक्यबोधे प्राक्यसंबंधमिलक्षणास्मिति रीतिमतं। प्रतिपादनं चेति। स्वार्थाभिधाने लक्ष्
द्देतेकरणाल्लुडंतेना। आरोपित एवेति। स्वहेतुसंबंधप्रतियोगिशक्यत्वसंबंधरूपपरंपरया शक्यनिष्ठत्वमात्रेणारोपितत्वात्। उक्तेः वक्त
तत्वेति साक्षात्संबंधेनेत्यर्थः। सांतरार्थनिष्ठ इति। साक्षादर्थनिष्ठः सांतरा परंपरया शक्यनिष्ठ इत्यर्थः। विभक्त्यर्थान्वये प्रकृतिप्रयोज्यो
पस्थितिर्हेतुर्विभक्त्यंतस्यैव वा लक्षणेति न दोषः। विवेचकत्वमिति। तद्रूपं सादृश्यमित्यर्थः। विवेचकत्वं च सतोऽग्रहणमसतः परित्याग
रूपं कुशग्राहिणि दक्षे च वर्तत इति भावः। कर्मणि कुशलः। लावण्यं। मंडपः। कुंडलमित्यादौ दक्षत्वादेः प्रवृत्तिनिमित्तत्वात् मुख्यत्वे
निमित्तस्य च महतिरस्थ प्रतीतेर्बाधप्रतिसंधानेन विनापि तत्प्रतीतेस्तु। कुशेः कलेर्विकुशलपदस्य वैयाकरणोक्तसाधनाच्चरूढिशक्तिरे
वास्तेति केचित्। इत्यस्वरसादाह तैलाणीति। एवं तैलपदस्यापि तिलविकारत्वेन शक्तस्य सार्षपे निरूढलक्षणा। घोषमाभीरपल्ली। स्वार्थ
तरसंक्रमितवाच्यमुख्यादिव्यवस्थायै लक्षणां विभजते। लक्षणेति। तेपीति। उपादानलक्षणालक्षणेत्यर्थः। तत्रोपादानलक्षणारोपा
यथा कुंताः पुरुषाः प्रविशंतीति साध्यवसानाया यथा कुंताः प्रविशंतीति। कुंतान्भोजयेति च। लक्षणालक्षणा तु तदुदाहरिष्यते गंगायां

लवणं सैंधवादिलक्ष्यं वः

का·टी· वेतिबोध्यं लक्षणावाचकपदसत्तामात्रेणारोपाध्यवसानव्यवहारइतिबोध्यं स्वार्थपरित्यागस्तुविशेष्यान्वयिनान्वयित्वं·स्वार्थप
१३ रित्यागस्तु तस्य उपस्थितिसत्त्वेपि शाब्दबोधेऽप्रवेशमात्रंअपित्वाक्षुः शक्याहेत्निलयेति·तादृशस्यभेदघटितत्वादितिभावः तादृशसंबं
धप्रयुक्तलक्षणायाएवगौणीत्वादिति साधारणधर्मप्रकारेणेत्यादिः अस्मिंभवत्प्रवेशः अस्मिंभवव्यवेशान्वयः तस्मिंहृदयेस्यावशक्या
र्थास्यप्रवेशान्वयासिद्धये· कुंतसंयोगित्वंलक्षणात्वबोधकंअन्तिगाहनत्वप्रतीतिः प्रयोजनं·यष्टीः प्रवेशयेत्यत्रवक्तात्पर्यविषयीभूत
भोजनाद्यर्थप्रवेशान्वयानुपपत्तिर्दृष्टान्ता·कुंताःप्रविशन्तीति· अन्येइतिमंडनमिश्राः स्यादितीत्यनेनमुख्यार्थबाधस्तवनं अ
वच्छेदकतया·स्वनिष्ठपरिच्छेदकतानिरूपकत्वेन· अनेनलक्षणामूलयोगप्रदर्शनं·कथंचित्·परंपरया· स्वावच्छिन्नत्वरूपया·स्वा
न्वयसिद्धये: स्वस्यानुबंधान्वयसिद्धये· नाश्रहीतेति· एवंचलाघवाज्जातावेवशक्तिरितितद्भावः आक्षेपादेवेति· आक्षेपोत्रलक्षणा·
त्तीयेति· तृतीयत्वंलक्षणाहेतावत्वेति: लोकप्रसिद्धीति· लक्षणार्थेनविनाकृतेशक्यार्थेप्रयोगोयस्यतादृशपदेयत्त्वस्वार्थबोधक
प्रयोगवाहुल्यंतारूढिर्यथादेशमात्रेप्रयुक्तस्यकलिंगपदस्यतद्देशवासिषु·गंगादिपदस्यतुव्यक्तिंविनानकापिप्रयोगइतिभावः
जात्याक्षेपादिति· आक्षेपोत्रानुमानं·व्यक्तिंविनेत्यनेनव्याप्तिर्दर्शिता· इतिप्रयोज्योपस्थितिस्वशाब्दबोधेकारणं· व्यंजनावाक्षेपः
यथेति· क्रमितः शाब्दयागुणत्वात् सविषयाकृतित्वादिनुमानेनतयोर्लाभइतिभावः श्रुतार्थापत्तेरिति·श्रुतेशब्दःतत्कल्प गम०
कार्यापत्तेरित्यर्थः अनतशाब्दान्वयबोधानुपपत्त्योशब्दकल्पनंश्रुतार्थापत्तिः अर्थापत्तेरितिः प्रत्यक्षादिनाप्रमितस्यदिवाअभोजि १२

13

13

संबंधिपीत्वस्य तद्भिन्नाऽनुपपत्तेरितिभावः घोषाधिकरणत्वासिद्धयेइति तदनुपपत्तिइयेइत्यर्थः त्वार्थत्वशाक्यं। स्मर्पयंति। तंपरित्य
ज्यअन्वयबोधानंगमुपस्थापयंति ततैववर्न्नेते। तद्विषयमेवबोधंजनयंतीत्यर्थः मुख्यैवेतिव्याचष्टे। उभयेति। गौणीभेदः साध्यः उपचा
राभिन्नत्वे हेतुः नचोक्तयोरिति शाक्यभेदप्रतीतावपिभेदस्थागतंतामानीतिभावः मुख्यायाः उक्तद्विविधायाः। भिन्नातः गौणीजः भे
दप्रतीतिरिति। भेदमात्रप्रतीतिरित्यर्थः एवंहिगंगातटेइति। गंगाशैत्यपावनत्वतरत्वादिविशिष्टगाहबोधत्वमेवतन्निरामकमस्याकि
मभेदप्रत्ययेनेतिनव्याः गंगादिशाहैः गंगादिबोधकशाहैः तत्वेति। गंगात्वेत्यर्थः तच्चव्यंजनेइति। बाधितार्थबोधकतयैवतस्याधर्मि
शाहकमानसिद्धत्वादितिभावः व्यंजनायांबाधस्याप्रतिबंधकत्वेसंमतिमाहवस्तुतिहीति। द्वितीयमपिनयुक्तं षष्ठीरित्यस्यगंगा
यामित्यस्यविशेषाभावाच्चेतिदिक् सामानाधिकरण्येनोक्ताविति। समानविभक्तिकपदोपस्थाप्यत्वादभेदसंसर्गिकान्वयोगणदुक्ता
वित्यर्थः तदाहशद्वप्रतिपाद्यादिति एवंचतदन्वयेबाधात्लक्षणाप्रसङ्गइतिभावः विषयतावच्छेदकरूपेणशाद्वजन्यविषयप्रतिपत्तिका
कीविषयिणोऽसाधारणधर्मादिप्रकारिकोपस्थितिः साध्येत्यर्थः एवंसाध्यवसानातथाविषयप्रतिपत्यकालिकीतिबोध्यं मुख्यत
इति। शक्यागोत्ववदर्थप्रतिपादकत्वेइत्यर्थः लक्षणायावाहीकरूपार्थप्रतिपादनेतुलक्षणायोपस्थितंगोवृत्तिजाड्यादितथाप्रवृत्ति
निमित्तं। उच्यतइतिशक्याबोध्यतइत्यर्थः अशक्यस्येति। जाड्यस्यलक्ष्यत्वात्वाहीकेसंकेताविरहेणतस्यगोपदाशक्यत्वाच्चगोवृत्ति
जाड्यस्यतद्वृत्तित्वाच्चेतिभावः शक्यत्वेइति शक्यवृत्तित्वप्रत्ययत्वादावतिप्रसंगवारणायशक्यत्वेइति। व्यक्तिमात्रबोधकाकाशादिप

टि२

प्रवृत्तिनिमित्तं गोत्व जाड्य रूपधर्मद्वयेन गोशब्दोऽर्थवाहीकेप्रवर्त्तते इत्युक्तम् गोशब्दार्थवाहीकमादाय
प्रवृत्तिनिमित्तत्वं कृतं तन्नसंभवति। अभिमत गोशब्दार्थवाहीकवृत्तित्वाभावात्प्रवृत्तिनि
मित्तस्यदूषणतां संपन्नो १

ति१

का॰टी॰
१४
14

द्वोध्याकाशादिव्यक्तावतिप्रसंगवारणाय शक्यवृत्तित्वे इति नचतत्र स्वभिन्नशक्याप्रसिध्या तृतीयदलाभावः स्वभिन्नशक्याधिकरणं
यद्यत्तद्भेदस्यैव विवक्षणात् क्वचित्सूत्रादावाकाशपदसंकेते तत्प्रसिद्धेश्च। अवयवसंयोगेन रूपाकृतेरपि शक्यत्ववादिनां मते तत्रा
तिव्याप्तिवारणाय वा तत्। अवयवभूतद्रव्यातिव्याप्तिवारणाय शक्यानधिकरणत्वे इति। तस्य शक्यत्वेऽप्यवयवे रूपशक्यवृत्तित्वेस
त्यप्यवयविरूपशक्याधिकरणत्वात्। प्रमेयपदप्रवृत्तिनिमित्ते प्रमेयत्वेऽव्याप्तिवारणाय स्वभिन्नेति प्रमेयत्वस्यापि प्रमाविषयत्वात् येन
संबंधेन शक्यवृत्तिता तेन संबंधेन स्वभिन्नशक्यानधिकरणत्वस्य विवक्षणादेकार्थसमवायेन सत्पदशक्ये कत्वस्य तत्पदप्रवृत्तिनिमित्तस
त्तायां सत्त्वेऽपि तत्र नाव्याप्तिः प्रवृत्तिनिमित्तपदेन च प्रवृत्तिनिमित्ततत्समनियतधर्मभिन्नत्वविवक्षणात् तेन प्रमेयत्वे स्वभिन्नवाच्यत्वसत्त्वे
ऽपि न क्षतिरित्यन्यत्र विस्तरः। अभिन्नतयेति। साजात्येनैवेत्यपि बोध्यं गुणादेवेति न गुणिन इत्यर्थः तेषां वाहीकशब्दादेव लाभादिति भावः
अनुपपत्तेरिति। न च जातिशक्ताविवानुमानसहकृतपदेन व्यक्तिबोधात्रानुपपत्तिरिति वाच्यं। अन्वयानुपपत्त्या प्रसरंत्या लक्षणाया
साक्षादन्वययोग्यार्थबोधकतैवोचितेत्यभिप्रायात् अभिधेयाविनाभूतेति अविनाभावः संबंधः तद्वृत्त्या लोके धर्मिण्येवेति तदाशयः
एतेन गौणी अतिरिक्ता वृत्तिरित्यपास्तं। लक्ष्यमाणगुणैरिति। लक्ष्यतावच्छेदकैरित्यर्थः गुणाल्लक्ष्यतावच्छेदकीकाल्लक्षणा गौणी
ति भावः प्रतीतिरिति। उपस्थितेर्लक्षणात्वे भावे क्तिन प्रत्ययान्तेत्वकरणे इति बोध्यं तेनैव। यदि योग इति तद्द्वारकोपादियोग इत्यर्थः आ रामं॰
क्षारयति प्रसर्वदुरित्यादौ धर्मत्वेनैव हादिवृत्तिधर्मस्य लक्षणाप्रयोजनत्वं। धर्मत्वेन चैतन्यासत्त्योपरिधर्मस्यैव भानमित्याह दशाविशे १४

टि॰

राम

ति॰ क्रोशानविशेषे १

षैरित्यर्थः आक्षेपादेव व्यापकप्रतीतिरिति आक्षेपोऽनुमानं तथा च शाब्दसहकृतानुमानेनोपस्थितेऽतदादौ घोषाधिकरणत्वान्वयः आयु
र्घृतमिति आयुरत्र दीर्घकालजीवनं॰ जनकत्वसंबंधः स एव च लक्षणावच्छेदकं॰ भेदे पि ताद्रूप्ये ति॰ भिन्नधर्मप्रकारकोपस्थिता
वपि माहात्म्यातिशयमहिम्ना ताद्रूप्यप्रत्यय इत्यर्थः तत्र प्रथमतो जड्गावोरेकशाहृतो ध्वनया ऽभेदप्रतीतो व्यंजनया वाभिन्नज्ञदा
भेदस्य वाहीके प्रतीत्या तदुपपत्तिः वक्ष्यतो लक्षणया माहात्म्यबोधे तन्महिम्ना गोत्ववाहीकत्व ॰ःसर्वथैवेति॰ वाच्यार्थबोधे ला
यामपि शाब्दभेदकधर्मानुपस्थितेरिति भावः एतेन मुख्यार्थबाधज्ञानविषयाभेदस्योपस्थितेः स्फुटेति परास्तं॰ एवं च गङ्को
रञ्जनत्वारोपे शुक्लत्वेनैव वाहीकत्वेन तदनुपपत्तिरेवेति बोध्यं अव्यभिचारेणेति कारणे कार्यस्याभेदग्रहे सति व्यभिचारसंभाव
नासंभवे न सारोपायां नेदं प्रयोजनं॰ साध्यवसायां त्वभेदतिरस्कारात् अभेदग्रहेणाव्यभिचारसंक॰त्प्रयोग इति भावः लक्षक
गतधर्मप्रतीतिरेव प्रयोजनमिति तत्रोक्तं॰ उपकृतमित्यादौ व्यभिचारात् कथित्प्रयोजकत्वेनेति॰ इदं पूजाप्रयोजके तत्प्र
योजकत्वव्यवहारो गौणः स्थूणास्तंभः अयमात्रैव इति॰ अवयववृत्तेः जपवात्र याणीति मते अवयवान्तरव्युदासाय मात्रपदं तत्रे
ति॰ इदं जातिविशेषावच्छिन्ने रूढं षोढ्वेति शुद्धा गौणी सारोपा साध्यवसानोपादानलक्षणेः षड्भेद इत्यर्थः एवं चेति पौ
नरुक्त्यप्रसंगेनेत्यर्थः अनालोचनेति एवं तु शुद्धाभ्यां गौणाभ्यां उपादानलक्षणास्वरूपभेदग्रहाभावबोधनेन लक्षणानां त्रयस्य रूढि
प्रयोजनवत्त्वभेदकथनेन तेन न विरोधस्यापृक्तत्वादिति भावः व्यंजनकृतमिति॰ लक्षणायास्तत्फलकत्वादिति भावः तत्रादितरेति॰ सह

का·टी·
१५
स्पं·२
15

स्यास्तद्दर्शयत्यर्थः मुखमिति इदं लक्षणामूलध्वनेरुदाहरणं · इंदुवदनायाः स्तनौ शरीरेण तरुणिम्न उद्गमस्याविर्भावो मोदते · स्फीतो
भवतीत्यर्थः उत्कृष्टवस्तुसंबंधात्त्वयमप्युत्कर्षं प्राप्त इत्यर्थः प्रकृतेप्येवम् इंदुवदनातन्वया एवंविधनवयौवनजृंभणामित्यभिक
ष्टमापतितं विभ्र[illegible] भुवनजनस्य संवेदवेदितेति · स्फीतता वि[illegible] अनेकस्थानेऽनेकविधकार्यजननरूपं दर्शयति मुखमिति । यतो
मुखं विकसितं प्रहसितं स्मितं · स्मितं स्यात्संपादिताधर मित्युक्तलक्षणं हास्यविशेषरूपं यत्र तथाभूतं प्रेक्षितं · वशितः स्तोकः शान्तः वक्रिमा
तिर्यग्गामित्वं येन तथाभूतं · तया गतिः गमनं · समुकुलिताः । निरंतरप्रातिशयेन प्रादुर्भूता विभ्रमा यत्र तथाभूता · मतिर्बुद्धिः स्वकापरि
मितविषविषयत्विका · उरः वक्षःस्थलं मुकुलितो मुकुलाकारो ईषदुन्नतौ स्तनौ यत्र · जघनं करुमूलभागः श्रोणिबंधेनावयवानां दृ
ढबंधेन उद्धुरं । विलक्षणमिति योज्यं · यद्वा अस्मसंबंधो रतिबंधविशेषस्तत्र योग्यत्वं · तथा च साधारणास्मिता द्युन्मेषः स्फुटमेव यौवनो
द्गमभवगमयतीति भावः अत्र च विकासस्य पुष्पधर्मस्य स्मितेवशीकरणस्य चेतनधर्मस्य हर्षोत्कर्षगति विशेषरूपसमुच्छलनस्य
मत्तेर्द्दवधर्मस्य विभ्रमे संस्थायामर्यादायाः स्यागस्य चेतनधर्मस्य मतौ मुकुलितत्वस्य पुष्पधर्मस्य स्तनयोः उद्धुरत्वस्योत्कृष्टधुरावत्व
रूपस्य चेतनधर्मस्य जघने मोदस्य हर्षस्य चेतनधर्मस्य यौवनोद्गमे बाधितत्वाद्विकसितादिपदैरुपदर्शितपदार्थो लक्ष्यते तत्र वि धी ४
कासेन असंकुचितत्वसंबंधेन सातिशयत्वं लक्ष्यं · सौरभादिव्यंग्यः वशीकरणेन स्वाधीनत्वं लक्ष्यते अभिमतविषयप्रवृत्तिः संबंधः राम·
मुक्तानुरागित्वं व्यंग्यं · समुच्छलनेन वाक्चल्यं लक्ष्यते · प्रयोज्यप्रयोजकभावः संबंधः वक्कलं हि समुच्छलतीति सकलमनोहारित्वं व्यंग्यं · १५

संस्थापयामनेनाधीरत्वं लक्ष्यते॰ हेतुहेतुमद्भावः संबंधः सर्वैर्गुणैर्युक्ततया गुरुजनसंनिधौ प्रियतमे प्यंगीकृतमर्यादामतिरामीत॰ इदानीं
तु मोग्ध्यस्यागामित्वसूचनात्तु रागातिशयो व्यंग्यः मुकुलितत्वेन काठिन्यं लक्ष्यते निबिडावयवत्वसंबंधः कठिनेहितं भवति यद्वोद्भिन्नत्वं
लक्ष्यं॰ आलिंगनयोग्यत्वं व्यंग्यं॰ उद्धुरत्वेनयोग्यत्वं लक्ष्यते॰ भारसहनक्षमत्वसंबंधः रमणीयत्वं व्यंग्यं॰ मोदेनोत्कर्षो लक्ष्यते॰ जन्यजनक
भावः संबंधः स्पृहणीयत्वं व्यंग्यं॰ अनिर्वचनीयत्वमुत्कर्ष एवेति॰ विच्छायत्वादीनीति आदिना वक्रप्रतियोगिकसादृश्यपर्यवसितत्वस्निग्धश्या
मत्वस्फातिकटुत्वानि॰ श्रीपरिचयादिति॰ जडा अनभिज्ञा ऽपि जननाः श्रीपरिचयात प्रथमसंबंधः परिचयः तस्मादेव चतुरजनचरि
तानां ज्ञातारो भवंति नेत्रार्थी तरन्यासमाहरुपदिशतीति॰ कामिनीनां यौवनमदः स्वयमेव ललितानि उपदिशति तथा च विद्
ग्धजनचरितस्वरूपानभिज्ञानां नामभिर्विनैवोपदेशं स्वतः संबंधात्तदधिगमः तत्किं वक्तव्यं तत्स्वरूपाभिज्ञानां मदमिलाषुकाणां
उपदेशेन तद्विज्ञानमित्यत्रेति भावः ज्ञानानुकूलव्यापारप्रयोगरूपोपदेशकर्तृत्वस्य चेतनधर्मस्याचेतने यौवनमदे बाधात् सामान्यवि
शेषभावसंबंधेनाविष्कारमात्रं लक्ष्यं अनायासेन ललितादिज्ञानं व्यंग्यं॰ इदं च विदग्धाविदग्धवेद्यं॰ ललितं सुकुमारतया अंगानां विन्या ना
सो ललितं भवेदित्युक्तलक्षणलक्षितं अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितमित्युक्तलक्षणं वा॰ बहुवचनमाद्यर्थकं तेन विब्बोक नत्र
विलासादिहावसंग्रहः तथामरेण स्त्रीणां विलासविब्बोकविभ्रमाललितं तथा हेलालीलेत्यमी हावाः क्रियाः शृंगारभावजा इ
त्यादिने ष्ठहावपदवाच्यत्वं प्रतिपादितं॰ एतेन ललितानीति विभ्रमाणीत्यर्थः विभ्रमाललितं तथेत्यत्र इति भेदोक्तमयास्तं कोशस्यो

परंपरासंबंधस्तु स्वाश्रयनिरूपितलक्ष्यकत्वमिति ८

का॰टी॰ १६ 16 न्यतात्पर्यकत्वादित्याह्ः। लक्षणामूलाशब्दाख्यगुणीभूतव्यंग्यमिदं। भवत्यर्थासंगतिमाशंक्याह। आश्रयइति। अधिकरण
त्वाक्किंवत्तस्यतत्सत्त्वादाश्रयइत्यर्थादितिभावः लाक्षणिकशब्दप्रतिपाद्यत्वे च लक्ष्यस्यार्थस्य लक्षणामपार्थितउक्तमेवेतिवोध्यं। तत्प्रसिद्ध
त्वादिति। लक्षणायाव्यंग्यार्थफलकत्वादितिभावः आधातुं। जनयितुं समुदायस्यते। सत्त्वविवाचकशब्देन विज्ञायादृश्यते। वाभिस्य
त्वादेरिति। आदिनासंनिकर्षादिनाभिधासमवायाभावादिति। शक्तिरतिरिक्तः पदार्थस्तद्ग्राहकः संकेतइतिनसाध्याविशेषोहेत्वारि ग्र६४
तिवोध्यं। संकेतग्रहसहायेति। अभिधाग्राहकत्वमेवसहायत्वमितिवोध्यं तदर्शयन्नाह। स्वरूपसतीति। ज्ञाप्यार्थवाधएवतद्बीजंस्या
दतआह नाप्यत्रेति काकेभ्योदधीरक्ष्यतांवेवतात्पर्यवाधएवतद्बीजमतआह योगाइति। शाक्यसंबंधएवलक्षणाप्रयोजकइतिभा
वः पुरुषांतरमाह नप्रयोजनमिति। अनपेक्ष्येतिशेषइति। गंगाशब्दस्तटंयथावाधादिकमतपेक्ष्य प्रतिपादयितुमसमर्थंतथाप्रयोजनंने
त्यर्थः गंगादिशब्दः प्रयोजनांशेतदपेक्षोनेत्यर्थः प्रयोजनेऽलक्ष्यमितिभावः वैयात्यंवैतंडिकता। मूलक्षयेति। प्रयोजनपरंपरायां
लक्षणास्वीकारेपलक्षणप्रयोजनेविषयांतरसंचारादिनालक्षणानिवृत्तिस्तस्यापिमलक्षणानिवृत्तौ मूलभूतलक्षणाप्रयोज
नप्रतीतिरपिनस्यादितिभावः एतेनवीजांकुरादिवदनवस्थानदूषणमित्यपास्तं। मूलक्षयकारीचाऽनवस्था हिदूषणमित्युक्तेः।
अधिकस्यार्थस्येति। पावनत्वादिवेशिष्ट्यरूपस्येत्यर्थः प्रयोजनेनेति। प्रयोजनीभूतज्ञानविषयेणेत्यर्थः तथासतिलक्षणाजन्यज्ञा राम॰
नस्यैवफलज्ञानात्मकत्वात्तज्ज्ञानस्य लक्षणाजन्यज्ञानफलत्वंनस्यादित्याह ज्ञानस्येति। विषयाद्भेदस्त्वेवेति। एवंचोक्तसूत्रार्थस्यनत १६

बं॰ घे॰ न ४

त्फलत्वव्याघातकतेतिभावः सत्त्वघटोपादानमिति स्वरूपतोपादानघटक्रफलेघटादौ तद्विषयभेदासत्त्वाद्व्यभिचरितत्वमत्रार्थ
इति बोध्यं· वृत्तिविरोधइति स्वजन्यवृत्तीति विषयरूपे फले स्वविषयावच्छेद इत्यत्र नियमे विशिष्टज्ञानविषये तज्जनकविशेषणज्ञा
नविषयभेदासत्वेन व्यभिचारस्तेनापि बोध्यः तत्र न्यायमते संविन्निर्वैति अनुव्यवसायः प्राकट्येति मीमांसकमते· चक्षुरादीनां ज्ञा
घ॰ ४ नद्वारा विषये प्राकट्यजनकत्वमिति तेषां मतेऽपि जनकीभूत इति· विषयतासंबंधेन ज्ञानं प्रति तादात्म्येन विषयस्य हेतुत्वादि
५ ज्ञा॰ अविषयः तिभावः स च विषयो बोद्ध्य इति योगरूढ्यावस्थामित्युपपादितं ननु तज्जन्यमिति· स्वनिष्ठगतमित्यर्थः दोषानवकाश इति· तदु
क्तविकल्पत्रयुक्तदोषानवकाश इत्यर्थः न चिन्तितं शंकात्मसूत्र मते किंतु शाक्यसंबंधोल्लक्षणोतिस्व रव्याख्यान मते इति बोध्यं ल
क्षणाया स्वत्वतुपपत्तिप्रसारिताया इति पाठः ननु प्रष्टीः प्रवेशाये त्यादि वन्नाप्यर्थोनुपपत्तिरेव न हीज मात्मत्वेन स्माह यावितिः
पावनत्वं न लक्ष्यं किं तु तत्तटत्वादिव लक्ष्यतावच्छेदकं वा चा न चैतत्संभवतीत्याह यदि विशिष्टत्वमिति सामानाधिकरण्यसंबंधे
न गंगागतपावनत्वादिविशिष्टतटत्वमित्यर्थः संभवेदिति· बाधेन प्रत्यक्षात्मसंभवात्तदवच्छिन्नेशक्यसंबंधाग्रहादित्यर्थाति भा
वः भ्रमात्मकोऽपि शाब्दबोधो बक्तुमशक्यः बाधनिश्चयसत्वात् वांजनिकत्वबोधे बाधज्ञानं तत्र प्रतिबंधकमिति तन्त्रासे वा त्व
यानुपपत्तिरिति त्वाही कोन गौरिति बाधज्ञानस्य विरोधि [illegible] दर्शनविधया गगामिन्नजडो वाह्लीक इति वे[illegible]धोपि प्रतिबंधकत्वा
दिति भावः किंच वाह्लीकत्वविशिष्टे गवाभेदप्रतीतेः सर्वसिद्धायास्त्वावन्तापि लक्षणायोपपादयितुमशक्यत्वमिति व्यंजने वा वश्य

का·टी· १७ 17

मास्थेयेति बोध्यं केचित्तु लक्षणाहेतोः फलं तु लक्ष्यार्थबोध एव न तु पावनत्वादिप्रतीतिः तापि लक्षणाज्ञानस्य किं तु लक्षणया
तीरबोधस्यैव तत्फलमिति मूलेपि न दोष इत्याहुः लक्षिते लक्षणया बोधिते अतिरिक्तव्यापारेति शक्तिलक्षणयोः प्रागेव निर
स्तत्वात् लाक्षणिकस्यैव व्यंजकत्वमिति भ्रमनिरासायाह एवमिति मूले तदन्वयव्यतिरेकानुविधायि अभिधामूलमिति
अप्राकरणिकार्थविशिष्टोपस्थितिः शंकास्पदमपि नेति भावः अनेकाभिधानशक्तिरिति गृहीतानेकार्थप्रतिपत्तिजनकाने
कशक्तिमानित्यर्थः गृहीतद्वितीयाभिधाविषय एव व्यंजनास्फुरणात् तत्र द्वितीयाभिधाग्रहोपि नियामकः मुख्यार्थबाधा
द्यौ लक्षणेति भावः तदभेदभ्रमेति तद्बीजं च साहश्यमेव नन्वेवं श्लेषवदभिधात एव द्वितीयार्थग्रहः स्यादत उक्तं वाचकत्वे इति
अवाच्यार्थस्तदाऽभिधया प्रतिपादयितुमशक्यः एकतरमात्रेति सत्यपि संबंधग्रहे संयोगादिज्ञानस्य तज्जनितप्रथमार्थता
न्यार्थग्रहस्य वा प्रतिबंधकत्वात् द्वितीयार्थज्ञानमिति भावः न च संयोगादिना अभिधावत् व्यंजनापि नियंत्र्यतां संयोगादिकम
तिक्रम्य बोधकत्वेनैव तत्सिद्धेः अन्यथा स्तुगंधिमांसभोजनप्रकरणे सुरभिमांसं भुंक्ते इत्यभिमाने गोमांसानुपस्थितौ विदग्ध
स्य वक्तुरुपहासानापत्तेः अनवच्छेदोऽनिश्चयः एतेनेति विशेषस्मृतिहेतव इत्यभियुक्तवाक्यविरोधेनेत्यर्थः प्रथमार्थप्रत्याय्यपदा
नां विरामेपि प्रथमार्थप्रतीतेरेव व्यापारत्वमाश्रित्य द्वितीयार्थधीरूपपाद्या ॥ शाब्दस्य [illegible] परिहृत्य सहत्ता च शाब्दत्वं व्यंजनाया रामं० १७
बोध्यं अभियुक्तैः भर्तृहरिभिः प्रसिद्धार्थसमेतेन तदर्थमात्रवृत्तितया प्रसिद्धमित्यर्थः अत इंद्रादिभिः कदाचिच्चक्रधारणेपि न दो

ध्रौ चं

ष इत्याह। तत्संयोगाभावादिति। तत्संयोगप्रसिद्ध्यभावात्। सहचरेति। कार्यप्रसिद्धपरस्परसापेक्षत्वमित्यर्थः। वस्तुतस्तु सहच
रितासाहचर्यं। सहशब्दयोरेवशब्दयोः सहचरणदर्शनात्। सहयोरप्यसहशार्थयोरेवद्वंद्वेन सहप्रयोग इत्युक्तगोत्त्व। स्पष्टं चेदं भाष्यके
यटहेलाराजीयादिषु। अत एवैतत्कारिकाव्याख्याने एवं सम्प्रपाठः। परिभिरितिसाहचर्योदाहृतं हेलाराजादिभिः। तत्र हि वर्जितार्थो
यसाहचर्यान्नदर्थस्यैवपरेः कर्मप्रवचनीयसंज्ञाग्रहणमिति चोक्तं। महाभाष्यकारोप्येवमेवाहीत। कांताविपिशंकतालच्छायापदे नाना
र्थं। कयोस्त्विदिति। एतेन द्वयोरपि नानार्थत्वात्परस्पराश्रयग्रस्तमिदमुदाहरणमित्यपास्तं। चकारेणसहकारेणरामार्जुनपदयो
र्द्वयोरपि परस्परविरोधसिद्धये युगपद्देवतात्पर्यग्रहात्। असंकीर्णोदाहरणंतु रामरावणाविनीत्याह। प्रयोजनम्। अनन्यसाध्यमि
त्यर्थः। हर इति। शिव इत्यर्थः। देवपदस्य राजत्वेन हं दारकत्वेन च शक्तेर्नानार्थत्वं। राजा भट्टारको देव इत्यादिकोशात्। अत्र राजसं
बोध्यकत्वकथारूपं प्रकरणं। नियतार्थकेति। नियतत्वं च नानार्थपदीये कार्यमात्रसंसर्गपर्यवाचकत्वं अतो न सशंखचक्र इत्या
दावतिव्याप्तिः हरिपदार्थैरपि कदाचित्शंखचक्राद्धिधारणात् इत्याह। अतः समानाधिकरण्यविवक्षातः। शंखचक्रेति। त
द्वाचकसामानाधिकरण्याभावादित्यर्थः। त्रिपुरारातिपदे त्रिपुरारातिपदेन शंभो योगरूढं। मादनासामर्थ्यादिति। कोकिलमादनस
मर्थत्वेनाप्रसिद्धत्वादितिभावः। नतत्पादाविति। मुखं नितंबाः सारणोवक्रे शंभो पाययोरपीनिकोशात्पाये विमुखवशाद्दैरेरिति भावः
परमेश्वरपदस्य विभुत्वेनापि शक्तेर्नानार्थत्वबोध्यं। अर्थप्रतीतिरिति। वाहुलकात्करणे क्तिन्। प्रतीतिकृदिति वापाठः। शत्रुरिति शत्रु

के

पितेत्यर्थकं· नैवमिति· काव्येऽनुदात्तादिस्वरकृतार्थभेदे समाम्नविषयेऽशेषभंगप्रसङ्गादितिभावः लोके प्रकृष्टत्वेनैव शायः प्रयोगाच्चेत्य
पिबोध्यं· तद्यथाकरणस्तत्त्वदिति: अन्तोदात्तत्वे षष्ठीसमासेनोपमावक्रत्रीहौ प्रतीपमितिभावः वस्तुतइदं चिन्त्यमेवत्र भियुक्तैः क्वापित
थाकथनात अन्तःस्वप्रकाशो इन्द्रशत्रुरित्यादौ वेदस्य वनकाव्ये स्वरोऽर्थविशेषप्रतीतिकृदित्येवव अङ्गप्रत्युक्तस्तके प्रपाठः वाङ्मल्येन
तिपाठेऽपि वेदस्य वाङ्मल्येन स्वरोऽर्थविशेषप्रतीतिकृत् न तु लौकिके चिदपीति व्याख्येयमिति दिक् रघ्वेहेति· चिरप्रवासिनिनायके
नायिकावस्था बोधयं त्याः कस्याश्चिद्युक्तिरियं· एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपक्ष्माभ्यां· एतावन्मात्रावस्थाएताव
न्मात्रे हृदिवसैः परिमाणोदह प्रत्ययः अक्षिपक्ष्माभ्यामित्युपलक्षणे तृतीया· दिवसैरिति करणे· विशेषमिषेति· बुद्धिस्थतत्तदर्थश
क्तया नानार्थानामेतावन्मात्रादिशब्दानां शक्तिः स्तनादिगतपरिमाणविशेषरूपेऽर्थे नियम्यते इत्यर्थः अभिनयो व्यक्तनदर्श
ने मुकुलाकारः अक्षिप्रदर्शने पद्मपलाशाद्याकारः अवस्थाप्रदर्शने उच्चतादर्शकः दिवसप्रदर्शने शुल्यप्रधारणादिः अभिम य
तनिर्देश इति· सचतद्दयहस्तादिक्षेपः अर्थाकारप्रदर्शकत्वाभावाभावात्राप्यमभिनयः इतः संदेशस्य इति· स्पष्टं· अपदेशेनाहित्य
चेष्टतः शब्द हृदयस्यैकात्मपरतालभ्यते: निवारितेपीति· अर्थान्तरं निवार्य प्रकृतार्थबोधनेपीत्यर्थः क्वचित· वत्सवैशिष्ट्यादिमाहा
प्यवतीत्यर्थः। भद्रेति· अन्वयकृत्: प्राकरणिकराजपरत्वाक्तयस्य प्रकृतस्य राज्ञः करः पाणिर्निरन्तरदानार्थं गृहीतांऽनुमेकशो राघ०
भनोभ्रतः भद्रात्मनः कल्याणरूपस्य· तु रिति· अनभिभवनीयशरीरस्य· वंशः कुलं तत्र जोन्नतिराधिक्यं यस्य· शिलीमुखानाराचाः सं १८

ग्रहोऽभ्यासदार्ढ्यं· अनुपप्लुतेति· अबाधितज्ञानस्येत्यर्थः अवारितगतेर्वा· अत्रुष्टहितकर्तुर्वाः परेति· शत्रुनिवारकस्य· गजपक्षे भद्रजा
तीयस्य· अत्युच्चत्वात् दुरधिरोहशरीरस्य· विशालत्वं वंशस्य पृष्ठदंडस्योन्नतिर्यस्य· कृतभ्रमरसंग्रहस्य· अनुद्धतधीरगमनस्य· पर
स्योत्कृष्टस्य गजस्य करः शुंडादंडः मदजलसेकसुभगोऽभूदिति राजा वाच्यः हस्ती प्रतीयमानः अत्र प्रकरणेनेति यत्र द्वयोरर्थयोः
परस्परान्वयं विना इतरान्वयानुपपत्तिर्विशेषणसाम्यं च तत्रैव श्लिष्टरूपकं· यथा विद्वन्मानसेत्यत्र ज्ञातो नात्र तत्· गजस्येति· अप्रस्तुतात्प
र्थविषयस्यापि तद्ग्राहकप्रमाणानां तदभावात् व्यापकबोधविषयत्वमेवेति बोध्यं· उपमानोपमेयभावकल्पनादिति· प्रकृते भद्रात्मनो
इत्यत्रोक्तविशेषणविशिष्टहस्तिप्रतीतौ द्वयोरर्थयोर्मिथोऽसंबद्धत्वे वाक्यभेदापत्तेरुपमाकल्पनात्वादानुभवात्रैतेन सहृदया
ना उपमायामपि प्रतीतेरित्यर्थः शब्दश्लेषत इति· सर्वदोमाधव इति सभंगश्लेष इत्यर्थः तत्र हि द्वयोरपि प्रकृतत्वान्नोपमाकल्पनाः अ
र्थश्लेषत इति अभंगश्लेषोऽर्थश्लेष इति सर्वस्वकारादिमतमेतेनेदं असकृत्त्वम् गोत्राणामित्यादौ देवेंद्रराज्ञोः उपमाप्रतीतिरपि सर्व
सिद्धेति [illegible] स्याभेदाभावात् तत्र शक्त्यवशापि सेव स्यादिति भावः तात्पर्यमिति· युगपत्तत्तद्ग्राहकप्रकरणाद्यवतारे तात्पर्यं· प्रक
सिद्धैव तत्· तात्पर्यग्राहकप्रकरणादि यत्र तु क्रमेणोभयतात्पर्यग्राहकप्रमाणावगमस्तत्राहत्रिरितिबोध्यं तदुक्तं [illegible]
[illegible] युक्त इति पाठः अर्थांतरयुगिति स्वशक्त्या प्रकृतार्थबोधानंतरमेव वाच्यार्थबोधात्तत्सहकारित्वमिति भा
वः शब्दस्य परिवृत्त्यसहत्वाच्च शब्दमूलकत्वेन व्यपदेशः॥ ॥इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्रदीपोद्योते द्वितीय

 उल्लासः॥ ॥ प्रकृतघटकत्वं प्रकृतज्ञापकत्वं वोपयोगित्वात्। प्रकृते च व्यंजकशब्दघटकत्वं तस्याः तज्ज्ञापकत्वं च तत्त्वेन रूपेण गम्येति
 बोध्यं· स्मरणस्योपेक्षानर्हत्वं प्रसंगः तदन्येति शब्दवीत्यादि· तदन्या शब्दव्यंजकतान्याऽर्थव्यंजकता प्रोक्ता सा कीदृशीत्यन्वयः कीदृशी·
 किंस्वरूपा· नियंत्रितादौ धीजनकत्वं शब्दव्यंजनतायाः स्वरूपं अस्यास्तु किमित्यर्थः वक्त्राकवित्तन्निबद्धस्य· ध्वनेर्विकार इति· उच्चारयि
तुः शोकाद्यनुमापको जातिविशेष इत्यर्थः अन्यासंनिधावन्यो वक्ता बोद्धव्यभिन्नः देशो विजनतादिः कालो वसंतादिः वैशिष्ट्यादिति·
पंचम्यर्थः सहकारित्वरूपं हेतुत्वं न च तदभावे व्यंजनानुदयाद्बोध्यं· एवकारेण शक्तिलक्षणाशक्तिलक्षणादीनां निरासः संकेताद्य
भावादिति बोध्यं एवं च वक्त्रादिवैलक्षण्यहेतुकाया प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वमस्याः स्वरूपमिति बोध्यं· अस्य
स्येत्यनेन शब्दव्यंजनानिरासः जलाहरणवर्त्मनि नदीगहने उपनायकोपभुक्तापाद्यमज्जलनिश्वासाद्युपभोगचिह्नेनोपभोगं संभा
वयंती सखी संबोध्य काचिदाह अ इति· अतिविपुलं जलकुंभं गृहीत्वा समागतास्मि त्वरितं· श्रमस्वेदसलिलनिश्वासनिःसहा
विश्राम्यामि क्षणं· बहुलमिति पाठे पृथुलमित्यर्थः। सखित्वप्रतारिताध्वननं· जलकुंभं· तेन दुर्वहत्वं· गृहीत्वा समागतातदपित्व
रितं न शनैः तेन मध्ये विश्रामाद्यभावः अस्मि· अहं अतिशायितसुकुमारतनुः अप्यंगखेदातिशययोग्यताध्वननं· श्रमजन्यस्वे
दसलिलनिश्वासाभ्यां निःसहा निर्बला चलितुमक्षमेति यावत सलिलत्वोक्त्या स्वेदबाहुल्यं अत्रेदृशजलकुंभवहनजन्य एवायं
श्रमो नान्यथेत्याशंकिष्टा इतिभावः चौर्यरतगोपनमिति अत्र बाध्यघटितता कार्यस्येवोर्थगत्कृतं रतं गोपयंतीति सामाजिकास्त्विति

सखि ५ जलपूर्णकुंभं ४

अं२ पं५ व४

वंगममितिभावः शब्दपरिवृत्तिसहत्वाद् अर्थस्यैवेयं वृत्तिरिति बोध्यं · ओन्निद्रमिति · कृतस्य कामुकसंभोगांकुरीति शब्दोपभोगचिह्नैः संज्ञा
तवत्यानान्यिकायाह्नपत्तुक्तिः ओन्नि दौर्बल्यं चिंतालसत्वं सनिश्वसितं · ममसंदभागिन्याः कृते त्वाखित्वामपश्ये हृदयरिभवतीः तदेहे
ति हितीयांतं तवापित यानुशासनातः अन्येत शेषष उपतमाहुः तदा छायातवेति · हेमस्मिति निःश्वासमहितगतनिद्रत्वादिके
नृश्च स्वभागधेयायाः ममकृते मदर्थं त्वामपि परिभवति पीडयतीत्यन्वयः। विरहात्कं गितां मां त्वावत्परिभवत्येव मत्कार्यार्थं गमना
नै ५ गमनादिना कामुकस्य शब्दान्तेत्यादि व्यापारेण त्वामपि पीड्यर्थः अत एव त्वस्य मंदभागपत्तोक्तिः स्वस्य कृते नान्यस्य दुःखं। किं तु सम
दुःखस्तु खत्वेनमनस्थास्वेत्यतः सखी निभागोरूपाद्विकेशोक्तो भागधेयेकशब्दयोरिति विश्वः ५ चेष्टयावैशिष्टेनेति चेष्टास्व
पेण वैशिष्टेन ज्ञानेनेत्यर्थः व्यज्यत इति · तस्याः कामुकोपभोक्तृत्वमेषा प्रकाशयतीति सामाजिकान्प्रति व्यज्यत इत्यर्थः अन
दीयमिति · ममेति पदमोत्रिष्टादावन्वेतीति तदाशयः तदीयोक्ति द्वतान्वयस्येति · तच्च दर्शितरीत्या स्पष्टमेव तथाते · वेणीसंहारे
कुरून्नियहाद्दुपमेन युधिष्ठिरमुपालभमानं भीमं प्रति सहदेवस्य आर्य क चोतिगद्यते गुरुः शिशुपालं भनिषेधपरवाक्यस्यान्तरे गु
रुः किंखेदमपि जानातीति उपक्रम्य भीमसेनोक्तिः खिन्नेऽस्य स्त्यामित्यादिः गुरुः साक्षादनभियोज्यः युधिष्ठिरः इत्थमनुनाय का
रेणा खिन्ने ज्ञानेमपि विद्यते नेनेति खेदं मात्सर्यं च श्रियते तज्ज्ञानं भजति · कुरुषु कुर्वपत्येषु · अस्य सामान्यशब्दस्यापि विशेषसंनिधा
नाद्विशेषपरता तेन दुर्योधनादिलाभः अद्यापि वं दुखस्थायामपि यद्वा ज्ञातवासमनिस्तारात्तव्रत्ययकारकमकाले पि न भजतीति सो

का०प्र० पृष्ठामः काकाकाक्वार्थः तथाभूतां दृष्ट्वेधर्मिणीं दुःशासनाकृष्टवसनकचपाशां विशिष्य भवन्तं निधाय पितृकथनीयदुःखवस्थां ·
१० नृपसदसि सभायां · पाञ्चालस्य तनयां न तु यस्य कस्यचित् · तेन जन्मप्रभृत्यतः पूर्वमपरिभूतत्वं अस्मत्त्वं विधेनैव तथात्वमिति भा
20 वः तादृशीं दृष्ट्वेति भजनक्रियया खिन्नत्वक्रियया च समानकर्तृकं · उषितं स्थितमिति च भावे क्तप्रत्ययसिद्धं द्वितीयान्तं दृष्ट्वेत्यस्य कर्म
तथा वल्कलधरैरस्माभिर्वने व्याधैः सार्धं न तु वानप्रस्थादिभिः सुचिरमुषितं तदृष्ट्वा विराटस्य राज्ञः आवासे गृहे अनुचितस्य
सूदादिकर्मण आरम्भेण निभृतं गुप्तं यथा स्यात्तथा स्थितं च दृष्ट्वेत्यर्थः केचित्तु दृष्ट्वेत्येतदुषितमित्यनेन समानकर्तृकं संनिधानात्
तेन पञ्चानामपि तद्दर्शनं लभ्यत इत्याहुः । काकोर्वैशिष्ट्यादिति · संपूर्णा वक्तृवैशिष्ट्यादिव्यापित्वरूपा काकुर्वैशिष्ट्यस्य ज्ञानादित्यर्थः
इति काक्वाक्षिप्यत इति · इति ज्ञापनेनाक्षिप्यत इत्यर्थः एतेन व्यङ्ग्यार्थबोधः सामाजिकानामाधुनिकानां न तेषां भीमसेनोक्तिमश्रृण्वता
नां तत्रैव काकुज्ञानमित्यपास्तं भीमसेनपठितानुपूर्व्यनुकारेण तज्ज्ञानसंभवात् सामाजिकानां सहदेवे भीमसेनज्ञापनस्य
व्यंग्यप्रतीतिश्च भीमस्य काकुमज्ञात्वा न भवतीति काकोर्व्यञ्जकत्वं बोध्यं एतेन पाञ्चालीपरिभववनवासादिना भीमादेः खिन्न
तारूपेणार्थेन भीमे कुरुषु च खेदमजनयतो युधिष्ठिरस्य · अनौचित्यव्यञ्जनेन काकोरपेक्षा · तां विनापि महतां दीनसंबन्धिखेदे नौचित्यप्रती
तेरनुभवसिद्धत्वादिति परास्तं अनौचित्यातिशयस्य क्रोधप्रकर्षकस्य काक्वैव व्यञ्जनादिति दिक्॥ उक्तकाकुव्यङ्ग्येनेति · काकुव्यङ्ग्यज्ञा रा०म०
पनविषयानौचित्यातिशयेनेत्यर्थः वाच्यस्येति भ्रातरि खेदमजनरूपस्य कुरुषु तदभजनरूपस्य चेत्यर्थः शोभनत्वेति अनौचित्य १०

रूपवांग्यार्थोपस्कृततात्पर्यस्यैव भीमक्रोधप्रकर्षकत्वादित्यभिमानः उक्तवांग्यस्येति· तस्यैवेत्यर्थः अतो चित्यकारिणिक्रोधप्र
कर्षस्यानुभाविकत्वेनतत्कृत्वेकत्वाद्वाच्यातिशायिद्वयंग्यमितिध्वनित्वमेवेतिभावः तदंगत्वाद्यंगेनक्रोधप्रकर्षबोधनीयेसह्रा
यत्वात् नेतिप्रत्यक्षाकाकापीतिनन्नमात्रनिष्ठयाप्रत्यंजिकयाकाक्वापीत्यर्थः अतो वित्यादिव्यंजककाकुस्तत्त्वेदं रिरंसेमपिभ
जतिनाद्यापि कुरुष्विति समुदायनिष्ठेतिभावः उक्तोपक्रमायाअस्याउक्तेर्मपि रिरंसेदं भजतिनाद्यापिकुरुष्विति प्रश्नमात्रे रणापु
पपन्नेरित्याशयः यांकाकुमिति ननथाविशिष्टकाकुरिति नतदाक्षिप्तस्यगुणीभावइतिभावः अनेनेति· सर्वयापिन नमात्रे
एवकाकुर्नविशिष्टेइतिएतदाशयः नत्र काकोवसहदेवगुरोः लज्जगंतदाशयाभिज्ञं भ्रातरंत्वां ह्येछामिधुरुदीनेरिरंसेमपिरिरंसेदंभ
जतिविकृद्धकारिषु कुरुष्वनेत्येवंवाक्यार्थं सिद्धोतात्प्रेवप्रत्यंजिकांकाकुंसहकारिणीमाम्राध्वीकार्थमपि नयोगप इत्यादि
रूपमतो चित्यं भीमक्रोधप्रकर्षकृततयावाच्यादपि चमत्कारित्वं जयतीतित हृदये· तदेवाहकमेणापीतितद्वाइति· इलनायिका
भयेननिकटवर्तिनी मत्तः प्रियतमो मां साक्षादपहायत्वनायिकाकपोलगतं तत्त्वमितिवं वंत्वनायिकाप्तुखावलोकनाभिषेणासादरं
दृष्ट्वातद्दिगमेनहृशानिरीक्षणानि हृन्नायकंप्रति हर्षविकारेणज्ञातरहस्यायाद्वयमुक्तिः तदाममगंडस्थलनिमग्नांहृष्टिंनन
यस्यन्तावद्इदानीं सैवाहंत्वोचकपोलेनसाहष्टिः तदायदासाकामिनीमत्कंनिधागमीतइत्यर्थः निमग्नां· अनिमेषतयातथाभूता
मिव· नत्त्वपतिताम्· शिमिच्छमितिपाठेनिर्भितांनिद्रितामित्यर्थः इदानीतस्यागमनकालेसेवनदवस्थैवमानिग्धाऽनिमेषा· तथा

का·टी· चसखीसांनिध्यातिरिक्तसकलसत्वेनाह शाहहिविरहस्त देशानीपदात्मकं वाक्यगम्यः सखीसांनिध्याभावस्यास्त्वप्रयोजकत्वमवग
३१ म्यतेइति बोध्यं पदात्मकेति पदसमूहमात्रमेव गतवाक्यपदार्थत्वादिति भावः मन्मसखीमिति मद्भयादिहैवमपहायेत्यादिः।
31 अन्यादृशी।निर्निमेषानि।भाचअन्यादृशी उद्दिग्ना विषण्णा च· इयत्कालं गोपनं कृतमित्याश्चर्येऽस्मीह इति नवेति व्याज्यत इति·
नवेत्युपालंभप्रकाशनं साभ्याजिकान्यानिवांछमित्यवधेयं उद्देशाइतिनाथिकां प्रतिहृत्यार्थिनः कामुकस्योक्तिरियं हृष्टानातउ
द्दिश्यतइति उद्देशः तीरभूभागः तथाच हृदादेर्नैर्जनेकृद्दिश्यतेनत्वनागम्यतइति निर्जनत्वं गम्यते ऊर्ध्वदेशत्वेनाधःसंचर
तां स्खलनभियानवलोकनीयत्वं च व्यज्यते सरसत्वेन शुष्कदलराहित्यात्कटुशब्दराहित्यं प्रोक्तिस्तेन वेष्टनं· तथाच तस्यत्रावर
णात्संचरतामनवलोकनीयता छायाच सूच्यते नदीपशोभया स्थानांतरादतिशायितशोभः कुंजोत्कर्षेणागुंजन्मधुकरक
रं विततकुसुमसमृध्यादिरूपेणांकुरितो ऽसक्तेबोत्त्यादितोरमणी विभ्रमः चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमोमतइत्युक्तलक्ष
णः यत्रमदनस्यानेनयासामपि न स्मरोऽद्रेदस्तासामप्यसौ वहतीति भवत्याः कामदेवसुखोत्पुरुनवेव्यसनेस्यादिति भावः यत्तुविभ्र
मोविलास इति व्याख्यानं तदज्ञानविलसितं तयोर्भेदात् विलासोंगेविशेषोयः प्रियाप्तावासनादिषु· विभ्रमस्तु त्वक्त एव अत एवा
मरोपि स्त्रीणांविलासविब्बोकविभ्रमाललितं तथेत्यादिहावभेदेषु भेदेनजावुपनिबद्धवान् नर्मदनर्मदावतीति नर्मदा ननदीमात्रं केव रामं० ११
लमेतावदेवविषमुख्योवाधकं किं त्वनादप्यत्स्रीत्याहकिं चेति· एतस्मिन्नुद्देशे· मानिनीमानभंजनेतिनिपुणत्वेन प्रसिद्धाः स्वर

यद्धा·नेतव१

२१

तस्य स्तुत्स्य दर्भ्यर्थः स्मरतस्तु ह्रस्वं रातिश्रमजन्यस्वेदहरणोनपुनः पुनः पवनेन याताः वाताः वान्तीति वाता इति श्रुत्य नेता नेनेव
गमनशालित्वेलक्ष्ये पुनर्वान्तीति मंदत्वप्रत्यायनाय नमंदाकुंजोत्कर्षसंबंधात् शैत्यसौगंध्ये उक्ता एव· तर्वान्ति कंदर्पवेदनावत्त्वं
समापनायकमत्वात् अत्रैव रतो विनत्वेव· नन्वत्रार्थमाह येषां वातानां अयेमनोभूः कामः कलितः ध्वतः अकाण्डे ऽनवसरे· निमि
त्ताभावेपि कोपो येन तादृशः स्मरति· वायुसंबंधतुल्यकालं कामिनीजनस्य कामपीडोदयेन कामस्याग्रेसरत्व मुत्प्रेक्षितं अने
नैवं विधसंभेदे स्मरतेवैमुख्यादति कुपितो मकरध्वजः किंवा विधास्यतीति नज्ञायत इति ध्वन्यते मनोभूत्वेन सचेतसां दुःपरिहर
त्वं १७ यथोक्तविशेषणस्यैव ब्रुवीहिः स्मरतार्थे प्रेति· स्मरतार्थे प्रविशेति यन्नायिकायाः प्रेरणां तत्सामाजिकान्प्रतिव्यज्य
ते इत्यर्थः गोत्रे ईति गुरुजनसांनिध्येन विशिष्य वक्तुमशक्नुवन्ती काचिन्नरस्यतत्रैव संनिहितं नायकं प्रति संकेतकालसूचना
यप्रातिवेशिनीं संबोध्य श्वश्रूणालंभमाह नुदत्यत्राहं मनाः श्वश्रूर्मां गृहभरे सकले क्षणमात्रं यदि संध्यायां भवति न वामवतिवि
श्रमः अगणता मरणा इति पाठे तनेत्य मना इति· नुदति प्रेरयति· अत्राहं मकरणांतेन श्रमादिष्माजालं वनेनापि नावकाश इति ध्व
न्यते· गृहभरो गृहकार्यनिर्वाहः सकल इत्यनेन सार्वकालिको व्यग्रतायादिक्षणमात्रं विश्रमो भवतितर्हि संध्यायां तत्रैवासरपा ४३
न्तेः अथवा न भवत्येवेति योजना· श्वश्रूरित्यनेनातनतिक्रमणीयाज्ञता विशिष्यान्त· तां हि ध्वपकन्नानादिना शून्यः वाज्यत इति संनिहि
तं प्रतिपत्संकेतसमयबोधनं तत्सामाजिकेषु व्यज्यत इत्यर्थः एवमग्रे पिबोध्यं उपपातिं प्रत्यभिसर्तुं प्रस्थितं नायिका प्रतितत्यत्या

22

गमनवार्त्तां श्रुतवत्यास्तत्सख्या जनांतरसंनिधानेऽभिसारनिवारणो किं सखे इति श्रूयते समागमिष्यसि तव प्रियोऽद्य प्रहरमात्रेण॰ एव
मेव किमिति तिष्ठसि तन्नाविसर्जनीयकरणीयम्॰ समागमिष्यतीति श्रूयते इत्यन्वयः अद्यैव न तु कालांतरे श्रूयते न तु यदा कदा
चित्तश्रुतं॰ तत्रापि प्रहरमात्रेण न तु विलंबेन समप्रकृष्टरागकामवक्रतरलब्धक्षनः अतेनागमनेनोत्तरं दृढमिति पुनरागमनं प्रियइति शिरो
विलक्षणाया एवमेव॰ तदीयभोजनाद्युपयोगिव्यापाररहितेन॰ करणीयं रंधनादिकं॰ सज्जय साधय इत्याहुः अन्ये तु अत्र मते
श्रूयते इत्यस्य वर्त्तमानापदेशस्य न तथा स्वरसः शीघ्रतायै अवश्यनिवर्त्तनाय कालाल्पत्वप्रतिपादनार्थं भूतनिर्देशस्य वयुक्तत्वात
तस्मात् प्रियागमनश्रवणात्तोऽभिसाराद्विहंतो इति अवश्यमभिसरणीयमिति व्यंजयंत्याहृत्याइयमुक्तिः एवं श्रूयते प्रहरमात्रेणाग
मिष्यतीति॰ तदधुनैव एवमेवाभिसारोपयोगरहितमेव किमिति तिष्ठसि इत्याहुः एतन्मते प्रकाशो विस्पष्यते अत्र प्रकरणस्येति॰ वि
दितरहस्याया सख्याऽभिसारोपयोगिवेषविन्यासादिप्रकरणे प्रियागमनकथनेनाभिसरणनिषेधं करोतीति प्रकरणं ज्ञानतां सामजि
कानां व्यंग्यमित्यर्थः अन्यत्रेति नायकसंनिधानादागतां प्रियतरसखीं दृष्ट्वा सखीः॰ प्रत्युक्तिरियं भो सख्यः अपरिहार्यप्रणयाः अन्यत्रे
तो दूरं॰ कुसुमावचायं हस्तेनादानं हस्तादाने चेरस्तेप इति घञ्॰ यावद्धस्तप्राप्यकुसुमलाभस्तावत् दूरं गच्छतेति सर्वेष्वानिकटेऽसंच
रणं तासां ध्वन्यते॰ श्वयमिति वक्तृत्वादन्यत्र गमनेऽपि सहायतया भयाद्यभावः अत एवाहमित्येकवचनं॰ अत्र श्वयमाणमानवशा गम॰
द्वे कुंजादिमति च एतेन भयाद्यभावः विजनता च॰ अस्मीत्यहमर्थकं॰ करोमीत्यत्रापि कुसुमावचायमिति कर्मत्वमपि अस्माभिः ११

द्वयेपि ८

अपरे तु॰ अद्य तव प्रियः रात्रौ प्रहरमात्रेणागमिष्यति संकेतस्थानं॰ ततएवमेव अभिसारोपयोगिव्यापाररहित्येन कि
मिति तिष्ठसि ततः शीघ्रमभिसरणाय सामग्रीं रचयेति बोद्धव्ये शिष्योदाहरणमेवेदमित्याहुः ८

सहैवागच्छेतिनियोगगारणार्थमगमनेहेतुमाहनाहमिति· सर्वोप्येकोंजलिरसामर्थ्यात १० विविक्तेत्यादि· विजनतादिप्रकटनका
रकरतीति· सख्यादिवेषधारीत्यर्थः प्रियसखीति आश्वस्ता प्रियसखीमिति पुस्तकपाठः प्रवासंगंतुमिच्छंतंनायकंप्रतिनायिकाया
ह गुरुजनेति गुरुजनपरवशप्रिय किंभणामितवमहभाग्येत्यादि अद्यप्रवासंव्रजसि व्रजस्वयमेवजानासिकरणीयं तदिहेति
ह्रितीयांते· संबंधसामान्यषष्ठ्यंतेवा· गुरुणासीतिपाठे गोष्यसीतिगुरुजनोमात्रादिजनस्तत्परवशगुरुजनेः जनः अविदग्धः वसंते प्रवास
प्रेरणात् सपरवशः शत्रुस्तदायत्तः तेनानिवार्यत्वं· प्रियेत्यनेनगमने दुःखोत्कर्षः· किंभणामिपराधीनेनिरर्थकत्वात् अतएवमंद
भागिनी उपायाभावात् अद्यवसंते· यद्वप्रवासिनोपिगृहमायांति· व्रजेतिसदैन्यरोषोक्तिः स्वयमेव· करणीयंकर्तुमहंजानामि
तेनस्वक्षैर्यंवुध्यैवप्रायोगच्छसीत्यभिप्रायः करणीयमित्यस्यममेत्यादिः ममकरणीयंत्वमेवगोष्यसीत्यर्थः पाठांतरे ११ वेशिस्मो
प्रतिदिनोपचीयमानविरहेप्रमाथकत्वरूपं अनुरक्तेयेति· तयावोध्यतइतिसहृदयैर्बुध्यते हारेतिस्वगोचरचेष्टाविशेषेण
नायिकायाः स्वविषयभावमवधारितवतोनायकस्य सलापंप्रत्युक्तिरेषा हारोपान्तस्य हारस्मीपदे शमासानिरंतरेसपिसतिसौंद
र्यसाराद्प्रधानसौंदर्यात् श्रीः शोभायस्यास्ताहृशयाकयाचित्कमनीयतरकांतयाप्रोल्लासप्रकारार्थे· समासक्तं· संलग्नं समासा
दितं· कृतं· यद्वाभावेक्तः संबंधप्रापितमित्यर्थः आसादयतेः प्राप्त्यर्थकत्वात तदुत्तरं श्रिङ्गंतरोपगमेनप्रापणाभावः स्वयमेवविप
रीतस्तुरतप्रदानमस्यत्वंगपद्ततदेव सम्यक्पदेनोच्यते आनीतमित्यादिनागृहमागच्छेरिति· अर्थः क्षिप्तेत्यादिनास्त्रर्योस्तमयः सके

का॰टी॰ नकालइतित्वक्तेनेशारीरकार्श्यमितिवा॰ अथः क्षिमेअपिंचलेकराङ्केरागमदर्पितेइत्यर्थइतिकेचित् वाचत्ते इत्यादिनाकोलाहल
१३ रहितेकालेकोलाहलरहितंयथास्यात्तथाआगमनं॰ वाचः प्रसरणंतारत्वंनिवारितंतेनमंदंकृतवत्येवेतिभावः संकोचितेइत्यनेन
पारितोषिकमालिंगनं ११ पृच्छन्तेतिभावपरीक्षार्थंद्वारिवेश्मांतरेणास्थितेत्यर्थः आक्रान्तविशेषः अयंमदनुरागंपृच्छतेतिस्यमिश्र
यात्मकः संभोगसंचारिलज्जालक्षणोवा॰ तदेवोदाहरणासंभवतीतिभेदांतरमितिशेषः यथातिपिडलमित्यत्र एपुलरूपगाथा
वक्तवोढव्यानांगुरुजनेत्यत्रअद्येतिकाकुवक्रावोढव्यकालगुवित्यलंघनीयाज्ञत्ववाच्यानां अत्रास्थेति॰ स्वयंहृत्याइयमुक्तिः
श्वश्रूरत्रनिमज्जतिअत्राहंदिवसकेप्रलोकप॰ मापथिकरात्र्यंधशय्यायामावयोर्निमंक्ष्यसि॰ अज्जेतिपाठेआर्या। नविदाधानिम
ज्जतिजरत्तरत्वेननिस्पंदाशेते॰ तेनशंकारहितत्वं अत्र ततोभित्रस्यले॰ अहंअहमेव॰ अत्रस्नायवोधकपदाद्रूणामन्मथपीडया
त्वस्यानिद्रारहितत्वं॰ दिवसकेइतिकुत्सायांकः॰ साचावयोःश्रेयःप्रतिकूलत्वात् प्रलोकपसम्यगवलोकयारपथिकरात्र्यंधेति
चेरहस्यगोपनायपथिकत्वेनआमाहितस्मरणायोग्यतारात्र्यंधत्वेनस्वशय्यायतनप्रसक्तिद्योतना॰ अन्यथाऽप्रसक्तप्रतिषेधेरह
स्यभंगापत्तेः अतएवनिमंक्ष्यसीत्युक्तिः मइइत्यावयोरित्यर्थेनिपातः अन्यथास्वमात्रोट्टंकनेरहस्यभंगापत्तेः शय्यायांमा अत्र
गृहेश्वश्रूरहंच स्वश्रूश्च जरत्तरत्वेनवधिरानिस्पंदाचजनांतरसंचाररक्तनास्तीतियद्येष्यंव्यवहरेतिध्वनिः १३ सहकारितेति॰प्र
त्यहहऐकामिमिथुनेतत्त्वेष्यानुमितरत्याद्यैचास्वादातुदयेनशाब्दान्वयव्यतिरेकानुविधायित्वात्तद्दोपिनिमित्तंकिंतुपर्यायांतरे
राम॰ १३
अत्रवक्तृप्रतिपाद्ययोर्वैशिष्ट्यं
केचित्तुममेत्येवार्थः जरत्याः शय्यायांपातेदुःखशंकामात्रं स्वस्यास्तत्रगमनाद्भीतिशंकेति विशिष्टोपाख्यानमित्याहुः ३

णापि तदुपस्थितौ व्यंग्योपस्थितेः प्राक्स्यापि प्रधानतयाऽर्थस्यैव प्राधान्यमिति तन्मुखेन व्यपदेश इति भावः एतेनार्थसहकारेणापिम
नसो व्यंग्योपस्थापकत्वेन तस्यापि प्रमाणान्तरत्वं स्यादित्यपास्तं ॥ ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्र
दीपोद्योते तृतीय उल्लासः ॥ ॥ ज्ञातेष्विति तेषु धर्मिपुरस्सरं ध्वनित्वादिना ज्ञातेष्वित्यर्थः हेयोपादेयतयोरिति · तयोरसविशेषा
द्युत्कर्षापकर्षप्रयुक्तत्वादिति भावः विशेषनिष्ठत्वादिति · ध्वन्याद्यवान्तरविशेषनिष्ठत्वादित्यर्थः तदेव व्युत्पादयति यथेति · चि
त्रभेदे वेति · पद्यबन्धादौ · काव्यविशेषेति काव्यविशेषाणां ध्वन्यादीनां प्रभेदेष्वित्यर्थः काव्यभेदत्रयप्रभेद इति काव्यविशेषध्वन्या
दिभेद इत्यर्थः प्राधान्यादिति लक्षणायास्तत्राप्रसरत्वेनास्याः प्राधान्यं · प्राथम्यादिति पाठेप्ययमेवार्थः आद्यं लक्षणामूलम
विवक्षितवाच्यं · अविवक्षित इत्यस्य विवरणं वाच्येनेत्यादि योऽविवक्षितवाच्यस्तत्र ध्वनौ वाच्यं अर्थान्तरे संक्रमितमत्यंततिरस्कृतं
वेति कारिकान्वयः वाच्येन रूपेणेति वाच्यजात्यादिरूपेण कमलानीत्यादावन्येन रूपेणापेक्षायामपि कमलत्वादिनानपेक्षणा
त उपकृतमित्यादावुपकारत्वेनान्यापेक्षणेपि प्रख्यातदाश्रयस्यानपेक्षेति बोध्यमिति परे लक्षणामूलगूढेति लक्षणामूले
त्यनेन लक्षणान्वयव्यतिरेकानुविधायीत्यर्थकेन निरूढलक्षणाव्यवच्छेद इति काव्यीयध्वनेरस्फुटसंदिग्धप्राधान्यतुल्यप्राधा
न्यास्फुटेतराणां गुणीभूतव्यंग्यानां च निरासः तेषु व्यंग्यो हेशेन लक्षणायाम्प्रयोजनैः काकाक्षिप्तेपि न लक्षणा अनुपपत्त्यभावात् ·
गूढत्वेनागूढस्योदासः प्राधान्येनापराङ्गवाच्यसिध्यंगयोरुदासः सा च · अन्वयानुपपत्तिश्च · अनुपयुक्तत्वेनेति · तात्पर्ये हि त्व

त्वेनान्वेति॰ वाच्यतावच्छेदकरूपेणानुपयुक्तत्वमित्यर्थः आद्यं पुनर्विभजते अनुपयुक्तत्वमपीति॰ परिणामितमिति शाद्बेन वक्रो
क्तिवाक्शेषः परिणामस्त्वात्र धर्मांतरप्रकारकबोधविशेष्यीकरणमेव॰ तदेवाह वाच्योपीति॰ द्वितीयेति ति स्वतएवानन्वयायोग्यत्वेति
त्यर्थः तालाइति॰ तदाजायंतेगुणाय्रदातेसहृदयैर्गृह्यंतेरविकिरणानुगृहीतानिभवंति कमलानिकमलानि अत्रेति॰ सोरभाति
शयोवंग्यः तामिति॰ अस्मीत्यहमर्थेयत इत्यध्याहार्यंयतोत्र विदुषामसाधारणज्ञानवत्तासमवायप्रकटा कातापन्नः समुदाय
स्ति ष्ठति तस्मादात्मीयामप्रतार्थमतिमवलंब्यात्रस्थितिं सावधानस्थितिं विधेहि इतितात्पर्यं उपदेशाहं महमास्मः वञ्चिउपदिशामि॰
विद्वत्सभांगच्छंतमात्मंप्रतिकस्यचिदुक्तिरियंलक्ष्यामिति॰ हितसाधनत्वं च तद्व्यंग्यं॰ तदाह्याचो॰ संबोधस्तत्तेजोन्नारयितारो॰ अत्रा
वश्यवाचाहिताहितत्वानुसंघनीयात्तत्वेव्यंग्ये॰ अनुपयुक्तत्वेनेतिहेतोः तृतीया॰ अदुष्टपक्षो ज्ञावनमत्रव्यंग्यं॰ एवंविद्वत्सम
वायपदयोराशापरंपरामवकर्तव्यानभिभवनीयत्वेव्यंग्ये॰ आख्यापेत्यस्यविपक्षच्छिद्रप्रेक्षित्वंव्यंग्यंबोध्यं॰ उपकृतमितिशरदां।
वर्षाणां॰ अत्रोपकृतादिपदानिस्वविपरीतंलक्षयंति॰ उपकृतंअपकृतंसुजनतादुर्जनता। सखे। शत्रो सुखितंदुःखितमित्या
दि॰ आश्वेतेति॰ तस्वेदत्वंसात्विकभावेन॰ अवगूढा॰ प्रतिवद्धा अत्यंतगुप्ता वा प्रतिषेधमेवेतिनिह्नाजकंकरशिरश्चालनादिचेष्टा
मित्यर्थः राद्धा॰ गतिशब्दनकारो व्वारणामित्यर्थः निरीक्षणपदं ज्ञानसामान्यपरमत्र अवणपरंवस्तुतः सर्वेन्द्रियाणांतु भुक्तापिपा
सयोरैतरेमश्रुतानुक्तत्वात्पाविति यथाश्रुतमेवाविवक्षितंचेतिवाच्यतावच्छेदकरूपेणान्वयबोधविषयइत्यर्थः अत्यपरमित्य

स्यात्स्वतात्पर्यमित्यर्थः। तात्पर्याविषयत्वानार्थाभिधामूलव्यंग्यके व्याप्तिरत आह व्यंग्योपसर्जनीभूतमिति। तेनार्थचित्रगुणीभूतव्यं
ग्यस्यापि नातिव्याप्तिः। एषत्विति। तु नाऽविवक्षितवाच्यस्यानन्तो भेदावितिश्चिन्त्यमिति कोपीति अनिर्वचनीयचमत्कारकारीत्यर्थः।
नेवभावज्ञानेषाप्तियोगिज्ञानस्याकारतात्पूर्वं लक्ष्यक्रमव्यंग्यनिरूपणमेवोचितमत आह सूचीति। पंचदशभेदत्वादिति। लक्ष्य
क्रमः। प्रथमतः शब्दार्थोभयशक्तिमूलत्वेन त्रिविधः। तत्र शब्दशक्तिमूलस्य द्वौ भेदौ। वस्त्वलंकृती इति। अर्थशक्तिमूलस्य द्वादश
वक्ष्यंते। उभयशक्तिमूल एक इति पंचदशेत्यर्थः। पदैकदेशादिकृतभेदानां सर्वेषां समानत्वादिति न गण्यंते इति भावः। विभावादय एवे
ति। तथा सति स्थायित्रियादीनामपि काव्यादिजन्यविभावादिप्रतीतिमत्त्वेन रसानेकत्वापत्तिरिति भावः। किंत्विति। सर्वेति भाववैशिष्ट्ये
न ततस्त्वनुभाववैशिष्ट्येन ततो व्यभिचारिभाववैशिष्ट्येन स्थायी रस्यत इत्यत एव क्रमः इति भावः। निष्पाद्यत इति। अभिव्यज्यते सात्त्विति।
रसो ह्योघेनन्दादिरिति चित्तापकर्षणेन सूक्ष्मकालघटितस्यानवसानाकलनादिति भावः। रसो ह्योघ एव चित्तापकर्षको न वस्त्वलंकारयो
रित्यत्र सहृदयहृदयमेव साक्षीति वस्त्वलंकारध्वनिविषये लक्ष्यत्वं क्रमस्य बोध्यं। तत्र च वाच्यार्थबोधव्यंग्यार्थबोधयोः क्रमः स्फु
ट एवेति दिक्। असंक्रम इत्यत्र मध्यमपदलोपी समास इत्यभिप्रेत्याह अलक्ष्यक्रम इति। निरंतरावयवस्येति। निरंतरसूक्ष्मारम्भावि
भावाद्यवयवकस्येत्यर्थः। अपरिच्छिन्नस्येति। देशतः कालतश्चेत्यर्थः। तद्भावादिति। अयं भावः रसस्य विभावादिजीवितावधित्वेन तदय
गम एव शांतिर्वाच्या। न च तदनुपकृतो व्यंग्योऽनवाप्तः चमत्कारीति। इदमेव निरंतरावयवस्येत्यनेन बोधितमपरिच्छिन्नस्य निरति

का·टी० १५ कृपस्यैतस्यानेन च वेद्यांतरसंपर्कशून्यत्वात् संधिशावत्वेन संभवतः अलंकार्यतया स्थित इति व्याचष्टे प्रधानमिति यत्रेति· यथायं रसस
नोत्कर्षीत्यादौ तत्र हि प्रधाने करुणो वाक्यो हेशे ऽङ्गं स्मर्यमाणः शृंगार इति तत्र सोऽलंकार इति भावः प्रमदेति· रामसीतादीनामन्वय
25 व्यतिरेकाभ्यां परस्परानुरागे कारणत्वस्य लोकसिद्धत्वादिति भावः सात्विका इति· सत्वमत्र जीवच्छरीरं तस्य धर्माः सात्विका इत्यर्थः
तत्र स्तंभो गतिनिरोधः एतद्विभावाः हर्षरागभयदुःखविषादविस्मयक्रोधाः वपुषि सलिलोद्गमः स्वेदः मनस्ताप हर्षलज्जाक्रोध
भयश्रमदाहाद्यस्य विभावाः वपुषि रोमोत्थानं रोमांचः शीतालिंगनहर्षभयक्रोधाद्यस्य विभावाः गद्गदत्वं स्वरनिष्ठवैजात्यं स्व
रभंगः क्रोधहर्षभयमदाद्यत्र विभावाः आलिंगनहर्षभीत्याद्यतमजन्यः शारीरस्पंदो वेपथुः मोहभयक्रोधशीततापश्रमजन्यं वर्णान्य
थाभावो वैवर्ण्यं· हर्षामर्षशोकादिजन्यं क्षिसलिलमश्रु शरीरचेष्टानिरोधः प्रलय इति बोध्यं जंभा नवमः सात्विकभाव इति कश्चित· स
एवैते सात्विका भावा त्वगुणोद्रेकेण जायमाना इत्यन्ये· वाङ्मन इति· संकल्पविकल्पात्मकत्वात् अयं मनः निश्चयात्मकत्वात् अयं बुद्धिः शारीरेणारंभो येषां
तद्रूपाणि इत्यर्थः कृपादीनि इति· आदिना काकुत्स्थादिसंग्रहः एषां च कार्यत्वमसति रत्यादौ तदभावात् अन्वयव्यतिरेकाभ्यां· तेषु· कटा
क्षादिषु· एकरूपस्य रत्यादेस्तत्र हि चित्रस्मितरुदितकार्यजननायोगेन सामग्रीवैचित्र्यापादकत्वात्तेषां सहकारित्वमिति भावः अयं
भावः रतिर्नाम प्रीतिश्चित्तवृत्तिविशेषः सा च नायिकानायकयोः परस्परदर्शनादिभिर्मिथः प्रथमं युगपद्युगपद्वा जायते। जाता एवं द्रा राम० १५
दिदर्शनादिभिरुत्कृष्यते· उद्दीपनोत्कर्षतारतम्यं च रत्युत्कर्षतारतम्ये प्रयोजकं बोध्यं· ततो मिथः संगमेच्छारूपोऽभिलाषो जायते ततः

24

कटाक्षादिना परस्परमुपचितरतिज्ञाने संगमोपायं जिज्ञासतोश्चिंताग्लानिनिर्वेदादयो जायंते· ततस्तदुन्नायिकाश्चेष्टाः अथोपायमारू
ढयोर्दूतादिना सति संगमे प्रीतिरनुवर्त्तते· चिंतादयोपगच्छंति· अतो रतिः स्थायी· चिंतादयो व्यभिचारिणः स्थायिनो विषयश्चालंबनं·
इंदूदयादयो योवक्तो दूतचेष्टाश्चोद्दीपनं· प्रीत्यादिजनितचेष्टाश्चानुभावा इति अनुद्दीपितोपीति· अनुद्दीपितो जातोपीत्यर्थः विभा
वादिसंज्ञाप्रवृत्तिनिमित्तमाह विभावादिसंज्ञा चेति· अतएवकारणत्वादिना ज्ञानेन रसो बोध्य इति बोध्यं अंकुरयोग्यतामिति ईषत्प्रकाशि
तत्वादिति भावः ईषत्वं च साधारण्येन प्रतीतविभाववैशिष्ट्यविषयकत्वमेव· एवमनुभावनादि स्फुटतरस्फुटतमप्रकाशफलकं स्फुटत
रत्वादि च अनुभावादिवैशिष्ट्येन चर्वणाविषयत्वमेवेत्याहुः अनुभावयंति· स्थायिभावं सूचयंति· पोषकतयेति स्थायिन इत्यादिः स्था
यिनं परिपुष्टसर्वशरीरं संचारयोग्यं कुर्वंतीत्यर्थः आभिमुख्येनेति· विद्यमानस्यापि रत्यादेस्तत्तत्कार्याजनकतया तत्सहकारेण च
तज्जनकतयेषामाभिमुख्यं अयं भावः सामाजिकरत्यादिवासनाया उद्बोधो रसः तस्याश्च रामादयो न कारणानि असंनिहितत्वा
त् जनितकटाक्षादीनि कार्याणि· तत एव वैयधिकरण्याच्च नवा तच्चिंतादीनि सहचारीणि· तत एव· किं तु रामसीतादीनां रामत्वादि
तः प्रथमसमवगतानां सहृदयतावशात् व्यंजनया रामत्वादिपरीहारात् रत्याद्यालंबनविभावत्वादिनाभिव्यक्तो सामाजिकनिष्ठरत्या
दिवासनाया उद्बोधः एवं च तादृशसाधारण्यरूपेण विभावनादिकमेव तत्तद्व्यापारो बोध्यः सीतात्वादिज्ञाने चारम्यत्वादिज्ञानेन त
द्विषयतया सामाजिकनिष्ठरत्याद्युद्बोधाभावात् तथाज्ञाने पुरुषोद्बोधेपातकित्वप्रसंगादिति· स्व चैतेरित्यनेनैव विभावादिशब्दो विभावा

दैरिति सहार्थे तृतीया। तेन विभावाद्यैः सहृदयैर्व्यक्त इत्यर्थः। इदमस्य सम्मूहालंबनरूपतालाभः। व्यक्तिविशिष्ट एवेति। विभावादिवैशिष्ट्ये
न चर्वणाविषय इत्यर्थः। अकार्यत्वेति। अज्ञाजनकनीलघटत्ववत् विशिष्टत्वस्य कार्यतावच्छेदकत्वं वा हेतुः। वाशब्दस्त्वर्थे। अजन
कादिनितयाहि समितिस्थापितत्वव्याघातः स्यादिति भावः। मेलकंपानकवदेकलोलीभावकारणं विभावादिसमूह इत्यर्थः। ज्ञानेति
दर्शनमतेपि आनंदनिर्वाहाय ब्रह्मसंवलनमस्तीति ध्वनितं। अनादेयमिति। विभावानुभावयोर्निर्विषयत्वाद्वास्यत्वाच्चाचिंताहीनां
तथात्वेपि चिरमनुवृत्त्यभावात् न तेषां रसत्वं। नापि केवलब्रह्मरागस्तत्त्वज्ञानिनोपि रसिकत्वापत्तेरित्याशयः। तज्ज्ञानीयैरिति
साक्षिभास्यैरनिर्वचनीयैरंतःकरणपरिणामभेदैरित्यर्थः। अन्यथा साक्षिभास्यरत्यादिसहसमूहालंबनानुपपत्तिरिति भावः। स्थायी
त्यस्यां विवरणं प्रवाहांतं। भाव इति। अत एव तन्नूत्नवीतरागादीनां न शृंगाराद्युद्बोधः। चित्तवृत्तिरूपस्यास्य अनुविनाशित्वेपि वासना
त्मना तथास्त्वेन रूपेणावस्थानात्स्थायित्वं बोध्यं। विरुद्धा अविरुद्धा वेति। वाभिन्ना शिराः परस्परं विरुद्धा अविरुद्धा वेत्यर्थः। अत्रेदं तत्त्वं।
काव्यश्रवणादितोऽनिर्वचनीयांतःकरणाख्ये विभावादिवैशिष्ट्येन तद्धर्मे रतेः साक्षिभास्याया अवच्छेदिकायामानंदांशे आवरणभंगे
सति चैतन्यानंदस्वरूप आत्मापि तत्र भासते अखंडे पात्मनि कल्पितमानंदत्वं ज्ञानत्वं चास्ति तत्र कल्पितानंदत्वांशे आवरणमिति
बोध्यं। अत्र च सर्वत्र सहृदयतासहकृतकाव्यश्रवणं नाट्यदर्शनं वा बीजं एवं च विभावादिसंवलितानंदांशस्याद्वैतेन साक्षिभास्यो रस॰
रत्यादी रस इति फलितं। अत एव शोकादिप्रकृतिके दुःखमये करुणादावपि निर्भरानंदप्रकाशो निर्बाधः शोकादेरानंदांशे भग्नाव १६

नं १

रणस्य करुणादिरसत्वादिति दिक् । रामादाविति साक्षात्संबंधरूपत्वाभावात्त्वेति शेषः । नटे तत्तुल्ये इति । इदं च नाट्येष्वेव काव्यपाठक
इति बोध्यं । आरोप्यमाण इति । सामाजिके इति भावः । अत्रेदं तत्त्वं लौकिकसामग्रीतो रामादावेव रसोत्पत्तिः । स च सामाजिकैर्नटादावा
रोप्यते । लोके सुखरागवतिरत्याद्यनुमानदर्शनात्तदनुकारिनटेऽपि तदवगमः । आरोप एव च सामाजिकानां चमत्कारहेतुरिति ।
न चानुभावादिविज्ञानबलापात इति पाठः । मानाभावाच्चेति । सकलसहृदयसंवादिरसानुभवविरोधापत्तेश्चेत्यपि बोध्यं । अनुमाप्यानु
माप्यानुमापकभावो व्याप्तिः । इत्यर्थ इति । विभावादिभिर्नटे नुमीयमानो नुकार्यरामादिनिष्ठरत्यादिभावो रस इति प्रघट्टार्थः । अस्याश्च
नुमितेर्लौकिकानुमितिवैलक्षण्याय कारणवैलक्षण्यमाह नियमेति । बाधे इति सप्तमी समानाधिकरण्ये । तेनोत्तरकालिकबा
धसमानाधिकरणबुद्धिर्मिथ्याबुद्धि[illegible]रित्यर्थः । चित्रतुरगादिति । चित्रतुरगबुद्धिसदृश्येत्यर्थः । यद्यप्ययं भ्रम एव तथापि बाधाशिरस्क
त्वेनात्र भ्रमत्वेन विवक्षणान्न दोषः । अत्र च बाधानवतारः स्पष्ट एव । अन्यथा तद्रूपेणापकृत्त्वमेव न स्यात् । इदमेव पातञ्जलानां विकल्पा
त्मकं ज्ञानं । शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तत्सूत्रात् । न तु मीताविबुध्यकर इति भावः । कारणादिमत्त्वं नटे ऽसिद्धं कुतो हेतु
तेरत आह । अविद्यमानमपीति । नटेन । नटेनैव । नेतरेति व्यवच्छेदः । सेयमिति । सेयं प्राणेश्वरी मम मनसः सकाशात् लोचनगोचरं गत
ज्ञानविषयतां गतेत्यर्थः । सा पाद्विरहानलसंतप्तेन यज्ञावनयेयान्कालो नीतः । पूर्वं मनस्येवासीत् इदानीं बहिरपि दृष्टेति भावः ।
अंगेषु । नांगेष्वतितरसमुच्छ्वदृष्टिः स्पर्शमात्रेणाखिलतापशान्तेः । दृशोरिति सप्तमी । शोभनशरणाकर्णी चासौ कर्पूरस्य शला

का·टी·
१७
27

किंकाकर्षणं राजनदानयोग्यपत्रलिकादर्शनमात्रेणातिशयितानंदहेतुत्वात्· मनोरथस्य शरीरिणी मूर्तिमती श्रीः संपत्तिः परिरंभस्य
चरमत्वे पि शाघ्यान्मात प्राशुक्तिः १९ संभोगशृङ्गारं विप्रलंभमाह· देवादिति· दैवात् नतु स्वेच्छया तपा· अतु भवेकवेशसमागमस्तु
रवया· चपले आयते नेत्रे यस्याः तया विप्रयुक्तस्य भूवमिति शेषः अविरलाः निविडाः विलोलाः सर्वदिक्संचारिणो जलदा यत्र स कालः
समयस्य वकालोपमः अयं हृदयमानस्य कर्षः समयक्रमशतिदिनोपचीयमानः चाभ्यां तुल्यकालता व्याप्तिः चपलायतनेत्रयेति सहा
र्यं तनीयां तं जलदेनाप्यवेति· चपला विद्युत् सैवायतनेत्रे सेतत्यक्रेत्यर्थः तेन प्रियतमासंयुक्तताया कांतरदर्शनरूप उद्दीपकांतरयु
क्तं भवति १७ अत्र संभावने· कविनिबद्धितार्थस्य साक्षाद्विककरणं· तेन नटादीनामपि रसास्वाद उपपन्नः तत्रात्र सहकारान्ते· आवि
र्भावेनेति प्रकाशनादित्यत्रावेनितत्कार्यैति पुलकादेरित्यर्थः कृत्रिमत्वेन· वस्तुतो ऽतद्रूपत्वेन· एवं चाव्याप्यत्वेन ज्ञानात् कथमनु
मानमिति भावः अतः हिंगैरपि सीतादिविषयकरतिभावालिंगैरपि· अज्ञानादिति· धूलीपटलादिवद्व्याप्यत्वेनाज्ञायमानेरि
त्यर्थः तथाऽज्ञानं च उपनायकविशेषमाहात्म्यादिति बोध्यं· अत्र तु मीयत इति लोके पुलकादिना रत्याद्यनुमानाद्ज्ञापितयोति भावः
रत्यादिरिति साध्यं न च लोके पुलकादिना रत्याद्यनुमाने चमत्कारापत्तिः विभावत्वादिना ज्ञातहेतुभ्यस्तदनुमानरूपत्वाज्ज्ञादानुभवा
तदृश्याङः सचमत्कारेति चमत्कारजनकेत्यर्थः तथा प्रतीतौ च वासनाविशेषः सहकारीति बोध्यं चर्वणीयेति सा चर्वणा भेदेन तु
नः पुनरनुमानं वस्तुनो रत्यादेः सौंदर्यसुरवकरत्वं· तद्रूपताया· रमणीयत्वेन· उत्कटेष्टत्वेन· निरतिशयसुखरसास्वादरूपत्वेन वा· संभाव्य

राम०
१७

मानेति· नटेऽप्युक्तरीत्या चित्तवृत्तित्वया संभाव्यमानत्वात् इत्यर्थः· अत्र रामत्वेन नटप्रतीतिरेव बीजम्· रामोऽयं सीताविषयकरतिमान् इति सी
ताद्यात्मकविभावादिभिरवच्छिन्नात् सीताविषयककटाक्षादिमत्त्वाद्वा यद्वैवं यथाहमिति प्रयोगः· योजनासंभवादिति· किंच ज्ञान
बाधस्य सामाजिकस्य नटे निरुक्तत्वमिति विरहेऽप्यास्वादोदयात्· रसं साक्षात्करोमीत्यनुव्यवसायात् तदुपपत्तिश्चेत्यपि बोध्यं· तता
वद्वदेति· तत्रानुपलब्धिबाधात् अरसास्वादप्रसङ्ग· अतएव नरामगतत्वेन· तेषामसंनिहितत्वाच्च· अनुमीयत इति· विभावादिभिः
लिंगैरिति शेषः· कारणस्य कार्यत्वविज्ञानतोऽनुमीयते इति· विभावादिभी रामादाविति आदेः· सिद्धस्येवेति व्यञ्जकदीपादिव्यंग्य
विषये तथादर्शनादिति भावः· सर्वेषामेवेति· इदमुपलक्षणं सीताद्यालंबनकरामादिगतरत्यादेरात्मगतत्वेन प्रतीतेरसम्भावात्तां
स्त्रीडाघातकादिप्रसंगात् भोजकत्वं भोगजनकत्वं तत्पारीति असंनिकृष्टत्वाद्वेत्यपि बोध्यं निरंतरसांतरेति· निरंतरत्वेन सांत
रार्थनिष्ठत्वेनेत्यर्थः· निरंतरत्वं साक्षाच्छब्दनिष्ठत्वं· सांतरार्थनिष्ठत्वं साक्षादर्थनिष्ठस्य सांतरेण परंपरया शब्दनिष्ठत्वे शब्दनिष्ठत्वसा
जात्या लक्षणयाभिधा पदेनोच्यते इति बोध्यं साधारणीकरणमिति न चेदं लक्षणया वाक्यबाधानवतारेऽपि जायमानत्वात् का
मिनीत्यादीति तत्र दृश्यालंबनविभावत्वादीति वक्तुं उक्तं विभावादिभिरिति सहृदयोगेन तीयमभुज्यते इति भोगविषयीक्रियत इत्य
र्थः· उद्रेकः रजस्तमसोरभिभूय प्रादुर्भावः· आनंद इति· सत्त्वगुणकार्यः चित्तवृत्तिविशेषरूप इत्यर्थः· तत्स्वरूपेति पुरुषे वृत्तिप्रति
बिंबेन तत्साकारस्वरूपकारेति अर्थः· सांख्यमते पुरुषे वृत्तिप्रतिबिंबेन तत्समानाकारत्वमेव तद्विषयकज्ञानमिति भावः· अनन्येति·

का॰टी॰ १८

256

अन्यच्चाविभावादिस्थाप्यपेक्षया बोध्यं॰ अत एवेन रजस्तमसोस्तिरस्कार आनंदाकारवृत्तिः विषयांतरतिरस्कारस्तु सव्यापारो भाजक
त्व इति बोध्यं एवं च कामिनीभावनानंतरं कामिनीवभावतोपनीतो रत्यादिर्मन साक्षात्कारविषयी क्रियते सत्त्वदयेनेति बो
ध्यं निषीध्यमानस्यैवेति॰ अयं भावः रामादि रत्यादीनामननुभूतानां कथं चिंतासंततिरूपा भावना न च व्यंजनया तर्हि तद्येवसिद्धे किं
भावनाभोग्याभ्यामिति॰ विभावादीनामेवेति वा शब्द अर्थे तेषामेव परस्परमेलनेन तद्विशिष्टत्यादिविशिष्टानंदाभिव्यक्तिरूपो रस इ
त्यर्थः स्फुटितिवृद्धित्रिरिति व्याप्त्यादिगोचरपटुतरसंस्कारेणाद्भुटितिवृद्धिरित्यर्थः यद्यप्यत्रानुमानेन प्रकृतं तथापि गृहीतता दृशव्या
प्तिकानामेवेतद्विषयव्यंजनावतारो नेतरेषामित्यभिप्रेत्येदमुक्तं प्राग्भवीनाभिव्यक्तिरत आह स्तम्भनयेति॰ चतुर्विधाभिनयेनेति॰
तदुक्तं कायिको वाचिकश्चैव आहार्यः सात्विकस्तथा चत्वारोभिनयाः प्रोक्ता नाट्यशास्त्रविशारदैरिति अलौकिकविभावादीति॰ अ
स्य कारणत्वादिपरिहारेणोत्पादिः व्यज्यत इति एतद्विषये वाभिव्यक्तिर्विभावादिसमूहालंबनात्मकरत्यादिप्रतीत्यात्मके रस उपचर्य
त इति भावः नोत्पन्न इति उत्पन्नो वा ध्वस्त इत्यपि बोध्यं॰ अपरापीति॰ या सहृदयव्यपदेशप्रयोजिका॰ अन्यनिष्ठेरिति॰ रामादिसंबंधित्वेन
काव्याद्रवगतैरित्यर्थः ममैवेति आत्मावृत्तिरियत्तेनमित्रस्यनाधिक्यं तटस्थ उभयमित्रः किंतिति॰ तेन इत्यालंबनविभावत्वादिनेत्य
र्थः एतेन सीतात्वादिज्ञाने आराध्यत्वादिज्ञानकृतोरत्याद्युद्बोधप्रतिबंधः परास्तः यद्वेति॰ अयं पक्षः सहृदयाहंवादीत देवसेनयत्रा राम॰
हृतयाचरवीयत्वेतिसंबंधिविषयत्वेति॰ रामसीतादिपदघटितकाव्ये इत्यर्थः अत्रेदं तत्वं शकुंतलादिजन्यबोधे प्रथमं विशिष्य प्रतीतावपि १८

अनंतरं व्यंजनया शकुन्तलासाधारण्येनोपस्थितौ सामाजिकानां स्वस्वनिष्ठरत्यादेर्भग्नावरणा । एवं च काव्यादौ यावदयं रमणीतेत्या
दिबुद्धिस्तावन्न चमत्कार इत्यत्र सहृदयानुभव एव प्रमाणम् । अत एव काव्यश्रवणादिदशायां स्वपरविभागानुभवो न जायत इति स
हृदयसंमतम् । संसर्गबोध इत्यादिग्रन्थान्तरं । अनुभवविरोधादिति पदार्थस्मरणस्य तज्जन्यपदार्थमात्रविषयकतया क्रमेण पदानां
ज्ञानात् एकपदज्ञानकाले तत्स्मारकाभावात् पदार्थस्मरणां संबंधिविषयकमित्यनुभवविरुद्धमिति भावः । विचारेति । संबंधिबो
धं विना संसर्गज्ञानयोगाभावात् इति भावः । तत्त्वव्याघातात् इति विभावत्वादिव्याघातात् । इति व्यंजकत्वव्याघातादेरित्यर्थः । तत्त
दात्मनिष्ठत्वादिति । स्वस्वस्त्रीमात्रविषयकत्वादित्यपि बोध्यं । साधारण्यबलादिति साधारण्येन विभावादेरुपस्थापकबलादित्यर्थः
। विशेषनिष्ठत्वेति नियतविषयकत्वलक्षणाया इत्यपि बोध्यं । वेद्यान्तरस्यैवेत्युपपादकतया निरासः । भावो रत्यादिः । नरसस्येति । आ
नंदानुभवरूपस्येत्यर्थः । स्वप्रकाशतनयेऽइति ज्ञानस्य स्वप्रकाशत्वनये स्वाकारस्य ज्ञानाकारस्य यथा विषयत्वं तथेत्यर्थः । अयं घटो
घटमहं जानामीति हि तेषां ज्ञानस्य ज्ञानसामान्यसामग्र्येव परमते ज्ञानवत्तत्वनयेव सामग्र्या स्वस्वरूपात्मनोपि तत्र भानमिति तात्प
र्यं । अभेदेपि विषयविषयिभावांगीकारात् । नन्वेवं वेदनादिस्पर्शो स्वरूपाकारत्वान्नैव द्रव्यप्रसिद्धिरिति वाच्यं । तत्रस्योर्वा पर्यानुभवाभावा
त् अवस्थापरिमितिस्तु स्वानुभवाच्चेतथावस्थाति श । सत्येलधास्तुनंदीभवतीति । अभिव्यक्तस्यापीति ज्ञानादित्यादि आत्मनः स्वरूप
स्य । एवमेव ज्ञानरूपस्यापि रसस्य ज्ञेयत्वमुपपादनीयं । वेदान्ते स्वरूपज्ञानरूप आत्मा तत्र स्वरूपत्वज्ञानत्वे कल्पितौ धर्मौ तत्र कस्या

का॰टी॰
१९
29

स्वदेवसामग्र्याः सुखत्वांशेऽऽवरणाभंजकतानसर्वस्येतिनातिप्रसंगः नन्वभिव्यक्तिविशिष्टरत्यादेर्रसत्वे तस्य स्थायित्वान्नसर्वदे
वरसप्रतीतिप्रसंगोऽतआह चर्व्यमाणतैकेति चर्वणाविषयतैकेत्यर्थः ननु चर्वणैव कथं निवर्त्ततामतआह विभावादीति विभा
वादेर्जीविताविधित्वेनेत्यर्थः जीवितस्य चर्वणाया विभावादिरेवावधिरिति भावः व्यासंगादिना विभावनादिव्यापारनिवृत्तौ विशे
षज्ञानादिना साधारण्यनिवृत्तौ वाऽऽह एवंवशाद्वा चर्वणा निवर्त्तिरिति फलितं पुरइवेत्यादौ इवशब्दाः क्रियान्वयिनः स्फुरन्निव सुख
त्वेन तिरस्कृतस्वस्वविषयइव मनोमात्रगम्योऽपि इतरेंद्रियविषयवान्तद्विषयमिव स्वात्मानं परिस्फोरयन्नित्यर्थः तर्हि ग्रंथांतर एवास्तां
मत आह हृदयमिवेति सर्वांगीणमिति अपरिमितः प्रत्यगात्मसृतमिवालिंगन्नित्यर्थः अनेन रसस्वरूपपरागयमितिध्वनितं अन्य
त् स्वविषयातिरिक्तं ब्रह्मास्वादमिति सुखरूपं ब्रह्मेत्यर्थः अलौकिकसामग्रीजन्यविलक्षणः सत्वएकरसेव सुखरणायनतस्या
पि पर्यंते वैरस्यापत्तेर्वेतिबोध्यं अलौकिकचमत्कारेति कांतादिस्पर्शजन्यचमत्कारविलक्षणचमत्कारेत्यर्थः पानकेति यथा
पानकरसे कर्पूरादीनां प्रत्येकास्वादविलक्षणः कश्चनमिलितरसास्वादः सचमत्कारस्तथा प्रकृतेपीति तात्पर्यं तत्कार्य एवेति
लोकविलक्षणान्विभावस्थाय्यादिज्ञानात् लोकविलक्षणः प्रबलानंदो जायते स एव रसः किं नोच्यत इत्यर्थः निमित्तेति नथा
चतन्नाशे चिरसप्रतीतेप्रसंगः नचेप्सिपत्तिः विभावादिभानएव रसत्वस्य सहृदयसंमतत्वात् लोकविलक्षणत्वेनात्रापुनिव
धकत्वकल्पनेरसप्रतीतेर्नित्यत्वापत्तिरेवेतिभावः तदाह नचेति ननु हेत्वादेरपेक्षाबुद्धिनाशपत्वादिदमयुक्तमत आह हेत्वेति राम॰ १९

तेषां नित्यत्वाभ्युपगमादिति भावः लोकोत्तरतयेति· लोकविलक्षणतया व्यक्तेर्निमित्तकारणनाशान्नाशप्राप्त्या एवासिद्धेरित्यर्थः चर्व
णाविशिष्ट इति विभावादिविषयज्ञानविशिष्ट इत्यर्थः नचेति· अयं भावः शब्दाद्विभावादिज्ञानमथ रत्यादेस्ततः स्तुरगोत्पन्ने ज्ञा
तत्त्वदनुभव इति व्यवधानात् तन्नानुभवकाले विभावादिज्ञानं· एवं विभावादिविषयकत्वस्याप्यनुपपत्तिरित्यपि बोध्यं· ज्ञाप्य इति·
विभावादिभिरित्यादिः तत्सिद्धेः· विशिष्टरूपरससिद्धेः· लोके प्राक्सिद्धघटादेर्हि प्रदीपज्ञाप्यत्वं दृष्टमिति भावः नित्यादिकेति अ
नष्ट एव न नित्योऽपि· वासनारूपतया पूर्वं स्थितिरिति सत्त्वेऽपि रसतामापन्नस्य विशिष्टस्य पूर्वं स्थित्यभावादिति बोध्यं स्वसिद्धेति· स्वज्ञा
प्यत्वेनाभिमतः स्वसिद्धेति ज्ञानस्वरूपत्वाद्रसस्येत्यर्थः विषयतयैवेत्यपि पाठः विभावादिभिरिति तृतीया हेतौ साहित्ये
ऽपि बोध्या· व्यञ्जितश्चर्वणीय इत्युभयत्रान्वयिनी च तत्र व्यञ्जितश्चित्तस्वरूपेणाहन्तानेदंशा एव भवतीति तात्पर्यं ज्ञापकाभा
वमिति· व्यञ्जकत्वातिरिक्तज्ञापकत्वमत्र विवक्षितं· अतो व्यञ्जकस्य ज्ञापकत्वेऽपि न क्षतिः· अलौकिकेनेति व्यञ्जकोऽप्येको हेतुरि
तिभावः अलौकिकस्य कार्यस्य सिद्धेरलौकिकहेतुकत्वं भूषणमेवेत्यक्षरार्थः वस्तुतो विशिष्टस्य रसस्य व्यङ्ग्यत्वमपि नेत्युक्तं
शाकुन्तलालङ्कारादीत्यादिना विभावादिसंग्रहः जगद्वेद्येति· मिथ ईश्वराच्च भिन्नत्वेन जगद्विषयकमित्यर्थः विलक्षणं संवेदनं·
अभेदेऽपि विषयविषयिभावोऽन्यत्रोपपादितः तद्ग्राहकं· तद्विषयकं· अयोगपद्यादिति· रसादिज्ञाने विभावादिविषयकत्वमेवं वि
भावादिज्ञानोपयोगः तादृशं च न निर्विकल्पकमिति भावः अलौकिकेति· विषयस्पर्शजसुखरतभिन्नेत्यर्थः स्वसंवेदनेति स्वात्म

का॰टी॰ ३० कसंवेदनेत्यर्थः तथा च स्वभिन्नं तद्विषयकमप्रसिद्धमेवेति भावः चर्वणादशायामिति· चर्वणायां व्यंग्यत्वेन व्यंजनिकसामग्र्यावलंव
त्वेन चर्वणातिरिक्तज्ञानाभावादित्यर्थः उभयरूपत्वमिति· उभयविषयत्वमित्यर्थः स्वाभिन्नसविकल्पकानिर्विकल्पकेतिवि भाव
दे र्विभावत्वादिना भानान्नदंशेऽस्य विकल्पकत्वं अनाहृतवैतन्यस्य निर्धर्मकस्य स्वरूपतो भानान्नदंशे निर्विकल्पकत्वं च तस्यास्तीति
30 भावइतिदिक् निर्दिष्टा इति भरतसूत्रे स्वसूत्रे चेति शेषः उत्तरमाह एकैकस्येति व्यभिचारादिति· एकैकस्य त्वेरसात्तु दयादिति भावः
अनियमादितिव्याघ्रादिभीरूणां भयम सर्वदर्शिनां· निस्पृयो वीराणां व्युत्साहो व्यापादितं वं रुनां क्रोधः एवं संस्कारे क्रोधको
ध्यानाख्यश्चित्तवृत्तिविशेषश्चिंता साक्ष्ंगारे नायकरूपादेः वीरेसहायस्य· करुणे बंधुगतोपकारादेर्भयानके भयहेतुरुत्तिवे
उत्पादेरेवं च परस्परवृत्तिर्वंधात्रैकस्यापि व्यक्तिरितिव्यभिचारः एकानुगुणोतरहृदयसाहित्येन तदेकव्यक्तावप्यपरा व्यक्तिरित्य व
यव्यभिचारश्चेति नैकैकमात्रस्य व्यंजकतेति भावः विपादिति· मानिनीं प्रति सरवीवाक्यमिदं· हे तन्वि मानभंगावसरे भावेपि
तदत्यागाद्विवेकरहिते· प्रणतिपरे त्वत्कृते प्रणामवशात्· दयिते इति विषयसप्तमी· प्रसीद· वक्रतरोद्दीपकत्वादवसरे
भावी मानभंग इति तव गौरवक्षानमभविष्यदिति भावः तामेव मानभंगसामग्रीमाह· विपतत्र्याकाशं· अलिमलिनेत्युपमित
समासः अंबुगर्भेति व्याधिकरण बहुव्रीहिः तत्त्रिपदो बहुव्रीहिः अस्तीति शेषः सर्वत्र अंबुगर्भत्वेनाहृष्टत्वाद्विरस्थितिः एवं राम॰ ३०
चोध्वरत्रीस्यात्तु न शक्रोषीति भावः मधुकरोति प्रावृषि कोकिलकूजिताभावेपि मधुकरा एव स्तवकरत्वात्कोकिला इति

रूपकं वर्णास्वपि कोकिलनामादौ तनीत्यपि काश्चित् तस्कार्जितैर्दिशां श्रीः शोभा । एवं चातिर्यङ् । सुखी स्यात् तेन शक्रोपीति भावः अ
भिनवांकुराणां केउत्संगे टंकाः पाषाणविदारका मर्मभेदित्वात् पाषाणप्रायकाठिन्यमानभंजकत्वाद्वा यस्यां सा तादृशी । एतेना
धोमुखत्वावस्थानं निराकृतं आलंबनमात्रस्येति । आलंबनपदं रत्युद्बोधजनकोपलक्षणं । तेनोद्दीपनस्यापि संग्रहः कचित् तत्र आले
वनोद्दीपनविभावमात्रस्येति पाठः परिमृदितेति मकरंदे इति माधवस्य मालत्यवस्थावर्णनमिदं अस्या अंगं परिमृदिताकरा म्लां
शिथिलीकृता यथा मृणाली बालमृणालं तद्वत् म्लानं समंगानां क्लशातरत्वप्रकारके कबुद्धिविषयत्वेनैकत्वादेकवचनं तथा क्रिया
त्तुशरीरधारणोपयोगिनीषु वृत्तीषु परिवारस्य सखीसार्थस्य प्रार्थनाभिर्बह्वीभिः प्रवृत्तिरेकाउपक्रममात्रेन न तु चेष्टादिकथमपि अ
निर्वृत्तात्र पिब[illegible]लात्कारेण । तेनालस्यातिशयः चकारो भिन्नक्रमः अभिनवस्य करिणो दन्तस्य यः शकलश्छेदः छिन्नो भागः कर्णांति
घअतेहत्कांतः इदं तस्य कोमलत्वेनाशुरक्तसंबंधान्नु धवलत्कक्रमिश्रवर्णलाभः ईदृशोपि निःकलंकस्य कलामात्रावशिष्टस्य
विधोर्लक्ष्मीं शोभां च कलयति अनेन क्षामता एकपार्श्वशयनाच्चैकस्यैव किंचिदवच्छेदेन रक्तता किंचिदवच्छेदेन पांडुतेति कपोल
इत्येकवचनं आभाम पि न शोभा द्युतिरिति कांतलक्ष्मीपदव्यंग्यं १९ अंगम्लानत्यादीति पाठः दूरादिति निराकरणेन प्रसादनानिवृ
त्तस्य नायकस्य पुनरागमने जातभावायामातित्याश्च कृतः क्रियावर्णनमिदं उत्तकमित्यादि विशेषणानि चक्रुरित्यनेनान्वियंति । ता
नि च प्रपंचचतुरं चटुजातमित्यस्योपपादकानि दूराद्दृष्टे इति शेषः सर्वसमक्षं तानां प्रेयसीत्यत्र संबंधः उत्तकं इतो त्यत्रयानीति शंक

का॰टी॰ ३१ योक्तं ठाण्ण्चकचेष्टाविशेषशालि आगतेसमीपं प्राप्तेविवलितं दूरतः पश्यंत्याममेत्तुकाममनेनज्ञातमितिलज्जया तिर्यक्कृतं॰ पू
र्वनिराकरणाल्लज्जयासंकुचितं वासंभाषितिः॰ निराकरणोपायेवमुखेन अपूर्वालापेनवाहर्षोदयाद्विस्फारितं विकसितं॰ संश्लिष्ट
मिति॰ चाटुविनेतालिंगनेच्छयासंनिधिंगच्छति॰ अप्रमाद्येवस्पर्शमिच्छतीतिक्रोधाद्विभीवादकरणम्॰ अतएवक्रोधात्सविधंसत्काम्यस्थानां
तरंयांत्याश्चेचलग्रहणं॰ किंचेतिसमुच्चयार्थः किंचिदित्यर्थोवा॰ तथाभावश्चचाटुकरणंविनैवोत्तरोत्तरं तन्नचेष्टापहृतिजन्यास्यायाचरणा
नतिः चरणशिरःसंयोगः तस्यव्यतिकरेसम्बन्धेत्वयाएवमाचरितंमयाकंठिगयानत्तोऽवमित्येवंरूपप्रसादोदयात्तचाष्यांतुततःपूर्वंत्र
स्त्ययादिभिः कण्ठिगोचेनासिद्धरीभावाभावात अनुपदंगजल्पस्तचेनाय॰ इन्द्रगणपदंगोलकपरंचक्षुःपदंतेजःपरं॰ विपरीतेनवा॰ आ
द्येश्रोतकादीनांतेजसिमत्वपरंपरयावोध्यं॰ अन्त्येगाष्यांतुपूर्णात्वपरंपरयावोध्यंअतोभेदात्तवक्रञ्जीहेनोनुपपत्तिः गाष्यांतुप्रगेकृत्वा
दितिपाठस्त्वनुगमः अहोइतिचानुर्वदर्शनाद्विस्मयेप्रपंचोविचित्रव्यापारवाक्जल्पंतत्रचतुरंकुशलंजानासि॰ नतुकृतागासि॰ प्रेय
सि॰ प्रीतिपात्रेनपतिमात्रे ३० प्रमादानामिति॰ यद्यपिप्रमादोनव्यभिचारिषुगणितः तथापिमनःप्रमादोहर्षःस्यादितिहर्षएवात्रप्र
मादोविवक्षितइत्याहुः अनिर्देशादितिज्ञातागमीतिविरुद्धधर्मतयानिर्देशाच्चेत्यपिबोध्यं॰ आक्षेपोवाजनाअतोसाधारणेपीति
पाठः इतरहृणमिति॰ तत्राद्येप्रणतिरनुभावः प्रमादप्रार्थनोत्रेपास्तणसंचारिणी॰ द्वितीयेमालतीमाधवेविभावोपकरणगम्योस्त्री राम॰
नत्वादिगम्या चिंताव्यभिचारिणीतृतीयेमानिनीश्रेयांसोविभावोचरणानतिरनुभावइतिबोध्यं द्वादशेतिप्रेयांसदांतोहृतेःसद्भव ३१

31

कृपमाणानवेत्यर्थः तत्रस्नेहप्रकृतिः प्रेयांसः अयमेववात्सल्य इति गोध्यं धैर्यस्थायिभावको दांतः । गर्वस्थायिभावउद्धतः । निंदादितः
पेरावज्ञा गर्व इत्युक्तः । अशाविति · एतेत्रयस्तु भावोत्तर्गता इति भावः । एतेनाभिलाषस्थायिको लौल्यरसः । श्रद्धास्थायिको भक्तिरसः ।
स्पृहास्थायिकः कार्पण्यरसो रसोतिरिक्त इत्यपास्तम् । अनभिनेयत्वादिति · सर्वविषयोपरमस्वरूपत्वान्नस्येति भावः गीतवाद्यादेस्तद्वि
रोधित्वाच्चेत्यपि बोध्यं अभिमानादितिपाठः अभिधानादितिपाठे हृद्यैरितिशेषः यदेति अत्रपक्षे शांतोपि नवमो रस इत्यतो नह्यकामा
रांनायकाव्यसाधारणात स्याप्यभिनेयत्वस्यवक्ष्यमिरंगीकारादितिभावः गीतादिकमपि तद्विषयं नततद्विरोधित्वादुक्तः तत्क्ष्यमिति
रसत्वे स्वरूपतापत्तिः दुःखकार्यस्याश्रुपातादेरनापत्तिश्च · अरसत्वेन तत्काव्ये सहृदयानां प्रवृत्तिर्नस्यादितिभाव दुःखमय इति ·
शोकाद्युद्बोधकत्वान्नत्वंपार्यंतिकेति अत्रोपपत्तिः प्रागुक्तैव भावनया वर्णनीयमपीभावेन शोकस्यतत्कार्याश्रुपातादेश्चनानु
पपत्तिः आनंदांशस्योत्कटत्वेनोत्कटेच्छाविषयत्वेन शोकाद्यंशे बलवद्द्वेषाभावात्स्वहत्तेरपि नानुपपत्तिः वर्णनीयशब्देन च लौकिक
रसाश्रयादिरुच्यते इति बोध्यं सुखसंवेदनं सुखजनकत्वेन ज्ञाने अनुकूलाविति · नचेदं नायिकानायकयोरेकतरमात्रदर्शना
दिरूपे व्यंग्ये संभोगेऽव्याप्तं रतिप्रकृतिकत्वे सति विप्रलंभभिन्नत्वे तात्पर्यात् तत्ररसाभासः एवेत्यपरे गणीय इति इदं चिंत्यमेक
एवेति · संयोगत्वसामान्याभिप्रायेणेदं · तच्च उपदर्शितं · प्रकर्षमिति विभावादिसंवलितत्वमित्यर्थः नचेदं नायकप्रसाद्यमानमा
निनीनायिकाविप्रलंभेऽव्याप्तं रतिप्रकृतिकत्वे सति संभोगभिन्नत्वे तात्पर्यात् · तदानीं तस्मिन्नविरुद्धहर्षमेयप्रसादमीष्टत्वानाभा

का·टी· वेन न दोष इत्यन्योन्यहेतोरिति · एतेन स्वरागादर्शनादपि मिथः संरूढरागयोः दशाविशेषसंप्राप्तिः पूर्वरागः स उच्यते अभिलाषचिंता
३१ स्मृतिगुणकथनोद्वेगसंलापाः उन्मादो व्याधिर्जडता मृतिरिति दश दशा इत्युक्तेः पूर्वरागविप्रलंभाय दर्शनानन्तरं तो मिलाषो न विप्रलंभ
जनक इत्ययास्तम् ईर्ष्ययेति · प्रियेण सपत्नीरङ्गे कोप ईर्ष्याजनितहेतुको मानः प्रणयहेतुको वा मानः यथा भूषणादिलाभेच्छायां · म
32 इति · उभयरूप इत्यर्थः प्रवासः · ईर्ष्या प्रवासशापरूपं · विरहेति · गुरुलज्जादितः संगमप्रतिबंधो विरहः अन्येवेति विप्रलंभ एवेत्य
र्थः अयं च सर्वोऽपि नायकाविषयः यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनर्लभ्ये विमनायते यदैकस्तदा भवेत्करुणविप्रलंभ इत्यु
क्तेः शोकस्तत्र व्यभिचारी बोध्यः अत एव संगमप्रत्याशाकालिकत्वादत्रत्यादौ विप्रलंभ इत्याहुः प्रत्यग्रमिति · प्रथमावतीर्णमदन
विकारस्तु रक्षावर्णनमिदं · वासगृहं शयनागारं शून्यं · निर्जनं तत्त्वेन ज्ञातमपि निभृतसखीसत्त्वशंकया विशेषेण दृष्ट्वा · किंचित्
अपरकायेन · न तु सर्वतः निद्राभंगे पार्श्वपरिवर्तनेन समाधातुं शक्यत्वात् शनैः वलयादिक्वाणेन मिषः संदानितोत्संगो मे
रागवाप्रियतम निद्राभंगो यथा न स्यात्तथा उत्थायेति संबंधः अनुरागजिज्ञासया निद्राया व्याजं मिषमुपागतस्य प्राप्तस्य नवव्या
जेन निद्रां · सर्वथा तदसंबंधात् · सुचिरं यावदुद्विवेमतं · अत एव निःशेषतो वर्णयित्वा · अनुरागातिशयात् · पत्युर्न तु प्रियस्य तथा
विधवर्णनायामपि निद्राव्याजस्य हि स्फुटत्वात् सुचिरमिति वहुकालमित्यर्थः कमपि विस्रब्धं विश्वस्तं एतावता पूर्वभंगेन निद्रायां वा रा·म·
ला विकलत्वभ्रमात् परिचुंब्य परितः कपोलयोर्नेत्रयोश्च चुंबनं कृत्वा पुलकस्य सर्वांगीणत्वेपि गंडस्थल एव दर्शनादाह गंडस्थलीता ३१

दि॰ गंडस्थलीत्वेन पुलकस्यांकुरताऽत्र गंडेत्यश्लीलं लज्जानत इति लज्जाप्रथकादं॰ पञ्चादितादेव॰ लज्जावती॰ लज्जनक्रियया

समानकर्तृकत्वेन आलोकोतित्कोपपत्तिः अन्यानि त्वांतान्यप्येतदपेक्षयापेव अन्तस्थवनस्रपुरवी लज्जाराहित्य हेतुशेदान्य

व्याहृतये कालेति मुग्धे स्वार्थकं हस्तात वसर्वरहस्यमवगतमिति वा पूर्वं मनसार्थनयापि न प्रश्नासि इदानीं कथमिति वा व्याजनि

द्राफलंमदिति देवलब्धमिति वा हासः अत एवाविरोधाचिरं लज्जापगमः संभोगस्वीकारस्यापावश्यावतयर्थं तं चुंबितेत्यर्थः सहृदिकमल

धनगृहणाय चिरमिति चक्रवर्ती अत्र अन्यामित्यनेनोद्दीपनातिशयः चुंबनप्रवृत्तियोग्यताच॰ वासगृहमिति स्वकृतं दनादिसंपत्तिः

यत्तुरितिपुक्तानुरागित्वं॰ विश्रब्धमित्यनेन रागातिशयादविमृश्यकारित्वं॰ नम्रेत्युक्तं न तु नामितेति॰ तेन लज्जयातत्यागविरुक्तत्वं यथान

मनेपशाङ्किरिति अत्र लज्जाहासयोर्व्यभिचारिरागः स्वपदेनोपादानं चिंत्यं अत्र यद्यपि परस्परस्यालंबनत्वेन उभयोरपि रतिः प्रतीयते

तथापि नायकविषयिण्या नायिकारतेरुद्रेकस्य वचर्वणाविषय इति सहृदयसाक्षिकं॰ अत्र नायक आलंबनं॰ शून्यगृहं नायकानिद्रा

द्युद्दीपनं॰ मुखनिर्वर्णनचुंबनाद्यनुभावः लज्जाहासव्यपहर्षादिर्व्यभिचारिभाव इत्याहुस्त्यम । पूर्वं रक्ताभवेन्नारी पुमान्पश्चात्तदिं

गितैरित्युक्तेर्नायिकारब्ध उदाहृत्य नायकारब्धमुदाहरति॰ नमुग्धेति मुग्धाङ्गि सुंदराङ्गि॰ कंचुकिवजगन्मनोवशीकरणात॰ अत ए

व कंचुलिकावैयर्थ्यं॰ न केवलं कंचुलिका नप्रसारणे शोभा तु त्वत्रिरपि न विद्यमानशोभा तिरोधानमपीत्येवकारघोत्यं॰ मनोहारि

णीमिति ताडी लोपेरिणितिः लक्ष्मीः शोभा॰ प्रियतमे इतिशय प्रीतिपात्रेनानुपेक्षणीयत्वं॰ तहारिका कंचुलिकायं धिः मोचनायजनतस्मै

का·टी·
३३
33

स्पर्शे सखीसार्थोऽन्यज्ञयापृष्टो यांते निविष्टानि तिष्ठसंलग्नासा चासौ ऽस्मितवती सखी आलीजनस्य नायिकैव तस्याने चोक्तवत्युक्तवत्य
ता तेनानंदितः स स्मितेतस्यनेनकं उलिकापसारणास्वरसः अलीकवचनेशठकः पाठनीयः सारिका भोजनीयेत्यादिशने स्वं अलीकवच
नोपन्यासस्य सार्वीरहस्य ज्ञानगोपनेन तस्या लज्जातिशयपरिहाराय मुग्धाङ्गी आलंवनं नयनसौंदर्यमुद्दीपनं आभाषणावीटि
कास्पर्शावनुभावौ अभिधानवीटिकासंस्पर्शयोस्तत्स्वकालत्वात्वलाः उत्कंठादयस्संचारिणः ३३ प्रेमार्द्रा इति प्रेम अयं ममअ
हमस्येत्याकारकः पक्षपातविशेषः तेनार्द्राः स्निग्धाः सप्रणयावलोकनादिनाप्रकर्षं नीताः अपराधसहत्वेरप्यविचालितोवाप्रणयः त
द्युक्ताः परिचयादुद्गाढसंगात् उद्गाढं निःशेषमुत्सारितगुर्वादिपारतंत्र्यः रागस्योदयो याभ्यः परिचयातिशयेन रंजनक्रमः प्रणयप्र
रागः निसर्गमधुराः स्वभावमनोहराः या ताः आशंसया मनोरथेन कल्पितास्ताः अपि न पुनरनुभूता स्तुमत्तत्वात्स्वकरणस्य च स्मरादेर्भी
पारं विषयग्राहित्वरूपाणहीतितारहशोऽतःकरणस्य मनसः आनंदेन सांद्रो निविडोलपन्नस्यत्वं भवति मुग्धदृशस्तस्याः तेषाः दर्श
नहसिताऽलिंगनादिरूपाइत्यर्थः मालती प्राप्तौ श्मशानसाधने प्रहृत्तस्य माधवस्याभिलाषोयं अत्र मालत्यालंवनं तद्विलासानुस्म
रणमुद्दीपनं आशंसानुभावः तदंगोत्कंठासंचारिभावइति ३३ सापत्युरिति काचित्सखी हन्नांते कांचित्कथयति सा बाला य
त्पत्युर्निजप्रियस्यानन्त्वेपराधयोगात् प्रथमत्वेनात्यंतासह्यता द्वितीयादौ त्वात्वर्यं संभवात्तातु किं अपराधोन्यांगनासंगमरूपः सखी
नसौहार्देन करणेनोपदेशः तं विना तदभावात् साचोति कर्ज्ञैरितहनीयात्त्ववनप्राचाधात उभयोः प्रयोगाभावेनो भयप्राप्य भावाज्ञ

राम॰
३३

33

त विभ्रमसंगस्य भ्रुकुट्यादेर्वञ्चनाविकीकरणं याश्च वक्रोक्तयः ताभिः संस्तवनसमर्थान्मानस्य प्रकाशनं नो जानातीत्यर्थः तर्हि किं क
रोतीत्यत्राह केवलमिति · अश्रुभिरितीत्थंभूतलक्षणे तृतीया · अश्रुज्ञाप्यं केवलं रोदनमेव करोतीत्यर्थः रोदनं त्वश्रुजनकीभूत अं
तरो व्यापारः शब्दप्रयोगादिरूपकांतरव्यवच्छेदायाश्रुभिरिति · केवलमेवेत्यत्राय समुदाय इति दीपिका · अंजनपत्रावलीगमनाद
श्रुकपोलयोः स्वच्छता · तेन रोदनाधिक्यं ज्ञानं शायनान्मलेन गलनं · लुंठंती विप्रकीर्णा लोलाश्चंचला येलकास्तैरुपलक्षिता वाले
त्यर्थः अलकलोलतामङ्गत्वादेतस्यास्तादृशा · पर्यस्ते परदर्शने लज्जयापरितः क्षिप्ते इत्यर्थः यद्वा आस्फालनात्रेववेउत्पलत्वारोप इति तन्न
। उत्पलपदस्य रक्तत्वविशिष्टेऽशक्तेः रक्तोत्पलं कोकनदमित्यादौ रक्तपदवैयर्थ्यापत्तेरिति दिक् शतिरालंबनं · अपराधउद्दीपनं रो
दनाद्यनुभावः तद्धंशा ऽ तृयाद्व्यभिचारिभाव इति अत्र पत्युरन्यासंगाद्बालाया ईर्ष्या ३५ प्रस्थानमिति · हे जीवित · प्रियतमे यातुं गंतु
निश्चितचेतसि न तु गंतुमुद्यते न वसुहृदः प्रियसमसंप्रस्थिताः तथा च त्वयापि गंतव्ये सति · प्रियस्य नायकस्य सुहृदां च सार्थः किंतु कु
त स्त्यज्यते · अवश्यमेव प्रियसुहृद्वियोगेन त्वयापि गंतव्यमेवेति सार्थत्यागेन विलंबकरणं हृथ्येति भावः गंतव्य इत्यावश्यके तव्यः के प्र
पूर्वदेशसंयोगध्वंसहेतुविभागजनकः संयोगह्रासस्य संयोगत्वतः सिद्धत्वेन स्वरूपतस्तस्याविधेयत्वेऽपि तादृशक्रियोपरागाद्वि
धेयतेति भावः नन्वेवं स्वतः क्रियारूपस्य होमस्यैव विधेयतास्यादत आह तत्र स्वेति होमस्याग्निहोत्रं जुहोतीति वाक्यात्प्राप्तेरिति भा
वः शास्त्रेण प्रतीयत इति विधीयत इत्यस्यार्थः नत्वप्राप्तमपीति भावः शेषेण प्रकारेण स्थं वाक्यमुदाहरति लोहितेति अध्वर्युहरणीत इ
त्यादिभिर्लोकोक्तितोऽप्राप्तत्वात्तेन विधेया इत्याह नतिसि नतु सोऽस्मिन्नातिवीतवसना ऋत्विजः प्रचरन्तीति वाक्याद्दुत्सीयोऽपि
प्राप्तमित्यत आह तस्यापि प्राप्तापीति नतु दधीति साधनद्रव्यत्वेनान्वेति तस्याप्राप्तेरिति भावः हवनेनेति अग्निहोत्रं जुहोतीति वाक्ये
न तस्यापि प्राप्तत्वादिति भावः शब्दोपात्तेति शब्दोपात्तविधेय एवेत्यर्थः तात्पर्यं प्राप्तक्रमाणनियामकं एवं च तथ्यस्य शब्दोपा
त्तत्वाभावात्सर्वत्र विधेयत्वाभावाच्च न तत्र शब्दप्रामाण्यनियामकं तात्पर्यं नापि शक्तिरिति भावः समानसंविदिति तस्य प्रति
योगिनि नित्यसाकांक्षत्वादिति भावः तात्पर्यस्यादिति एवं च अन्यलभ्यत्वेनापदार्थे तत्रापि पूर्ववृत्तस्य शक्तिसाधकं तात्पर्यं स्या रामः
दिति भावः तात्पर्यादिति एवं च तद्वाक्यवत्त्रिपदोपस्थापितातिरिक्तेऽपि तात्पर्यदर्शनाद्धारेपार्थेऽपि स्यादिति भावः एकमेवेति स्वतद्वक्त ६९

स्य विषं भक्षयेत्यस्य स्वार्थेऽविश्रांतस्य साकांक्षतयेत्यर्थः नायादिति एवं च समस्तेन यथा गुणयोः संबंध एवं प्रधानयोरपि सम
स्तेनैव परस्परमन्वयः स्यादित्यर्थः भवितव्यमेवेति सत्तान्वयोऽनसाकांक्षात्कर्तृकर्मभावादिनाबाधात नापि मुख्यार्थस्य सादायपरस्परो
पपादकत्वात् तत्र विषभक्षणवाक्यस्य स्वतस्त्वहाक्यते न मुख्यार्थबाधादतः तस्यैव गौणता लक्षणाश्रयणेन कल्प्येति तत्र विषं भक्षयेत्य
स्य विषभक्षणाधिकवत्तदनिष्टानुबंधित्वविशिष्टे तत्र गृहभोजने लक्षणा तस्य च माभास्येत्यादिवाक्यार्थे संबंधोऽस्त्यर्थस्य बालितेऽ
न्वये नान्वय इत्याशयेनाह तत इति तत आर्थत्वेन वाक्यस्वार्थे न विश्राम्यतीत्यथा देवदत्तस्य हक्तकतानत्रामुख्यार्थता स्याल्लक्षणा
यत्र तु स्वार्थबोधानन्तरमितरस्वतीयते तत्र व्यंजनेवेति व परट्कार्थः तत्रस्वप्यायामा इति किं तु गुरव प्रसादानुमेया इति भावः अभिधे
वस्यादिति दीर्घदीर्घामिधाव्यापारे गौणत्वस्य तीति सिद्धेरिति भावः बीजाभावादिति तिलं हेत्वर्थो बोधकत्वे हि तद्बीजम् तत्वविस
द्धयोरिति यत्रैकस्यैव पदार्थस्य प्रमाणान्तरान्पदार्थ [illegible] संबंधो बोध्यते तत्र तयोर्विरोध इति भावः एकस्मिन्नर्थे विशेष्ये. एतदुत्तरत्रो
पपादयिष्यामः कार्यांतरापेक्षेति कार्यांतरमिति कर्तव्यता. एवं च संनिधाज्ञातपदार्थसंबंधापादके निकर्तव्यताकांक्षा वस्तुधी
न वचनं प्रकरणं इदं कर्म प्रकरणसाधारणं प्रकरणं लक्षणं सर्वसाधारणं त्वाकांक्षायामिति कर्तव्यता विशेषणाराहितमेतत् तत्र
क्वचिदाकांक्षा वशेन संनिहितवाक्यांतरसंबंधः प्रकरणमिति व्यवहारः क्वचिदाकांक्षैव प्रकरणमिति व्यवहार इति बोध्यं दर्शपौर्ण
मासकथंभावेति षष्ठीतत्पुरुषः इदम् फलक्षणान्तेषामपि फलाकांक्षायां संनिहिते तु द्विस्थेऽपि फले तत्फलवद्उपकारद्वारा संबंधे संभ

फ़

का॰टी॰ वृत्तिकालांतरकल्पनायाश्च युक्तत्वेन तेषां संबंध इत्यपि बोध्यं ॥ सवानेकस्येति ॥ अयं यथासंख्यान्नातक्रमः संनिधानान्नानमपि क्रम

७७ त्वेन बाधव्हांति ॥ सर्वविरोधोदाहरणोत्स्पष्टः ॥ अत एवायेस्थानपद्यायतयासन्निवदिष्यति ॥ उपांशुयाजोवैष्णवः ॥ समाख्यायोगबलमि

ति ॥ इदमुपलक्षणं प्रदेशद्वयाम्नातयोः संबंधनिमित्तसंज्ञैक्यमपि समाख्या समाम्नाख्येति योगात् ॥ यथाग्निपुक्तहोमानाम् अग्नी

ज्ञेनयत्तुपजातानामिष्टादिमंत्राणां च संबंधनिमित्तमाध्वर्यवसंज्ञैक्यं यथा वोपसर्जनमहासंज्ञाव्याकरणांतरसंज्ञयासमेतितद

मित्तेनार्थस्यपाणिनीये पिप्रहणमित्यपि बोध्यं ॥ कुतो विरोध इति ॥ एवमेष्टानितत्ती यथाहें श्चाक्षचेः कंचित्स्वसंगत्वरूपशेषत्वं

बोधितं तदिंद्रोपस्थानेष्वतितत्वेप्यविरुद्धमिति बोध्यं ॥ यतः शेष इति ॥ क्रियां प्रति कर्मणाः शेषित्वे करणस्य शेषत्वमित्येव विनि

योगः सा हि विदांतः निरपेक्षा भ्यामेव द्वितीयातृतीयाश्रुतिभ्यां बोध्यत इत्यर्थः ॥ ननु एवं तर्हि वाक्येन किं बोध्यते तत्राह विशेषसं

बंधमात्रस्येति ॥ यदैंद्र्याः करणत्वं तन्नाहंपत्यकर्मकोपस्थाननिरूपितं यच्च गार्हपत्यस्य कर्मत्वं तदैंद्रीकरणकोपस्थाननिरू

पितमित्येवं रूपेत्यर्थः ॥ विशेषमप्येष्टोतिलचैवं वाक्यार्थस्यैव लिंगेन विरोधः श्रौतस्य शेषशेषिभावस्य विशेषसमर्पणेन वाक्य

स्य गुणतया श्रुतेः प्रधानतया प्रधानेन च विरोध इति लिंगविरोधो दौर्बल्यमित्याशयात् ॥ यद्बावलीयसा लिंगेन यस्य वाक्यस्या

र्थो बाध्यते तल्लिंगेन विरुध्यते न चात्र तेन वाक्यं बाध्यं किं तु द्वितीयाश्रुतिः सामीप्यलक्षणया बाध्या ॥ वाक्यं तु तथैव ॥ नहि वा राम॰

क्यलिंगविरोधोदाहरणे लिंगबाध्यस्य स्थानं तत इत्यादेः स्तुमत्स्य मानद्रूत्यंतवाक्यस्योदाहृतवाक्यस्य लिंगेन बाधे वाक्यद्वयकल्प ७७

६३

नेत्याशयः उपाख्यातव्य इति ः प्रकाशयितव्य इत्यर्थः उपपूर्वान्निषतेर्मंत्रकरणकेऽर्थे वर्तमानादुपान्मंत्रकरणे इत्यनेनात्मनेपदं
मंत्रकरणकोऽर्थश्च नवप्रकाशनातिरिक्त इति शेषः वस्तुतस्तु कृत्वा कश्चिद्धि नियुक्तस्य लिंगेनान्यत्रापि विनियोगो स्यादित्येव पूर्वः
पक्षः यथा ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेतेति वाक्येन फलार्थं तया विहितोऽपि बृहस्पतिसवो वाजपेयेनेष्ट्वा बृहस्पतिसवेन
यजेतेति वाक्येन वाजपेयप्रकरणान्नदंगत्वेन बोध्यते वाक्यं प्रबलमपि न संनिधिं बाधते विरोधाभावात् न हि बलवानित्येव साधू
न्बाधत इति बोध्यं अन्यथानुपपत्त्या अन्यसमर्थेन तस्यान्यथानुपपत्त्या यथा दाहे जाते वह्नेर्दाहशक्तिर्ज्ञायते न दाहकत्वं वह्नेः शक्तिज्ञानापे
क्षं तथा श्रुतेः शेषत्वे ज्ञाते तं तरमर्थं तादृशी शक्तिरस्तीति ज्ञायते तेनार्थगतसामर्थ्यज्ञानं विनियोगकारणमित्यर्थः उपजायते इति
प्रतीयत इत्यर्थः वह्निना सिंचतीत्यादौ तु सामर्थ्यस्याबाधाद्प्रामाण्यमिति भावः प्रकरणेति अग्निचयनप्रकरणे इत्यर्थः अन्यथा
नुपपत्त्या इंद्ररूपाभिधानान्यथानुपपत्त्या कृतार्थेति शाखान्तराकांक्षायाथाकथंचिदुपस्थितार्थेनानिवृत्तेरिति भावः प्रक्रांत
व्यापारमित्यस्य प्रतिपदेति शेषः प्रकरणे (प्रकरणे) प्रकरणाम्नाने कथा किं सर्वं विध्या कस्यानुपपत्त्येति युक्तः पाठः कृतेबलव
त्वादित्यस्य तद्बोधितविनियोगोपपत्त्येइति शेषः परमैश्वर्यैति इदि परमैश्वर्ये इति धात्वनुसारात् श्रुत्या वेंद्र्यत्वस्य चेंद्रप्रकाशकत्वेन
र्थो न त्विंद्रोपस्थानविनियुक्तरूपेत्यर्थः तद्धि नियोगानुपपत्त्यभावात् अग्नेन श्रुत्यार्थे विरोध इति दिक् सदनं करोमीति करणोमीति
तिपाठो भामत्या मेध इति च सविसर्गपाठस्तत्र सदने सदनकरणे सादनं पुरोडाशस्यापनं यत्पदाक्षेपे तिस्त्रयं विभागकालिकसाकां

का॰ टी॰ ७१

कृत्वे हेतुः तदेकार्थावच्छिन्नत्वं चैकवाक्यत्वे हेतुः प्रकृतिप्रत्यययोरेकवाक्यतावारणाय विभागे इति नहि तयोर्विभागोऽस्ति· भगो
वां विभजत्वर्यमागं विभजत्वित्यादौ निरपेक्षे वाक्यत्ववारणाय साकांक्षमिति इदमर्थैकत्वादित्यस्य प्रत्युदाहरणमित्यन्ये· विभज्यमा
नसाकांक्षत्वं तत्रोपयमिदं ध्यानयति सा वेशदेव्यामिश्रेत्यत्रोत्तरवाक्ये तत्पदसत्वेनाविभागे साकांक्षत्वादिति व्याप्तमिति एकार्थावच्छि
न्नत्वादिति बोध्यं सामर्थ्यकल्पनेति निर्वापान्वययोगितस्यांशस्याभिधानसामर्थ्यकल्पने त्यर्थः एवं कृत्स्नमंत्रस्य पदासादनकर
णे विनियोगस्तदोत्तरभागस्य प्रतिपादनार्थं तत्रूपत हविर्विशेषाभिधानसामर्थ्यकल्पनेति बोध्यं प्रयोजनैकतयेति· विशिष्टैकार्थप्र
तीतिरूपप्रयोजने एकवाक्यपदानां च कृत्वादेकार्थत्वमयुक्तमित्याशंक्य प्रधानमिति विशिष्टार्थाभिधायेतथाचात्र वाक्यभेद एवेति
भावः ननु भावनैव प्रधानमिति कथं सदनादेः प्राधान्यमत आह तुष्टेय इति तथाश्रुतेः· प्राधान्ये· प्रथमेति· मिलितयोरेकार्थप्रकाश
कत्वमिति हेतुः एवं सत्वे त्यादाविवैकवाक्यतावशेन सामर्थ्यकल्पनमिति भावः कृत्स्नेन श्रुतिद्वयेनेति पूर्वेणासदनं कुर्यादुत्तरेणा
पुरोडाशं स्थापयेदिति एवंरूपेणेत्यर्थः तावतैव· लिंगकल्पितश्रुतिद्वयेनैव एकवाक्यताबुद्धिः तत्पदप्रयुक्ता· आभासी भवतीति· त
थाच वाक्यभेद एवात्रेति बोध्यं तथाकल्प्यमपीति पाठः तया· एकवाक्यताबुध्या· यतो यावत्तया सामर्थ्यं कल्प्यं तावत्तत् कृत्स्नलिंगेन
श्रुतिः कल्पिता यावत् श्रुतिं कल्पयेत् तावत् कृत्स्नस्य श्रुत्या विनियोगः कृत्स्न इति सैकवाक्यतैव विलीयत इति भावः नन्वेवं सत्यत्र राम॰
समवेतार्थसदनाद्यतिरिक्तपदानामेकवाक्यतानतस्यादत आह पदावांतरैरिति विरोधिलिंगं कर्मसमवेतभिन्नार्थप्रकाशनसामर्थ्यं। ७१

तत्र समवेतार्थैकपदेन द्वित्र्यापदैर्यैकवाक्यतामाऽसमवेतार्थपदांतराणां वैयर्थ्यपरिहाराय स्वानुसारेण सामर्थ्यं कल्पयतीत्यन्वयः क
ल्पयतीत्यनंतरं च भवतीति तत्र वाक्यस्य विनियोजकत्वमिति शेषः निगद इति देवतासंबंधबोधकः पदसमूहो निगदः परसंबोधनार्थं
लोडंतपदयुक्तपदसमूहो निगद इत्यर्थः अग्नाग्नाथायांस्तिति तत्र स्थसोमयाजिनो दक्षिणयमोर्भावयुक्त्वा ऐंद्राग्नः पुरोडाशस्तस्य
विहितत्वमिति भावः अग्नीदग्नीन्विहरेत्यादीति इदं हविर्जुषेतामित्यस्याप्युपलक्षणं प्रकरणादिति फलवतो प्रधानमाकांक्षा इति
विपठितस्येति कर्म्मव्यतात्वमापादयतीत्यर्थः प्रकरणं विनियोजकमिति तद्भिन्नश्रुतिरिव विनियोगमभिधत्ते किंतु प्रमाणांतरप्रमि
तां विनियोज्यपदार्थशक्तिमपेक्षते एवं च विनियोज्यस्य मंत्रवाक्यशेषस्य वाक्येनान्यत्राविनियुक्तत्वात् प्रकरणेन विनियोग इति
भावः साङ्गे ज्योतिष्टोमादाविति साङ्गस्येतस्मिन्नित्यर्थः प्रकरणोत्थाकांक्षावशादिति स्वार्थपूर्णानां वाक्यानामुपकार्योपका
रकभावेनाकांक्षावशादित्यर्थः वाक्येनेति स्वस्येति शेषः क्रमादिति प्रकरणेनेति शेषः फलस्यान्येन लाभादित्यलीयत इति श्रुतिप
तात्पर्यं प्रधानेनानाकांक्षमिति संनिहितसकलेष्टिपशुसोमरूपेत्यर्थः अभिषेचनीय सोमयागविशेषः शौनःशेपोपाख्यानं
च क्रचब्राह्मणेऽसिद्धं गामानयशाखादं पश्येति अत्र गामित्यस्य पश्येत्यनेनान्वयवारणाय सन्निधेरपि हेतुत्वमावश्यकमिति भा
वः विकल्पेति संदेहेऽभिषेचनीयमात्रे इति तद्दर्शनमुपक्रममात्रमिति भावः समुच्चयस्तु न संभवतीत्यंतिमेवोध्यस्याभिषेचनीयां
गत्वस्य तविन्नादिसकलप्रधानांगत्वबोधयतः प्रकरणेनैवबोधितत्वमिति तदसंभवइतितात्पर्यं यद्यपि राजसूयांतर्गते स्यादी

मूले वाक्येनेति पाठः पूर्वमस्ति। प्रकरणोत्थाकांक्षावशादिति पाठस्तु अंतेऽस्ति।। टीकायां तु
प्रतीकयोर्वैपरीत्यमस्ति॥

का० टी० मो विकृतित्वेन तत्प्रकृत्युपकारकत्वाकृतं गमसंबंधेन नैराकांक्ष्यं तथापि न दोषः इत्याद्याशयेनानैराकांक्ष्येऽपि राजसूयात्मनां तेषामाकांक्षा।

५२ पवित्राद्यारभ्य क्षत्रस्य धृतिं यावद्धि राजसूयः तत्र प्रकरणाद्राजसूयांगत्वेऽप्यभिषेचनीयांगत्वमस्त्वेवेति कथं वैकल्पिकत्वमि

ति चेन्न। विकल्पोक्तेरभिषेचनीयातिरिक्तपवित्राद्येवाधानांतरविषयत्वात् विनियोजनं तु पूर्वपक्षेऽभिषेचनीयायानित्यात

72 त्वाभिरेव विष्णुक्रमादिषु वैकल्पिकीति सिद्धांते तु सर्वेषु नित्यात् तत्त्वाभिरिति बोध्यं क्षत्रस्य धृतिर्यं तत्र विशेषः इत्यस्यार्थः कथं स्यादि

त्याकांक्षा इति कृत्स्नव्यत्याकांक्षा। सर्वदेति। राजसूयस्य समाप्ताकांक्षापवित्राद्यारभ्य धृत्यंतासिद्धानुवर्तते अभिषेचनीयसंनिधिना

त्वेत्याप्यानदानीं। तेन सहोद्धृतस्थितत्वे राजसूयाकांक्षाऽभिषेचनीयसंनिधानयोराद्याशीघ्रविनियोगफलं लभते इति भावः

उत्तरापेति। सर्वाक्योपात्तपदार्थैस्तस्य निराकांक्षत्वादिति भावः केचित्तु अभिषेचनीयप्रकरणमध्ये स्योपाख्यानेऽमहाप्रकरणा सपाठेन ७

दंतरप्रकरणस्य बलीयस्त्वेनाभिषेचनीयांगतया शुनःशेपोपाख्याने ह्यात्माकृत्वा चिंतयेदमत्रोदाहरणमित्याहुः दूर्वार्थ इति

सायन्नायस्यादर्शार्थत्वात् सान्नाय्यं दक्षिणपयसी। पुरोडाशसंबंधानीति। इदमर्थानोतिभावः तान्यपि क्रत्वेति यद्यपि पोरोडाशा

न्यपि नितितस्य व्याख्यानं इत्यधिकारे पठितं तथापि मंडूकप्लुत्याधिकृत्यकृते इत्यत्रानुवर्त्य व्याख्येयमिति भावः ष्टइन्नमपि कृतं भव

तेवकृधातोः सर्वधातत्वेनुप्रस्तुतत्वात् वस्तुतः शेषिकेंर्थाध्यात्मादित्वात् ठञिति बोध्यं प्रकृतितद्धितैकस्तुतिन इत्यर्थः न राम०

पौराडाशसंबन्धेनितिपाठः किं तु पौरोडेतिपाठः वैशेष्यान्यथेति पदार्थान्तरस्यपरसंबंधोऽनेमेयइत्याशयः न चातिरिक्तवैशि ५२

स्यकल्पनेमानाभावेन न संबंधिनमेवाह तत्राप्याह सोपीति तद्वाचकत्वपक्षेपि संबंधसामान्यमेवक्ष्यत्वालभ्यते न तु विनियो
गस्य शेषशेषिभावरूपइत्यर्थः संबंधोपि कांडैनैव न मंत्रविशेषस्य साकांक्षात्कर्मविशेषेणेत्याह तद्वारेणेति तदवमानं संबंधसा
मान्यानुमानं न तु विशेषानुमानमिति भावः क्रमादेकमिति· समाख्या हि संबंधनिबंधनाऽसंनिहितेन संबंधायोगात् तत्सि
ध्यर्थं संनिधिरूपं क्रमं कल्पयतीत्यर्थः न तु समाख्यया संनिधानान्तरूपक्रमकल्पनमयुक्तं मन्यत्राम्नानामन्यासंनिधाना
म्नानकल्पनस्याशक्यत्वात् तथा संनिधिना कांक्षाकल्पनमपि न युक्तं संनिधाभावेपि पुरोडाशपात्रशुंधनस्यानुष्ठानामस्य
न्निजनकाकांक्षामत्वात् तथा कांक्षायैकवाक्यताकल्पनेन च न युक्तं शुंधनप्रकाशकमंत्रविनियोजकविध्येकवाक्यत्वापेक्ष
णोविविनियोज्यपदार्थरूपमंत्रैकवाक्यत्वानपेक्षणात् वाक्येन सामर्थ्यकल्पनमपि न युक्तं शुंधनप्रकाशनसामर्थ्यस्य
स्फुटतरत्वादिति चेन्न· क्रमशब्देनानुष्ठानसंनिधेर्विवक्षितत्वादन्यत्राम्नातस्याप्यन्यत्रानुष्ठानाविरोधात् तेन च संनिध्यनुष्ठी
यमानमंत्रविशेषाकांक्षारूपप्रकरणकल्पनं तस्याप्राशासिद्धेः तेन च पुरोडाशपात्रशुंधनविधेः प्रकाशप्रकाशभावेनैव मं
त्रसंबंधमात्ररूपमेकवाक्यत्वं कल्पनीयं ततस्तत्प्रकाशकत्वनिर्वाहाय शुंधनसामान्यप्रकाशकस्यापि मंत्रस्य पुरोडाशपात्रशुंध
नप्रकाशनसामर्थ्यं कल्प्यमित्यदोषात् प्रत्यक्ष एवेति· वैदिक एवेत्यर्थः समाख्यात्पाठककृतेति भावः प्रकरणांशेन्नाप्यपा
त्रविषयाकांक्षा· अधिकरणपंचकार्थं ह्वोक्तां संकलयति एकेति लिंगस्यैकयाश्रुत्याश्रुत्यर्थं विनियोगं प्रत्यंतरयोर्व्यवधानेन

का·टी· त्वादिति वैषम्यं प्रतीयते वाक्यस्य द्वाभ्यां लिंगश्रुतिभ्यां प्रकरणस्य वाक्यलिंगश्रुतिभिरिति त्रिभिरित्यादिक्रमेणोत्कर्षः सोऽपकर्षो
७३ यत्राध्यवाधकं भावं दृष्टो चेदर्शयति तावित्कैवेति वाध्यत्वं पूर्वापेक्षया वाधकत्वमुत्तरापेक्षया अयं चाप्राप्तवाधस्य· तं प्रमाणेन क
तेतिनियोगेऽत्तरप्रमाणाप्राप्तप्रसक्तेः प्राप्तवाधस्तत्रैव कृतविधिशक्यशोवे गातिदेशेन कुशमलाहिंसाप्रसक्तवावहननादेर्हारलोपा
दिना योवाधः स इति मीमांसकमर्यादा· वस्तुतः सर्वोऽप्यप्राप्तवाध एवेति प्रपंचितमन्यत्रास्माभिरित्यलं पल्लवितेन अन्विताभि
73 धानवादेऽपि नहाद्येकदेशिमतेऽपि न तु निःशेषेति विधौ शक्तिरेव तस्य प्राप्तत्वेन विधेयतया तात्पर्यविषयत्वात् प्राथमिकार्थ
वोधाद्वाक्यस्य विरामस्तेन विवक्षितार्थावोधात् अन्यथावांतरवाक्यार्थवोधे महावाक्यार्थवोधो न स्यादेवं शब्दश्रुतेरनं
तरं यावानर्थः प्रतीयते न स केवलया अभिधया प्रतिपाद्यते किं त्वाकांक्षादिसापेक्षयेति अस्यादेः पूर्वपूर्वसहकारेणोत्तरोत्तर
स्य वोधकत्वमिति तत्र विरोधोऽपि न वक्त्रादिवैशिष्ट्यसहकारेण क्वचिदभिधाया अज्ञातार्थाप्रयुक्तयोगेऽस्त्विस्यत आह
किंचेति दुष्टत्वं न स्यादिति तदर्थस्यान्यानन्वितत्वेनाशक्यतया व्यंजनानंगीकारे तदनुपस्थित्या तस्य परित्याज्यत्वं काव्ये न स्या
दिति भावः चिकुर्षीत्यंतर्वर्त्यंकुरः न चानुभाविकी शक्तिरेवान्विते स्यादिति कात्वनन्वितेऽपीति चिंक्कादिपदस्याप्रस्तुतार्थस्मारक
त्वात् दुष्टत्वं स्यादत आह किंचेति कावज्र इत्यास्त्री कर्तव्यमिति पाठः अपिशब्देन कष्टत्वपदेनात्र श्रुतिकटुत्वं प्रसंगादिति· रामं·
असाधुत्वज्ञानवत् यदि श्रुतिकटुत्वादेरपि वाक्यार्थज्ञानविघटकता तदा सर्वत्र चमत्कारस्य वाक्यार्थज्ञानाधीनत्वात्तदभावेच ७३

मत्कारणाभावेन नित्यदोषत्वमेव तदविघटकत्वे तु दोषत्वमेव न स्यादिति भावः अनुकूलत्वमिति तदुक्तौजोगुणाभिव्यंजकत्वे नो
त्कर्षकत्वात् शृंगारे तर्हि शैथ्योजोगुणाभिव्यंजकत्वेनापकर्षकत्वा इति भावः हृद्यमिति संप्रति हृद्यं शुद्धमेकमेवेत्यर्थः नचिन्ता
कोति वीरद्योतकत्वादिति भावः किंत्विति नच कपालसंबंधबोधकत्वाद्विशेषः तत्संबंधमात्रबोधस्याविशेषकत्वाभावात् एवं
ऽपनोपगमे तु कपालसंबंधकृतमकलामंगलनिधानत्वउराचारत्वस्पर्शसंभाषणाद्युन हेत्वाद्यवगमेन भगवतो वीभत्सालंबनत्वेनानि
दानेशयवोधनान्नत्संगार्थिनां शोचानातिरेकद्वारेणानत्रपार्वत्याभावनिहेत्रौतत्पदंश भवतीति तस्य काव्यानुगुणत्वेति भावः सर्वैः
विदग्धाविदग्धैः एकस्येवेति शक्यतावच्छेदकस्यानियतत्वादिति भावः अनियत इति शक्यतावच्छेदकानैयत्यादिति भावः राज्ञ
इत्यादिषष्ठ्यंतानां कृत्यप्रत्ययेनान्वयः तत्र सकारणवशादिति अनेन सर्वोन्यत्रेति सर्वबोधापादनेन निरस्तं प्रकरणोत्सपलेक्ष्यरां
वक्तृबोद्धव्यवैशिष्ट्यादीनामपि च यमेवेति ज्ञातवैधर्म्यमेवान्योन्याभाव इति मतेनेदं कारणभेदस्य विरुद्धधर्मरूपभेदस्य हेतु
रिति भावः मात्सर्यमिति मात्सर्यं एकतरपक्षपातेनेतरस्याहृद्यां उत्सार्यत्यक्वामपि विगाप्रशनादिना क्लेशदानात मात्सर्यं परगुणाद्वे
षस्तत्त्यक्त्वाविचार्यं नत्ववहेलनया समर्यादं प्रमाणमर्मादासाहितं यथा तथा सप्रमाणमिति यावत् कार्यं कर्त्तव्यं उदाहरंस्तु समुत्क्रि
कं कथयंत्विति शेषः आर्याणां उत्तररूपं उत्तरार्धं एतेन सम्याप्तेनेवेति किंम्पुरुतेति च संशयार्थकं पश्चान्निलवः हृीकद्यां करको हृी
निर्ते चोद्वेरितिवामरः अवापानतः संशयरूपेणोत्तरेणाशांतेः पर्वतनितंबाप्तएवमेव्याः शृंगारिभिर्विलासिनीनितंबाप्तएवसेव्या इति

का॰टी॰ ७४

ध्वयरूपमुत्तरं ध्वन्यते ३४ कथमिति हे रावणिष्य अवतिरस्कृतीत्वानिस्तस्याश्चपरिस्कुकयतती स्थानामिधारावच्छेदनपतितमस्तकानांश
त्रूणां श्रीः स्वीकृता तत्तस्माद् दर्पः गर्वः कथं युक्त इति शेषः दर्पोयमिति छेदे स्वीकृते त्वयं दर्पः कथमिति संबंधः कथमयुक्तो दर्पस्त
त्राह ननु इति इदं स्वयत इत्यर्थः यतो निहतारेरपितव वल्लभापियासौ प्रसिद्धा कीर्तिः एभिरपगतां गैर्हीनांगैररपि वैरिभिः किंञ्चिदेवंस्व
र्गं नमिता अपितु नीतैव तथा च जीवत्येव रावणासमर्थीचत्वपिता स्त्रियायाहीनांगैः शत्रुभिरपहरणात्स्वतानां श्रीहरणोगर्वो नु
चित इति आपाततः प्रतीयमानया निंदया सकलशत्रुविनाशने नैवलोकविश्रुत कीर्त्तित्वमिति स्तुतिर्व्यज्यते ३५ संशयरूप
इति किमादिपदाभिधेयत्वादिति भावः नैव संशयो ज्ञानं तदेतद्वाक्यजन्यं न तु तत् तस्य वाच्यमिति वाच्यं संशय्यत इति संशय इति
विषयस्यैव संशयपदेनोक्तेरदोषात् एवं निश्चीयत इति व्युत्पत्त्या निश्चयपदेनापि विषय एवेति ज्ञेयं अत एव ज्ञानरूपसंशयस्य
लक्षणाभूतेर्गोतमीयसूत्रे तद्धार्त्तिककृता संशय्यते विषयोऽनेनेति संशयपदव्युत्पत्तिर्दर्शिता स्थाणुर्वा पुरुषो वेति ज्ञानेन हि ध
र्मी विकल्पितरूपत्वरूपसंशय्यत्ववान् क्रियते तद्रूपं संशयत्वमेव च सर्वत्र वाशब्दार्थ इति दिक् तदुचितेकेतिसेवाद्वयेएकाधिका
रिकत्वासंभवादेकैकविकल्पानुपपत्त्याशांतिशृंगारिभेदेनव्यवस्थितविकल्पे पर्यवसानं सचव्यापारांतराविषयत्वाद्व्यंग्य इति
भावः निंदारूप इति उक्तरूपः स्तुतिरूपः सकलशत्रुविनाशित्वादिरूपः प्रवेहीति वाच्यप्रतीतेर्व्यंग्यप्रतीतिकारणत्वादि राम॰
ति भावः शब्दैकदेशभूतकाकादीति ध्वनिविकारस्य काकुत्वादिति भावः आदिनापदैकदेशप्रकृतिप्रत्ययादि तदर्थः त्रिवि ७४

७४

धोऽपि संघटनारचनाकोशादिमात्रेणेति तज्जन्यबोधकत्वज्ञानमात्रेणेत्यर्थः कार्यभेद इति वाच्यबोधनतोऽव्यपदेशः व्यंग्यबो
धेन विदग्धव्यपदेश इत्यपि कार्यभेदो द्रष्टव्यः कस्य वेति कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरं सभ्रमरपद्माघ्राणशीलवा
रितवामे सहस्वेदानीमित्युक्तायाउपपत्तिः दृष्ट्वाधरं नीकृत्य रुष्टे प्रोषितागतेपत्यौ सख्या निरपराधत्वबोधनाय तत्सखीकर्तृकोक्तिरियं
स्वाधरदंशनपर्यवसायिभ्रमरपद्माघ्राणशीलत्वेनाधरमिति षिद्धनिशुनं च माकृथा इति वारितेऽपि नाम्ने विरुद्धाचरणात् इति कु
ले सहस्वेत्युपरूढपत्नीयं त्रयाणामिति शेषः श्रोतृसंबोध्यनायिकायाः एवं च वाच्यार्थस्तद्विषय एवेति भावः तत्कांत इति वक्तृवी
हिः तस्या असत्यासक्तत्वेन पत्युस्तत्कामनाविषयत्वाभावेन कान्तत्वाभावात् षष्ठीतत्पुरुषासंभवात् एवं सपत्न्यादीति प्रियाया
एतद्दर्शने रोषो न प्रियाया इति त्वयानन्दो न विधेय इत्यस्याः सपत्नीमिषेवं समाहितं मध्येव विदग्धायां समाश्वसितिहीत्यस्य नायिकेत्या
दितो ध्वं ३५ संकेतिते गृहीतसंकेते तत्रान्यत्रापि अगृहीतसंकेते चारुत्वविश्राम इति व्यंग्यप्रमनपेक्ष्यैव विप्रलंभयोषकत्वादि
ति भावः तात्पर्याविषय इति वाच्यस्यैव प्राधान्येन तात्पर्यविषयत्वादिति भावः स्तुतरामिति तात्पर्यविषयस्यैवाभिधेयत्वेन न तद्व्यंग्य
स्य शक्यानभिधेयत्वापत्तिरिति भावः ननु वक्त्राद्यौचित्यसहकारेणाभिधैव तत्तदर्थोपस्थापिकास्तु वाच्येषु नानात्वमर्थान्तरसंक्रमि
तवाच्यध्वनित्वादिव्यपदेशहेतुत्वं शब्दार्थान्वयव्यतिरेकानुविधायित्वं प्रकरणादिसापेक्षत्वमिति धर्मास्तेन लक्षणैव सघटाति तस्मादिति
कश्चित्सहायत्वं तत्तत्र्यस्य नवार्यते ननु वक्त्राद्यौचित्यसहकारेणाभिधैव तत्तदर्थोपस्थापिकास्त्विति चेन्न अभिधायां तत्सहका

का॰टी॰ रकल्पनस्याक्षमत्वात् किं चैवं एकशक्यार्थबाधसहकारेणाभिधातस्य बलवत्त्वाभिमतार्थस्याप्युपस्थितिसंभवेन लक्षणाया
७५ अप्युच्छेदापत्तिरितिदिक् ननु व्यंग्येषु नानात्वमर्थान्तरसंक्रमितवाच्यध्वनित्वादिव्यपदेशहेतुत्वेनशब्दार्थान्वयव्यतिरेकानुविधा
यित्वं प्रकरणादिसापेक्षत्वमिति धर्मास्तेचलक्ष्येऽप्यपीतिव्यंग्यालक्ष्याएवेतिशंकते नन्विति· प्रत्याख्यानेति सीतां प्रतिरामस्योक्तिः।
75 हे प्रिये इति भावमोपनीता संबोधनं· प्रत्याख्यानेतिराकरणोरुचिर्यस्यास्तस्यरायाः तव क्रोधेणारक्तसारावर्णोलसमुचितंतत्कोऽर्थ
स्य योग्यं कर्म कृतं तत्तत्त्वयातथासोढं यथा कुलजो जनउच्चैरुन्नतंशिरोधत्ते स्नाघनीयत्वात् अन्यथालांछनेन नम्राभावापत्तेः
रामेणात्व मयापि प्रेम्णाउचितं योग्यं न कृतं किं भूतेन· प्रियंजीवितं यस्य तथाभूतेन पुनः कीदृशेनासां दशायामपि त्वाद्दृशप्रियाऽस्मर
णकत्वात् स्वार्थ इदं धनुर्विभ्रताधारयता· प्रतीकारासमर्थत्वात् तथातवव्यापदां विपत्तीनां सहा क्षमाणादृष्टास्तेहातिशयेनक्षमयी
भावादिति भावः कातरत्वं इदं निस्नेहत्वस्याप्युपलक्षणं अर्थान्तरेति· अभिधात्वेनेदृशव्यपदेशहेतुरित्यप्यभिधानीवैधर्म्यमुपदर्श
तं तत्तद्व्यंग्यस्वरूपं अन्यो भाक्तं लाक्षणिकमाद्वरित्यर्थः भाक्तमार्गोऽस्मादन्यइतिपाठान्तरं तदन्यः शक्यान्यः भाक्तमार्गः लाक्षणि
कमार्ग इत्यर्थः लक्ष्योपार्थेति· एव लक्षणायाशब्देन प्रतिपाद्यमानत्वाल्लक्षणापत्तेः मुख्यार्थबाधतत्संबंधज्ञानसापेक्षत्वेनशक्या
र्थोपक्रमस्यतात्पर्यानुपपत्तेलक्षणावीजत्वात् तात्पर्यज्ञानसापेक्षत्वेतितन्नाहकप्रकरणादिप्रतिभानैर्मल्यादिसापेक्षत्वेतिप्राप्युक्त राम॰
वैधर्म्याभावात् किमतिरिक्तव्यंग्यस्वीकारेणेतिभावः शक्यार्थेनेति संबंधोपस्थित्यादिद्वारा तदुपयोगइतिभावः नरवाल्विकिंत्व ७५

सामीप्यादिलक्षणानियतसंबंधिस्थेवलक्षणासत्त्वादितिभावः नन्वनियतसंबंधस्यकथंप्रतीतिइत्यसंगः स्यादतआह प्रकरणादिवशेने
तिनन्वेवंलक्ष्यार्थोपिनियतानियतसंबंधोक्तप्रकरणादितएवानातिप्रसंगादतआह किंचेति मुख्यार्थसंकेतग्रहस्यचेति मुख्यार्थबाधा
दिप्रतिसंधानद्वारेवतस्योपयोगइतिबोध्यं उक्तमेतेनेतिनिष्कलत्वेत्यर्थः शक्यसंबंधस्यलक्षणात्वेतन्निरूपोतिभावः एवंचमुख्या
र्थःबाधादिसापेक्षत्वरूपाद्वैधर्म्यादप्यभिधातोलक्षणायाभेदस्तथा मुख्यार्थबाधाद्यनपेक्षत्वरूपवैधर्म्यात् लक्षणातोव्यंजना
याभेदइतिबोध्यं लक्षणामुपजीव्येति लक्ष्यार्थप्रत्यायनाविरतायांलक्षणायांव्यंजनाप्रवृत्तेर्नतयोरैक्यमित्यर्थः लक्षणागुण
मोपिकिंचिन्नास्तीतिसिद्धांतयोर्भेदइत्याह नापीति नापिलक्षणानुगतमेवध्वननमित्येवपाठः एतदुत्तरमित्यध्वनेस्तल्लक्षणामिति
वाच्यमितिग्रंथः प्रक्षिप्तः रसादिव्यंजनेति मुख्यव्यंजनद्वारेतिभावः विकसन्नेत्रेतीति अनयाकटाक्षेणाभिलाषोव्यंजितइति
सर्वसाधारणप्रसिद्धेरितिभावः संबंधानियमंसिंहावलोकितन्यायेनाह तत्रेति एकविषयत्वेनेति एकोद्देश्यकत्वमित्यर्थः नवा
क्यमिति लक्ष्यप्रतीतिस्थलेवाच्यस्यप्रतीतेरितिभावः यत्रएवमिति पूर्वोक्तप्रकारेणेत्यर्थः नियमइतीति तत्रचअन्यथाएत्थे
त्यादौवाच्यार्थस्यैकत्वाद्दृष्टांतैकस्येवेत्यादौतुनतथा वाच्यस्यानेकत्वाद्बोध्यभेदादितिभावः विपरीतेति विपरीतरतेर्लक्ष्मीब्र
ह्मणोर्हरेर्नाभिकमलस्थंहरेर्दक्षिणनयनंरसाकुलासतीतिस्थगयति रमेनत्सुरतावेशनाकुलासुरतान्निवर्तितुमक्षमा
हरेरीश्वरस्यदक्षिणनयनेस्थगयतेआच्छादयति शेषंस्पष्टं सूर्यात्मत्वमिति हरेर्दक्षिणवामनयनयोःसूर्यचंद्रात्मकत्वेनप्रसिद्ध

परमे।

त्वादितिभावः॥ तन्निमीलनेन· तदाच्छादनेन· अस्तमयो ऽप्रकाशः स्थगनं पिधानं अनियंत्रणं· अप्रतिबंधं· वाच्यत्वादिति· तथा च स
त्यविज्ञानमित्यादितस्तथा बोधनापत्तेरिति भावः अखंडमेवेति क्रियाकारकभावानापन्नमेव प्रकारसंसर्गाद्यनवगाहि ब्रह्मविषय
कबुद्धिजनकं तद्विषयस्य निर्धर्मकं अखंडं ब्रह्मैवेत्यर्थः अपूर्वत्वादानंत्याच्चेति पाठः अपूर्वत्वेनानंत्यादिति पाठे प्ययमेवार्थः अस
बद्धस्वेति पदशक्त्यादिसहकृतवाक्यबोध्यार्थेनेति शेषः व्यंग्यव्यंजकभावेति· व्यंग्यव्यंजकयोर्भावः व्यंग्यप्रतीतिरूपः नानियता
त् नव्याप्यत्वातिरिक्तसंबंधवतः प्रतिबद्धरूपादिति प्रतिनियतो बंधः व्याप्याख्यः संबंधस्तदाश्रयादित्यर्थः सकलेत्य सपक्षता
वच्छेदकावच्छिन्नेत्यर्थः तत्र व्याप्तिघटकसामानाधिकरण्यांशेन सपक्षसत्त्वं· अव्यभिचरितत्वांशेन विपक्षासत्त्वं पक्षनिष्ठत्वेन पक्ष
सत्त्वं बोध्यते· अनुमानेनः ज्ञायमानहेतुना अनुमित्या ज्ञायमानहेतुकरणिकयेत्यर्थः रूप्यते विषयीक्रियते· तद्व्यतिरिक्तव्याप्ति
जन्यज्ञानविषय इत्यर्थः एवं चक्लृप्तलिंगव्यापारेणैव निर्वाहे ऽन्यव्यंजनारूपव्यापारकल्पनमनुचितमिति भावः एवमनुमा
नादिति प्रागुक्तप्रकारकतदित्यर्थः भमेति भ्रमधार्मिकविस्रब्धः सशुनको द्य मारितस्तेन· गोदानदीकच्छनिकुंजवासिना दृप्तसिंहे
न· पुष्पावचयार्थस्वसंकेतस्थाने कृतनिकुंजे पांतं ममभिसारघातकं धार्मिकं भीषयितुं कस्याश्चिदुक्तिः हे धार्मिकेति साक्षेपसंबोध
नं· परस्य यो विघातकस्पतत्वायोग्यात् त्वं विस्रब्धो विश्वस्तः सन् भ्रम गृहे इति शेषः कुत इत्यत्राह स गेहस्थः श्वा य दुःपाते त्वया आ
मे भ्रमणात्क्रमासीत् सः अद्यतेन· गोदानद्याः कच्छे जलप्राय देशस्तत्रत्यं वाषिनिकुंजवासिता दर्पयुक्तेन सिंहेन मारितः तेनेति प्रसि

प्य=४

द्धार्थकं· सिंहस्य दृप्तेनानेन गारमागतप्रहननात् अत्र वाच्यो नभीरुस्वभावस्य गृहे श्वनिवृत्त्या भ्रमणो निकुंजे सिंहोपलब्ध्या भ्रमणनिषेधो
व्यंग्यः तदेव निकुंजेति गृहाद्गेहस्थः यद्भयात् गृहे ऽपि भ्रमणमासीत् स एव निकुंजेति निकुंजे पक्षे भ्रमणायोग्यत्वानुमित्येदृस्यार्थः
ननु गृहे भ्रमणं गोदातीरे भ्रमणमनुमापयति व्याप्तिकरणत्वादिति चेन्न श्लोकवाच्यस्य तदनुमितिसाध्यसाधनविरुद्धयोर्व्याप्तिग्र
हदर्शनरूपत्वादित्याह यद्यद्भीरुभ्रमणमिति यद्यद्भीरुभ्रमणवति गेहे भयकारणश्वनिवृत्त्युपलब्धिरेव गत्या तथापि तत्र तदुपल
ब्धिज्ञानादनुमत्वेनरूढेरिति तयोर्व्याप्तेः स्मर्यते तद्गतधर्मेन च व्यापकाभावस्य पक्षधर्मज्ञानं इति भावः पर्यवसानमेवोपपादयति व्याप
कभयेति व्यापिका चासौ भयकारणाभावोपलब्धिश्चेति कर्मधारयः प्रतीतेति यद्यपीति भावः तद्विरुद्धमिति तद्विषयविरुद्ध
भावी त्वेन तद्विरुद्धत्वोपचारो बोध्यः एवं च भ्रमणव्यापकभयकारणाभावेन व्याप्यभ्रमणाभावः सिध्यतीति भावः तत्र प्रयोगमाह अ
नुमानं चेति सिंहवत्त्वादिति उपलभ्यमानभयकारणवत्त्वं हेतुः यद्यदुपलभ्यमानभयकारणवत् तत्तद्भीरुभ्रमणायोग्यं यथा महेद
राय मित्यन्वयसहचारः यद्यत्तन्न भीरुभ्रमणायोग्यं न तदुपलभ्यमानभयकारणवत् यथा गृहमित्येवं व्यतिरेकसहचारः उपलभ्यमा
नत्वे वानुपलभ्यमानभयहेतुमति व्यभिचारवारणायेत्यन्ये लं तु व्यापकविरुद्धज्ञानं व्यतिरेकानुमितिहेतुरिति मते· नव्यमते तु भय
हेतुमत्त्वज्ञानाभावो व्यापकोऽनेध्यद्दृत्याह्नः तत्र भ्रमणादर्शनादिति एवं च यद्भीरुभ्रमणं तद्भयकारणाहृत्युपलब्धिपूर्वकमिति व्यति
रेकव्याप्तिरेवासिद्धेति भावः विरोध इति तदाद्येवमनुमानं गोदातीरं भीरुभ्रमणायोग्यं सिंहादिमत्त्वादिति· तत्र साध्यहेत्वोः सामाना

का॰टी॰ धिकरणपात्तत्राप्यभावव्याप्तत्वाच्च हेतोर्विरोध इति भावः नन्वनुरूपनिर्देशाद्यभावेऽसन्नियन्त्वोपलभ्यमानयद्वयकारणवत्तत्तन्द्भम
७१ णायोगमित्यत्रालोकादोषावतन्त्राह किं चेति॰ पुंश्चलीति॰ अनेनानाप्तोक्तत्वादप्रमाणपरस्त्वचितं तदेवाह नत्ततद्वचनमिति कोपा
कुलितत्वाचेत्यपि बोध्यं तदेवाह सं बंधानियमादिति व्याप्त्यभावादिति भावः अनैकान्तिकादिति व्यभिचारिहेतोरित्यर्थः तत्त्वेगमि
तिनिश्चितमित्यर्थः एवं च परवंचनाद्यर्थं तत्संदिग्धासिद्धिरिति भावः संभावितादपीति॰ व्यभिचारस्फूर्तिमतामपि समाजिकानामस्मिन्
पक्षधर्मतानिश्चये संभाविता दर्थाद्याक्षेपदयादिति भावः किं च व्याप्तिस्मरणादिकल्पनातो व्यंजनायाः कारणत्वकल्पनमेवोचि
तमित्याशिवं॥ ॥इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्रदीपोद्योते पंचमउल्लासः॥ ॥अन्योन्यनेरपेक्ष्ये
णेति अन्योन्येन विनेत्यर्थः स्वच्छंदेत्यादाविति रनपेक्ष्यव्यतिरेकालंकारस्य विनिर्गतमित्यादौमानदमात्मसंदिरादित्यत्रम
कारानुप्रासस्य सत्त्वादिति भावः प्राधान्येति अस्मिन्समासे कविसंरंभविषयत्वं च प्राधान्यमिति भावः विभाति आङ्कादापर्या
प्यते वाच्यं अस्मात्कालोत्पन्न परवर्तिनं प्रथमतः शब्दालंकारेण विनाकर्षः अर्थप्रतीत्युत्तरं तु अर्थालंकारप्रतीतेरिति तेषां गात्य
त्वमिति भावः सुपातिङां॰ जरंतानां व्युत्पत्तिं॰ अनुप्रासादिना विशिष्टाव्युत्पत्तिं तदेतदाह्वरिति स्वतएव शब्दालंकाराणां चमत्का
रित्वं अर्थव्युत्पत्तिरर्थालंकारोऽनेहशा नशब्दवत्त्वतः अमत्कारिकापित्तु विभावाद्युत्कर्षमुखेनैवेत्यर्थः अभिधेयः प्रतिपाद्यः तेन राम॰
लक्ष्यव्यंग्ययोरपि संग्रहः विभावादीति आदिनानुभावादिसंग्रहः शब्दरूपेति तस्यैव पठनश्रवणादिविषयत्वादिति भावः शब्दवदि ७१

ति अलंकृतत्वशङ्कयोंग्यस्यास्वादस्य विभावाद्यप्राप्तौ शृङ्गारादिविशेषानाश्रयत्वेनाकिंचित्करत्वादलंकार्यापत्तौ व्यंग्यत्वाच्छादनाम
प्यावश्यकत्वेन तद्द्वयोरप्यास्वादोपकारकत्वात्कविसंरम्भगोचरत्वाच्चोभादेपत्ता नत्रयोपदन्त्वयव्यतिरेकानुविधायीत्यस्तेन व्यपदिश
तइति भावः। प्रथमेति कनकद्युतिः पीतः। विरहेत्यादिना पाण्डुरत्वं अत्रास्यापि विधीयमानत्वात्कनकस्य परालंकारत्वयोत्कर्षात्
कामिनीकपोलस्यापि तत्स्वरूपप्रतिहद्विसंवधित्वादुपमा। शुक्तेःपतः सरसेति कन्दोमृणालं तत्छेदच्छवित्वेनशोल्या। तिशयः। तेन
धान्तध्वंसकत्ता अतएव विपक्षजयादुदयः मृगलाञ्छनइत्यत्र श्लेषार्थः। चंद्रादिपदेनापि तदर्थलाभात् मकारयोस्तकाराराणां क
कारयोः धकारयोः रुकारयोः छकारयोः मकारवकारलकाराणामनुप्रासः। तेहृषिमात्रेति पक्ष्मलेति भ्रमितत्वर्थी यो लक्षणो
मोधैर्यविघातः स्वतस्वस्थाताचनीचाः अधोगामिनः अनुद्वाशयाश्च कृत्रिमविनयान्वीतास्तांगता वा। अलीकं। ललाटं। मिथ्या वच
नं च। कालता श्यामता परपीडकत्वं धूमलताच कुटिलता वक्रता। अस्फुटं परापकारेच्छा च कुटिलतामिवेति सहोपमा। तेषांगणश्च
समुच्चयः। तेन यथा ते कुटिलतां न त्यजन्ति तथा कालतामपीत्यर्थो। अलंकारस्य प्राधान्यं कवेस्तन्त्रेत्वसंरम्भात् यात्किं विद्धां गपरात्वेपीति।
आद्यो उद्दीपनविधयारसव्यंजकत्वेपि द्वितीये खलसदृशाख्यलकाइत्युपमायाः। तन्मूलविप्रलंभस्य चरत्वेपीति भावः॥ ॥इति श्रीशि
वभट्टसुतसतीगर्भजनागोजीभट्टकृते काव्यप्रदीपोद्योते पञ्चमउल्लासः॥ ॥शिवत्रं कुष्ठं निरूपणाधीननिरूपणत्वादितिवक्ष्यही हे
त्वः। दोषानिरूपणीयाइति यद्गुणविपर्ययात्मनो दोषाइति वामनोक्तेर्गुणानिरूपणमेवोचितमितितन्न व्यत्ययस्यापिसुवच

का॰टी॰ त्वात्प्रसादगुणाभावेऽपि दोषमत्वाच्च प्रसुत्यायेति कर्मधारयः करणोति एवं हि दोषपरत्वं भवतीति कृत्वं च दुष्टलक्षणं गो... अर्थासंग
७८ तिरिति अर्थस्य लक्षणस्यासंगतिः सकलदोषाव्यापकत्वमित्यर्थः मुख्यत्वं चेतरेच्छानधीनेच्छाविषयत्वं तच्च रसस्य तः प्रकृष्टार्थे रसरू
रूपे रसे कृतमित्याह रसश्च मुख्य इति गद्य इति वाच्योऽपि रसमादृत्य यो चमत्कारे मुख्यत एवं मुख्यत्वमत्र रसं तेऽरोपितं ह्यर्थ
र्थमर्थपदे अर्थत्वं शब्दजन्यसाक्षात्कारविषयत्वं काव्यमित्रशब्दाच्च न तु रसपर्यन्तपक्षे रसांशे आवरणभंगाभावात् काव्योपात्त
विभावादिप्रतीत्यैव तदंगात् किं तु शब्दबुद्धिरेव पुत्रस्ते जात इत्यादि वाक्यात् जायमान सुखं तज्जन्य पुत्रोत्पत्तिज्ञानादेवेति
नदोषः अर्थत्वमात्रमचमत्कारित्वादर्थेऽपि अतो मुख्यत्वमत्र पाने विघातानाभावादिति भावः उपकारित्वेनेति विभावादिसमूहा
लंबनरूपत्वाद्रसस्येत्यर्थः प्राधान्येनोद्देश्यत्वादिति साच चमत्कारिणी प्रतीतिः तेन चमत्कारकारिकाव्यजन्यप्रतीतिविषयत्वमि
त्यर्थः उभयेति विभावादिप्रतीति द्वारा रसपर्यायकत्वेन तेषामुभयोपयोगित्वं तेन रसोपायत्वेन तेष्वर्थशब्देषु सः दोषः
न केवलं रसएवेत्ययोरर्थः प्रतिपादनात्मकेति शब्द्यते बाध्यते नेनेति व्युत्पत्तेः स्वरसः इति अन्यथावरणस्य शब्दरूपत्वादादि
पदग्राह्यतानुक्ताऽसंगतास्यादिति भावः रचनाऽऽनुपूर्वीरूपा नच दोषे शोभेति दुष्टेष्वपि रसानुभवादिति भावः अपक
र्षेति अपकर्षे शब्दोऽपि करणसाधनस्तद्धि तत्र सचरसानिष्ठो जातिविशेषः तद्व्यंजकं दोषज्ञानं अपकर्षस्तोपि श्रुतिकटुत्वादौ त राम॰
त्र मेरा रसापकर्षव्यंजकोऽरीति बोध्यं केचित्तु आनंदांशे सम्यगावरणध्वंसाभावोपकर्ष इत्याहुः रसास्तु पत्नीति यथाश्रुतसं

स्मृत्यादयः तत्रासाम्यमिति क्लिष्टमिति कष्टश्रुतिकुलवर्णमित्यर्थः अविवेचितचमत्कारिणी चेति पाठे कर्मधारयः यथा शब्दादी
ति आदिनार्थवर्णरचनासंग्रहः विपरीतोपस्थापनेनेति विपरीतार्थोपस्थापनेनेत्यर्थः यथा विरसेति विरसशब्देनासमञ्जसा
र्थमुच्यते यथा व्याहतत्वादेरिति यस्य पूर्वमुत्कर्षापकर्षौ वर्णितौ न स्यात्पश्चात् हि विपरीतत्वं चेद्व्याहतः यथाऽवधूक्तेति तस्य श्रव्या
दावदोषत्वादिति भावः क्लिष्टोऽपि नित्यानित्यरूपः शब्ददोष इति वाक्यार्थगोचरत्वात् प्रतीयमानाः शब्दगाः ततः परं प्रतीयमानाः
परंपरया रसापकर्षकाः अर्थगाः तादृशाः रसादेरपकर्षकाः समर्थगा इत्यर्थः पदापेक्षया पापीति नच पदांशाः पदनिरूप्याः प्रकृतित्व
शेषत्वादिनाभानादिति भावः तद्दोषनिरूपणस्य प्राथम्यं ग्रन्थकृद् गृह्णातीत्यन्वयः दुष्टं पदमिति पदशब्देनात्र सुबन्तं तिङन्तं च तेन त
त्प्रकृतिभूतं प्रातिपदिकादि च गृह्यते विभक्तिप्रत्ययादेरपि पदैकदेशत्वमग्रे वक्ष्यति निहतार्थमिति विभागवाक्ये लक्षणोप
स्थितानेव हि विशेषलक्षणाकांक्षायां लक्षणकथनयोग्यत्वं विभागपरत्वेऽलक्षणानुक्तेऽन्वेनेतेति भावः रूढियोगाभ्यामिति रू
ढिकण्ठादिपदे भाद्रिस्यादिः रूढ्यर्थो लक्ष्यः योगार्थो लक्षणमित्यर्थः इति भावः केचित्तु योगरूढे शुभप्रकार्थाभाववादिनां नेकविनाकृता
परार्थोपस्थितिरिति कथं शाकुलक्षणं यस्य योगार्थो लक्षणं स्यात् अतः शुक्तिकल्पादिपदवाच्यत्वं लक्षणमित्याहुः परुष
त्वमोजोव्यञ्जकत्वं वीरवीभत्सरौद्रेषु तस्मात् दुष्टत्वाभाव इव दुर्वचत्वमिति मुख्यार्थापकर्षकत्वमित्यर्थः वीरादौ तु मुख्यार्थोत्कर्षकत्वाद दु
ष्टत्वं दुःस्तेनवक्रेण शकान्ताच्युतत्वं माधुर्यव्यञ्जकस्य अनंगमंगलेति अनग्रशर्वीर्हलोचनैरिति विशेषमध्याहार्यं अंगसूनस्यापि विजयप्र

का०टी० ७८

79

दत्तान्मंगलगृहमिति कश्चित् तस्मान्नंगात्ता द्रव्यमग्गलं निहितमित्यपरे । नन्नं वंध्यायां गा इति भंगीनां येतरंगा उत्तरोत्तरा विच्छेदास्तैः संजा
ताः शेषु ते लीचनैः रूपलक्षिततया हंसांगणां के वेश्यालिंगितः कृतार्थतां कदा लभते लप्स्यते इत्यर्थः भविष्यति कदा कदाचिदपि इति भवि
ष्यति लट् । भंगीनां तरंगवदाचरणे करणे इत्यत्र १ नात्र चेतीति इति इत्यमिन्नर्थं इत्यर्थः तस्य करोतीति रो इमस्य णावर्णादेशेति
भावः मुख्यार्थहतेरभावादिति अत एवायं दोषः माधुर्यवत् शांतकरुणशृंगाररसप्रधानकाव्ये एतेषां एवं च रसापकर्षकत्वात् श्रोतु
द्वेगजनकत्वं च्युतिकटुलक्षणमिति बोध्यं देशं तिति तन्न देशीयभाषारूपमित्यर्थः एवं च तत्र च्युतसंस्कृतिर्न दोष इति भावः एत
न्मंदेति एतदत्र पलपनीयं । मंदविपक्षमौषधिपक्षमित्यनेन वनकाठिन्यपाण्डरत्वलाभः पुलिंदसुंदरः शबरयुवा । करस्पर्शक्ष
मं । नहोगयं । पल्लीपतीत्यनेन तत्सुखमस्तत्वभीतत्वाण्युचितमिति ध्वनितं स्तनयोः पत्रानाहतत्वेन तदासक्तचेतसः प्रहारपाटवं न भवे
तीति अनयोः कतरः कुंभ इति हननेमोघं वा भविष्यति इति तत्सारूप्येण प्रहारयोग्यत्वबुध्या ताकुंभां भयं स्यादिति भावः कुत्लमि
त्यनेन वक्रचुरोधान्वयाकरणस्यानशपकत्वं ध्वनितं अनाशिषीति । न चात्राप्याशीरर्थः त्वामित्यस्यानन्वयापत्तेः इष्टार्थस्यैवाशंसन
कर्मत्वात् अत्राशार्थाप्रतीतिरिति अत्रेदं चिंत्यं साधुस्मरणेन शास्त्रेषु संगणाक्षैव वा तेषां बोधकत्वस्य संदेहः स्वीकारात्रार्थाप्रतीतिः
असाधुतज्ज्ञानस्य शाब्दबोधप्रतिबंधकत्वे तत्देशभाषाकाव्यादितोऽनवबोधः स्यात् तस्मात् तत्र व्याकरणसंस्कृतशब्दघटितपद्येन तदसं गम०
स्कृतपदोपादानस्य कव्यशक्त्युन्नायकतया सहृदयश्रोतृरुद्वेगोद्भावकतावीजमिति तत्त्वम् तथा प्रयुज्यमानतावच्छेदकरूपेण । ७८

न च प्रयुक्तं कविसंप्रदायनिषिद्धप्रयोगवत् नैतत्कविभिरप्रयुक्तत्वेन नाप्रयुक्तत्वासिद्धिः नाप्यसमर्थे हन्त्यादावतिव्याप्तिः तेषां प्रहृतीत्या-
दौ प्रयोगात् तु मत्याहार्मान्यतो निषेधाभावात् नापि तत्प्रसक्तत्वेनाप्रयुक्ते घटादौ प्रयुक्तसंस्कृत्यादौ वातिव्याप्तिः तेषामनुशासनासिद्ध-
त्वाभावात् कविभिरिति व्याकरणस्याप्युपलक्षणं तेन व्याकरणानिषिद्धस्यापि धातोरर्थान्तरधर्मग्रहणाभ्योन्यत्रप्रयोगस्य वचेस्त्रांतो प्रयो-
गस्य च संग्रहः एवं च लडहादीनां भाषाकृतादिशब्दानां संस्कृतकाव्यानिविष्टो यमेव दोष इति बोध्यं यथायमिति दारुणरणवारुःक्रूरकर्मा
२ पदार्थोपस्थितिविलम्बइति न हीदं तत्त्वप्रयुक्तत्वेन शक्तिस्मरणविलम्बइत्याह मुख्यार्थविच्छित्तिः तत्प्रतीतावस्यैतविलम्बः न च
नेयविशिष्टस्येति एवं चोपसंदानं विनानुभिज्ञार्थबोधकत्वमसमर्थत्वं तीर्थेति सत्क्षात्तिः सत्फलजनकं पुण्यं स्तुरस्रोतस्विनी·गंगा·
स्तरेत्यादिनाश्रवणगम्यत्वे·हन्ति·गच्छति ४ अस्यार्थानुपस्थितिरिति अत एवमनिहतार्थे संकरः तत्राविलम्बेन प्रकृतार्थोपस्थि-
तेः नाप्यवाचकसंकरः तस्योपसंदानेनाप्यबोधकत्वात् यस्योपसंदानं विनापि गमनार्थबोधस्तस्यापि प्रसिद्धपरित्यागेन हन्प्रयो-
गप्रयोजनानुसंधानव्यग्रत्वाद्विलम्बप्रवृत्तेरीजामितत्वं अत्र हेतुः पदैकदेशान्तेपि प्रकृतिगतत्वात्पददोषताबोध्या प्रसिद्धेनेति अविवक्षि-
तेनेति शेषः अविवक्षितप्रसिद्धार्थप्रत्ययव्यवधानेन विवक्षिताप्रसिद्धार्थबोधकत्वमिति फलितं अविवक्षिते त्वपादानान्नाप्रसिद्धत्वं ज-
कनानार्थांति प्रसंगः सामग्रीसाङ्गुण्यात्तागप्रसिद्धार्थप्रतिपत्तौ नायं दोष इति तृतीयां तं प्रसिद्धिश्च भूरिप्रयोगात् हितपट्टतरसंस्कारवि-
षयत्वं तेन हितस्यैवद्रुतमुपस्थित्यानादितरतिरोधानं एवं च योगमात्राश्रयेण कुमुदादौ प्रयुक्ते पंकजपदेयमेव दोषः हृद्यार्थस्य द्रुतमुप

का·री स्थितेः लक्षणया प्रयुक्तत्वमिति प्रयोजनेनेयार्थत्वं दोषः सति त्वदोष एवेति दिक् यावकेति यावको लक्तकः तद्रसार्द्रपादकृतप्रहा
८० रेण शोणिता आरक्तीकृताः कचा यस्य तादृशेन दयितेन रुधिरभ्रमात् सा धूमेन भयेन तरला व्याकुला ऽत एव मुग्धा विलोक्य यस्मा
द्धसवतीति ज्ञात्वा सहसा तत्कण्ठं· विलंबे नायिकाया भ्रमोच्छेदसंभवात् सहसा ऽप्रसाद्यैवेत्यर्थ इत्यन्ये ५ उज्ज्वलीकृतत्वेति·
80 शोणितशब्दो नानार्थः विलंब्येति· झगुधिरोपस्थितौ तदन्वयानुपपत्तिप्रतिसंधानपूर्विकाऽप्रकृतार्थोपस्थितिरिति विलंब इति
भावः तिरस्कारकः तिरस्कारकधर्मव्यंजकः तपस्विभिरिति यास्तु चिरेणोत्पन्नेन तेन तेऽपिया क्लेशलभ्योनित्तत्त्वितं सविभिर्यातिज्ञि
केः यत्नत इष्यते नेन तु प्राप्यते पशुनांवध्यतां प्राप्त इत्यर्थः ६ पदांतराणनपेक्षमिति प्रकृते तदन्विताऽर्थबोधकपदांतराभावादिति भा
वः तदर्थं पशुपदार्थः तस्याः कातरतायाः अस्यानित्यदोषत्वं चिंत्यं तदर्थः गृहीतकातरत्वस्यतेन्निरस्कारकोपास्थित्यभावात्
इत्याहुः हन्तानितौक्षेति हृतत्वानत्तापरिहारेत्यर्थः मात्रपदेन समुच्चयार्थकचादिव्युदासः प्रयोजनकमिति चहूवेपादप्रसारे इत्या
दिना तत्संयोजनकत्वेनोक्तमित्यर्थः अत एव नाधिकपदत्वेन संकरः तदर्थस्याविवक्षितत्वेपि निष्प्रयोजनत्वात् वक्ष्यवचनादी
ति तत्रपदैकदेशदोषनिरूपणे उदाहरिष्यते दृशामिति· ननु तत्र प्राणमात्रार्थमपितु संबंधार्थकमपीति चेत्· दृशोरिति द्विवचने
नापि संबंधप्रतीतिसंभवात् इत्याहुः उत्फुल्लेति विकसितकमलकेसरलग्नो यः परागः तद्गतगौरद्युते· अत्रेदं विशेषणमप्युष्टं भ राम·
गवतिसकलैश्वर्यसंपन्ने तेनाभिवांछितदानसामर्थ्यं लभ्यते अत्रपुष्पादिति विरुद्धं प्रवं मेकत्वविशिष्टायाः संबोध्यत्वात ७ अर्थस्य ८०

ति अत्र हि निर्गहेतुत्वेऽप्यनन्वयात् नाप्यवधारणे । तीतव्यापकर्षापत्तेः न च क्रियान्वयितत्वेन निर्देशेऽपि धारणायोगादित्याहुः
पेक्षप्यन्निरर्थकं तदर्थानिवकृत्यां त्वप्रसिद्धिलभेनागवचकं एवं विनश्यतीत्यादौ वीत्यादिकमपानर्थकमिति दिक् व्ययतां वेति
तस्यां चरणाक्यार्थबोधे चेत्तद्वः स्यादिति भावः अवंध्येति दुर्योधनानिग्रहाय युधिष्ठिरस्य क्रोधयंत्रा ज्ञेऽपद्याद्युयत्रुक्तिः सफलकोपस्ये
त्यर्थः तेनामर्षस्येति फलितं आपदान्तरसिद्धरूपाणां विहेतुकेनादातुरित्यर्थः स्वयमेव विनैव व्यापारं देहिनः शत्रुमित्ररूपाः ता
दृशस्यैव भयलोभाकान्तत्वात् देहिनउपचयश्रुतास्रपि वश्यभवंति किंपुनर्वक्तव्यमितरे इति स्पष्टयितुं तथोक्तं न तु शरीरिणा इति
।तेन व्यतिरेकमुखेनार्थान्तरन्यासः यतः अमर्षशून्येन अवंध्यामर्षशून्येन विद्विषा विशिष्टद्वेषं कुर्वतापि तदरः भयमित्यर्थः जा
तहार्देन जातस्नेहेनापि जंतुनाऽनादरो व्यापरोपितः । जनस्यापि दराद् दरेण किंपुनर्वक्तव्यं देहिन इति स्पष्टयितुं भयग्रहणमपि ज
नपदं उपात्तम् तेन भयादरयोरभावकथनेन भयान्तरेणावश्यत्वाभावः एवोक्त इति बोध्यं ४ तस्य शक्तिमत्तेऽपि इति तदर्थं निरूपितश
क्तिमत्त्वेऽपीत्यर्थः अवाचकमिति प्रयोजनाद्यभावान्नतदर्थलक्षकमपीति भावः अतएव रामोऽस्मीत्यादौ न दोषः विवक्षित स क
लदुःखभाजनत्वादिनाविवक्षितधर्मिणि लक्षणांगीकारात् । लक्षणो वाचकत्वं शक्तिलक्षणान्यतरसंबंधेन बोधकत्वं विवक्षितं । रा
मोऽस्मीत्यादौ लक्षणाद्यनवतारकाले दुष्टत्वमेव एवं तत्पदमपि सर्वप्रकारानुपास्यत्वादिप्रतीतिरूपप्रयोजनानुसंधानेनादात
त्यादिलाक्षणिकं यदि तदा न दृष्टं दुष्टमेवेत्याहुः हाधिगिति राज्ञोऽस्य मे उर्वशीं हृष्टवतः पुरूरवस उक्तिरियं निवेदानि शायस्तवं कहा

का·टी॰ ॥धिगिति अत्र हेतुः यत्र राज्ञो सा अनिर्वचनीयरमणीयगुणा प्राज्ञेव पुरतंयस्याईदृशी दृष्टा सा किल· तामसी तमोगुणात्मका कल्पिते
ति लिंगविपरिणामेन संबंधः धात्रेति विभक्तिविपरिणामेन किलेत्यस्य चौशाशोनः समुद्रः वेतमो व्यवहारस्यायोग्यत्वात एवं तद्विने
षकृजानां व्याधितां धकारितं विषयाग्राहकं अत एव दग्धं दुःसदत्वाग्निर्दाहः इदमनुभूयमानं दिनं प्रकामं यत्र कल्पितं इत्यपानुचितं २७३
। विषयाग्राहकस्य तथात्वायोगात् ईदृशानुचितकारिणो किंकुर्म इति साकूतोक्तिः धाता। कुमुदेऽष्टे· सदैव विधुरः प्रतिकू
लः तत्रोपपत्तिमाह· चेत· यदि· न विधुर इत्यनुषज्यते तत्र तदा जीवलोकः जीवनाखिलकालः समसमा। ता हृत्तनवादिकादशो
न जनकयामिनीमयः कथं न भवति ९ दिनमिति पाठे दिनपदमित्यर्थः दिनं तत्त्वं अवच्छिन्नकालत्वं कृत्वा· मेघविषयया तर्जयति
तिन्नतीयमेदरूपमवाचकं पदमित्यर्थः अर्थान्तरगतं अर्थान्तरवाचकं जंघाकांडेति जंघाकाण्डमेवोरुर्मृणालनालोपस्य जंघा
कांडऊरूच नालो यत्रेति वा· नखकिरणा एव लसन्ति केसराणि तेषामाल्यापंक्ता करालः नतोन्नतः प्रत्ययस्य नूतनस्य तत्काल
दत्तस्य· अलक्तस्य आभायाः प्रसर एव किसलयानि यस्य मंजुमंजीरः पादभूषणमेव भृंगो यस्य· भर्तुः शिवस्य नृत्तस्यानुकारे·
पदार्थाभिनयो नृत्तं नृत्ते नाललया श्रितं सत्तनृत्यपत्रच्छलावण्यवापीजन्य कमलशोभां जलस्थानीयं लावण्यं अत एवाग्रे अं
भवान्याः भोजेति उक्तिः विदग्धता विशेषेण धारयत अभिनवः इदं प्रथमतया नृत्यप्रवृत्तैः दंडपादः प्रसत्योधीकृतः पादो दंडपादो विधीयते इ राम॰
ति निरुक्तः जयति सर्वोत्कर्षेण वर्त्तत इत्यर्थः १० उपमानधर्मी भोजश्रोभायाः दंडपादे आरोपान्निदर्शनानाम अलंकारः कविकल्पि

तोपमानेनापि वक्ष्यमाणोपमादर्शनात् तदुपपादकं जंघाकांडेत्यादि रूपकचतुष्टयं इति बोध्यं नियमितशक्तित्वादिति एतेन धारणां
त्वं गमितमिति परास्तं अन्यार्थान्तरं प्रतिपादयत् एवपदस्य व्यंजकत्वादित्याहुः वाक्यावाचकत्वोदाहरणेति वाक्यस्यावाचकत्वे पदु
दाहरणेत्यर्थः तं कोवादिबोधकानिशादिपदं हितं न ख्यातिप्रसक्त इति ग्राम्यादि स्थितिभावः व्रीडादिव्यक्तिहेतुकेति व्रीडाद्यालंबन
विभावादिभूतासभ्यार्थोपस्थितिद्वारेत्यर्थः ग्राम्यं च नासभ्यार्थबोधकं किंतु स्वतएव शोभारहितमिति न तत्संकरः अविवक्षित
स्येति अर्थस्येत्यनुपपद्यते निर्वाहिता इति प्रकृतार्थे न्वयिन इत्यर्थः अर्थान्तरस्येति निर्वाहिता इति शेषः साधनमिति सैन्यं पुरुष
लिंगं च धीः शत्रुपराभवनयनादिविषया सुरतविशेषविषया च अरालितं शत्रुदर्शने कोपावेशाद्वक्रितं कामिनीदर्शने मन्मथ
पीडासहनतया वक्रितं च अन्या सेना नायिका च ॥ पुंव्यंजनमिति इदं च निर्वाहि लीलेति अनर्पितया निःशंकं दष्टो धरो यस्य
निःशंकमित्यतिस्पष्टतां व्रणस्य द्योतयति लीला नाम रसेनाहतो र्थान्तरवनितया इवेन मीलनस्य कपटत्वं नदीपक्षे तत्तानभिज्ञ
तया मुग्धा बाह्यं ददती स्थिता अथानंतरं तेन धांत्या प्रवृत्ततया वा नतीमृते नतिं विना अनिशं निरंतरं बहुकालमिति यावत् वक्तुं विज्ञा
ज्ञ तेयोगोऽन्यो ह्यपीति द्वितीयार्थस्याः कोपो यगत इति भ्रांतिः प्रवृत्तत्वात्तु कोपानयनमेव वाच्यं तु वेद्यमिति यद्यप्युभयोरपि प्रयोजक
त्वाद्वाराहेतु उचितः तथाप्यन्यतरस्य प्राधान्यविवक्षायां तदुपपत्तिः मुग्धा सुंदरी मूढा बाह्ये दुपवने ति विक्रमोर्वशीये विरहिणः पुरुरव
स उक्तिरियं विभिन्नः संयोगध्वंसवान् ईषत्तलाभाय स्पृहेति घनो निबिडः रुचिरः सुंदरः कलापो मयूरपिच्छं सपत्नः शत्रुः अय

का · टी · त्रिपुरदाहे जगति · विगलिते त्युक्तं नत्त्वा विभिन्नइतितेन रामणीयकतातिशयः कलापापेक्षया व्यतिरेकस्व · हरेत · अनुरंजयेत · चंद्रक
८२ साम्यायक्तु समसत्नायतोक्तिः वर्हे इत्यपपाठः पिच्छवर्हे नपुंसके इत्यमरात् पौनरुक्त्यापाताच्च तस्माद्वर्हीतिपाठः यद्यपि कलाप
८२ शब्दो मयूरपिच्छे शक्तः तथा च वर्हीत्युक्तं · तथापि कलापो भूषणो वर्ह इति कोशात् भूषणवाचिग्रहणं मा भूदिति तदुक्तिः १३ वैमुख्य
मिति · असभ्यार्थोपस्थितिर्हि श्रोतृयसमूहे चंडालागमनमिव वैरस्यमापादयतीति भावः ब्रह्मांडादीत्यादिना सुभगाणपरिग्रहः स
मुत्रीतेत्यादि · अविगीतानादिप्रयोगयोगित्वसति भगवदादिसंबंधित्वस्य ज्ञानत्वं · इदमेव संवीतमित्युच्यते · शिवलिंगशब्दस्य ज
गदेतयोर्मि भगवतिशमिद्दे वीडाजनकाप्यर्थप्रतीतिरेव · तत्वे सति रूढ्यर्थातिरिक्ताश्लीलार्थस्य योगेनोपस्थापकत्वं शुभत्वं अत्र हि
रूढार्थस्य हरिस्तुपास्थित्वात् तद्यावनपायोगार्थस्य तिरोधानं · यथा भगिनीत्यत्र · ग्रामस्मृति जनकैकदेशवत्त्वलक्षितत्वं · ब्रह्मांडादि
पदे हि मस्तुदायरूढ्या रूढिरिति सभ्यमर्थमेवोपस्थापयति · ननु व पवेनासभ्यस्येति न दोषः असभ्यार्थानुपस्थितेरिति एवं च तेष्वपि
नायं दोष इति भावः स्वरूपद्वयमं देहेति · वाक्यदोषे सुरालयोल्लासेत्यादौ मार्गरामभ्रमिपदयोः स्वरूपनिश्चयेऽपि संदिग्धत्वेन तद्व्या
प्तिश्चित्यमिदं · तस्मात्तात्पर्यसंदेहविषयीभूतार्थद्वयोपस्थापकं संदिग्धमिति वक्तुमुचितं आलिंगितइति अनेनायासजयं स्त्रचय
ति · संपराये · युद्धे १४ हरगृहीतेतेति वलात्कारेणात्वपत्नीकृतेत्यर्थः संशयः वक्तृतात्पर्यसंशयः रवयोरभेदबुद्धिमूलकः वंद्या रामं
मित्यानुप्रव्यां उभयसाधारणत्वेन विनिगमनाविरहादर्थद्वयस्फूर्तौ वक्तृतात्पर्यसंशय इति भावः अत एव विधौ वक्रे इत्यादौ सेर्ष्येर्ष्यो ८२

ह्ययोपस्थितिः शब्दानुशासनेनेति व्याकरणकोशादिसकलेत्यर्थः तेन व्याकरणमात्रप्रसिद्धहेत्वादिसंग्रहः शास्त्रमात्रेति नतु
लोककाव्यादीत्यर्थः अन्यत्रापि शब्दानुशासने लोके च सम्यगिति सम्यक्ज्ञानं तत्त्वज्ञानं तदेव महत् ज्योतिः सकलाज्ञाननिवारक
त्वात् मोक्षजनकत्वाच्च· आशयो मिथ्याज्ञानजनितः संस्कारविशेषः मलिनितो यस्मात् तत्रासेवितः ताहृशस्यैतत् विहितनिषिद्धं क
र्म विधीयमानमपि क्रियमाणमपि न बंधनं बंधजनकं संसारप्रयोजकमित्यर्थः १५ तद्ग्राम्यमिश्रस्येति असमर्थानुसर्वेषां
तदनुपस्थितिरिति तत्तो भेद इति भावः समस्तलोकप्रसिद्धत्वमेव विवृणोति तस्मिन्देशेऽपि सर्वैः विदग्धाविदग्धैः तदिति तत्पदं त
र्गी ६ द्वक्तानि तद्देशीयानि तिग्राम्यमित्यर्थः राकेति राकापूर्णचंद्रा या विभावरी रात्रिः तत्कांतः चंद्रः तस्य संक्रांता द्युतिर्यत्र तस्मिन् संक्रांता
द्युतिर्यस्य वा ताहृक्मुखं तपनीयं स्वर्णं· हरते अनुरंजति· १६ नागरं विदग्धमात्रप्रसिद्धं उपनागरं ग्राम्यकक्षातिक्रांतमप्राप्तनाग
रभावम् ग्राम्यताप्रयोजकमिति प्रयोजकमिति सामान्येन तद्गुणकं विदग्धाविदग्धप्रसिद्धत्वप्रयुक्तशोभारहितत्वं वेनुरूपप्रयोजकं
न व्रीडादिव्यंजकार्थोपस्थापकत्वं तद्बीजमिति नास्मीलेनास्पृगतार्थतेति भावः अभिधानवत् शक्तिवत् सामर्थ्यप्रसिद्धेः अधुना·
प्रयोजनवशात् शरदिति· मुखंकर्तृ· चपेटा प्रसृतकरतलं अत्र चपेटादिपदमिति चपेटापातनातिशयपदस्यानिर्जितत्वेन लक्षणेत्यर्थः
वैयाकरणनयद्वालंकारिकैरपि हृत्वावेकार्थीभावं गमीकारात् शक्यसंबंधरूपालक्षणा स्तपपादे तिभावः मुख्यशब्दार्थेतिमुख्य
त्वं च शब्दवाक्यार्थं न यितं अर्थानुपस्थितिरिति लक्षणाजन्यबोधे रूढिप्रयोजनान्यतरज्ञानस्य हेतुत्वेन तदभावात् तदनुपस्थितिरिति

का॰टी॰ भावः अत एवाश्रुयुक्ताद्भेदः नच निर्जितत्वातिशयप्रतिपत्तिः फलं· उपमानत्वेनोत्तमस्थरागे चंद्रे इन्दुनेन चपेटापातनदानवर्णनेव शर्पसे
९३ गुणकर्षापत्तेः क्लेशावदिति· आकांक्षासत्तितात्पर्यादिज्ञानरूपकारणाविलंबेन विलंबात् स्वार्थबोधजनकमित्यर्थः तदेवाह यत इ
८३ ति अत्रोतीति· अविर्भूतिः नक्षत्रचक्रसंभूतं ज्योतिः चंद्रः तदुदयभासीनि· कुमुदानि· अत्रेदं क्लिष्टं· चंद्रादिपदैर्नैगमसिद्धेरपुष्टं च· चेष्टितं
यशः संभूतेत्यादिनेति आदिना चंद्रोद्गमभासित्वेन कुमुदानुपस्थितिसंग्रहः व्यवधानेनेति· यथाः सूक्तेकुमुतात्पर्यग्रहोत्तरमित्यर्थः
प्रहेलिकादाविति आदिना यमकादिसंग्रहः मृच्छीमिति रामसेनयालंकायां गोष्टितायां रावणस्योक्तिः उहन्ने उद्धतेय त्कनेकन्नेनतेना
विरलंगलात् गलंतीरक्तस्य संसक्ताऽ यां दीशांघ्रोताद्दशधारयाधौतेये ईशांघ्री तत्प्रसादेनोपनतो यो जयस्तेन जगति जातो । मिथ्या
माहात्म्यगर्वस्तेषां मृच्छीं कैलाससमुल्लासने उत्थापनेय इच्छाया व्यतिकरः आधिक्यं तस्यापि भुजानां स्तवकानां उत्सर्पी उत्करोयो दर्पः ग
र्वः तेनोदुराणां अतिक्रांतजगतां दोष्णां च किं एतदेव फलं यत् वानरैर्मे नगरी रुध्यत इयाम इति निर्वेदः । किमाईदृशफलेनैचित्य
व्यज्यते· तदुपपादकं चोक्तविशेषणद्वयं १९ वक्ष्यमाणकर्मधारयोदाहरणे प्रागुक्तोपसर्जनत्वविरहेणान्तर्गतत्वं गत्यर्थमाह· । किंचेति·
पदाभ्यांयदि पृथक् विशेष्यविशेषणभावानापन्नउपतिष्ठेतेतिअर्थः नचसमासे पदात् पृथगुपस्थितिरित्यवयः समासे एकार्थीभा
वांगीकारे तेनान्तरपदार्थान्वितत्वेनैव स्वार्थोपस्थितेरितिभावः अयमेव चैकार्थीभावो नाम यदितरान्वितये वोपस्थितिरितिस्पष्टत राम॰
द्विदामः एवंचोपसर्जनत्वं इतरविशेषणतयैवोपस्थितिविषयत्वं फलितं एव यदुपस्थितयोस्तथान्वय इत्युत्सर्गः लोहितो भीषाद्दर्पा ९३

दौ समासेऽपि तद्दर्शनात् एवं चोत्सर्गत्यागेन मत्कृदयो हेतवः एव तु छिन्नी जमतेति तत्त्वं अत्रा भवन्मतयोगसत्वेऽपि नकृतिः अभिन्न इति विधे
यत्वस्यापि समत्वेनोपपद्येय संकर्षस्यादोषत्वात् स्वकामिति निर्जितवान् स्वकर्णा केशवकुलः तस्य दासमानासेव कांचीनितवधूषणं
अवरोपयन्ती स्थाने निवेशयन्तीत्यन्वयः न्यासः समर्पितं द्रव्यं तथा कृतं स्थानविदा स्वासुभृतापार्वत्येवस्त्रीयमौर्वी स्थापनस्थानमि
ति ज्ञानता मन्नाशेष्यनयैव शिवं वशीकरिष्यामीति जानता वा आश्रयगुणप्रकर्षेणाधेयगुणप्रकर्ष इति योग्यमिदं स्थान
मिति ज्ञानता वा अत्र मौर्वीपदादेव कार्मुकसंबंधे लब्धे कार्मुकपदमश्लिष्टं उत्सर्जनेति स्वीयवक्षःस्थलन्यासीकरणं न तु अन्यत्स्वदशास्ये
ति नोपमेति भावः तथापि हीति न्यासीकरणे हेतुत्वेनैव उक्तेऽपि तत्र च द्वितीयपत्नमेव हेतुरिति भावः विशिष्टस्य हेतुत्वेऽपि न दोष इति
चिंत्यं पुरीति वक्तव्ये सभारेणाः शिवस्य पार्वतीपतित उक्तिः वपुः शरीरं निरूपाङ्गं सर्वांगप्रधानं चक्षुरेव यस्य विरूपं तस्योत्तरांगं किं च
त्र्यक्षमित्यर्थः नलस्तोत्रमयस्मात्तत्ता यद्वरेषु गृहपतेत् द्यस्तमपि त्रिलोचनेनेत्यन्वयः यत्त्रिलोचनेनास्तिस्तद्यस्तमपि किं च रेषु
मृगपतेरित्यन्वयः उक्ताचयेत्तद्रूपभावादेः स्पष्टतयोपन्यासेन सूच्यत इति दीपिकाकृतः निवर्तत इति तथा च पददोषोद्धारेऽपि
वाक्यविधेयाविमर्शस्तदवस्थ एवेति भावः केचित्तु शितेजन्मनोऽभावात् विशिष्टविशिरेव विवाक्षित इत्याहुः यातं देति अतिचा
पलत्वालिप्यत्नैव चिंततस्य यत्संदामनं बंधनं तस्यैकं सदनं स्थानं कारणं वा अव्यभिचारेण तथात्वं व्यंगपङ्क्ति याभवता सर्वदैव।
रागमप्युक्तान् तेऽद्दत्तचिंता तदीया चिंतापि तत्तांतिग्लानिं तनोति अतोऽस्मान् शिक्षु इति एवं विधेतुः स्तदर्शितत्वात् अतिशो

चावयामित्यर्थः ११ नवजलधर इति उर्वशीविरहे पुरूरवसो मेघादौ निशाचरादिभ्रमानंतरं विशेषदर्शनेन सतीयमुक्तिः कनक
निकषः तेन कषणरेखा १२ जुगोपेति अत्रस्तोपि त्रस्तवत्सम्भ्रमकयासदेगत्मानं जुगोपेति व्याख्येयं · तावतानयप्रकर्षः अनातुरो ऽरो
गी · अगृध्नुः अलुब्धः उत्तरपदेनेति उत्तरपदेन युतो नञ् समस्त इत्यर्थः समासयोग्य इति यावत् विधेयं इति योगिनः प्रधानत्वे ·
विशेष्यत्वे · प्रतिषेधेन अर्थे · नञ्समुदितस्योत्तरपदार्थप्रधानत्वात् आरोपितो घट इत्येवं गोधा इति भावः अत एव प्रसज्यप्रतिषेधो
ऽसमास एवेत्याहुः तदुक्तं अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता प्रसज्यप्रतिषेधोसौ क्रियया सह यत्र नञिति · क्रियान्वयित्वेन
नञ् धात्वर्थरूपक्रियाभावबोधक इति यावत् तथा च प्रसज्यप्रतिषेधे भवति क्रियायामन्वये नयुक्तपदेन समासो न स्यात् असाम
र्थ्यात् इति भावः नवजलधर इत्यादावपि गम्यमान भवति क्रियायामेव निषेधो बोध्यः कथं तर्हीति अत्र हि श्राद्धादीतरभोजित्वं
नार्थः भोजनस्य रागप्राप्तत्वेन व्रतत्वात् व्रतनाधिकारप्रवितान्यनुपपत्तेः अश्राद्धाद्युपपदात् इसः श्राद्धभोजनाभावस्य व्रतत्वाभिति
भावः आक्षेपादिति · अयं भावः श्राद्धभोजि मित्र इति वा चोर्थः श्राद्धभोजनाभाववत्त्वं च तेनाक्षिप्यते · व्रते गम्यमाने णिनिरि
ति सूत्रार्थः णिन्यं तेन नञ्समासे हि व्रतस्य गम्यता इति वक्तृतो सूर्यललाटयोरिति ज्ञापकादसामर्थ्येपि क्वचित्समासः नत प्रकरो
पि स्यात् तावतापि ताहशात्स्वहृदयवैगुण्यं दुर्वारं एतेनाशाद्धेयं निषेधार्थत्वेनासमास एवेत्यपास्तं समाससंदेहेन पर्युदाससं
देहाच्च पौर्वापर्यविपर्ययस्यापरिहाराच्च एवं हि तागीमोवीमित्यत्र विशिष्टस्य विधेयत्वेपि तत्प्रधानमौर्वीत्वस्य प्रसिद्धतया हेयेन प्र

न्नतयाप्रामाण्यप्रविवेकन्यायेन द्वितीयत्वपर्यवसानेन शाब्दतोपगतभूतस्य द्वितीयत्वस्यान्यासीकरणे हेतुत्वेन हृदयवैमुख्यमेव
दूषकताबीजमिति बोध्यं नञ्पर्युदासे इति· समासे एकदेशेनान्वयायोगात् विशिष्टेनारोपितमुक्तत्वेनैवान्वयाद्वेति भावः विव
क्षितार्थाप्रत्यय इति विवक्षितस्योद्देश्यविधेयभावरूपार्थस्याप्रतीतिः सत्यपदार्थयोः विषयताविशेषरूपो विशेषणताविशेष्यभा
ववत्तवाक्यार्थप्रतीतौ भासते सोपि पदाद्यर्थ इत्यन्ये उद्देश्यतावच्छेदकत्वविशेष्यताविशेषणतात्त्वरूपेतत्समनियतो वेति तन्नभ्रान्तेप
वैतेवाक्षिप्तत्वादौ व्यभिचारात् इत्याहुः अभवन्मतयोगे तु परस्परं पदार्थानां संबंधरूपोन्वयोपि न भासत इति ततो भेदः दूषकता
बीजान्तरमप्युक्तं प्रकृतप्रतीति न्यक्काकारकोति विरुद्धस्यमतिविरुद्धागमतिरिति समासः अत्र पदान्तरसंनिधानेनेति विशेषणा
त्तत्र तु विवक्षितार्थाप्रतीतिरिति हतार्थानां व्युदासः किं चाद्ययोर्नञ्काकार्थप्रतीत्योः परस्परविरोधिता किंत्वंशयोर्वाच्यांशयोर्वा·
अमतपरार्थस्य त्वंशयोरेव विरोधे इति न तत्संकरः प्रकाशितविरुद्धे तु प्रथमप्रतीतेन विवक्षितार्थेनैव विरुद्धस्य व्यंजनेनात्र
तथेति ततो भेदः न्यक्काकारकत्वं च प्रकृतबोधप्रतिबंधकतया तद्बोधजन्यचमत्कारप्रतिबंधकतया चेति बोध्यं· सुधाकरेति·चे
इकरसहशप्रगल्भचेष्टितः आकारशब्दः सदृशवाची· विदग्धप्रगल्भौ विशारदाविन्यमरः अकार्यमित्रं·कार्ये विनैव मित्रमित्य
र्थः मयूरव्यंसकादित्वात् समासः अकार्यमित्रमितीति नञोऽन्यार्थत्वे कार्ये मित्रमित्यपीत्यर्थः अव्ययीभावेन समासयो
गात्स्यात्वेनास्याप्रतीतिरिति भावः निरूढेति निरूढयायदघटनयेत्यर्थः अत्र प्रकरणेन रूढेर्बलवत्त्वं बाधित्वा योगार्थोपस्थि

का. री तावपि अविवक्षितार्थव्यंजनया तिरस्कारस्यैवाविरोधो बोध्यः अत एव त्वत्करणोत्क्षिप्तो निहतार्थस्य न दोषत्वं चिरेति चिरकालेन परि
८५ 85 प्राप्तस्य अनेनोत्कंठ्यातिशयः लोचनानंदजनकस्य अनेन सौंदर्यातिशयः। कांतस्य मनःप्रियस्य १६ तत्र त्वमिति दाशरथिबुद्धि
श्च परशुरामोक्तिः यदि तेन रघुनाथेन धनुर्यागजनितामर्षं कुर्वता देवात विजिगीषोरपि भगवतः तत्समर्थादपि भवानीपतेः इदं चेद्दृक्
यज्ञविध्वंसकत्वेनार्थान्तरसंक्रमितं तेनातिरोषवतोऽपि सकाशात्तद्यत्न न त्रस्तं तन्नाम युक्तमित्यर्थः तत्र हेतुगर्भविशेषणं भूतक
रुणामंतानः समूहः तेन शांतस्वात्मायस्य तादृशात् ननु तस्य त्रपैव योत्स्यते किं तवेत्याह तत्त्व चास्त्विति तद्वचनच्छेदे स्कंदः जगदानं
दनसमर्थोऽपि मंदाक्षस्य तारकासुरस्य वधात् लब्धो कस्य दत्त्वात् लब्धो येन तादृशः तेन दत्तोत्सवत्वात्कथमपि तद्विपरीतं कर्तुं नेष्टे अतः त
दस्मरणं युक्तं इति भावः ननु तथापि तव मुनेः किं प्रयोजनं कस्य संबंधो येन त्वत्तो भयं कार्यमत आह स्कंद इव तस्य देवस्य यतोऽहं प्रियः अ
तः कथं विस्मृतः अनुचितं विस्मरणमिति भावः ननु त्वत्प्रियत्वं नास्माकं विदितं तत्राह अथवा शिष्यः तत्तु जगद्विदितमिति भावः अ
हमिति क्षत्रियकुलांतकत्वेऽर्थान्तरसंक्रमितवाच्यं तेन धनुर्भंगकर्तुः साहसातिशयो व्यज्यते १७ दारुणप्रतीयत इति तेन भवप्रतीति
प्रतिबंधस्यैवेति भावः तच्चमत्कारप्रतिबंधो वा परे तु भवस्य प्रत्यांगुणाभूतत्वेन भवानीप्रत्याविशेष्यभूतः पत्यर्थो त्यस्यैव प्रतीयते गु
णस्योत्सर्गतः प्रधानत्वाद्योगादित्याहुः एवं चारोप्याद्देवी ईदृक्पत्नी अतिभयकरी इति मतिर्विरुद्धा भवानीशब्दो दुर्गात्वविशिष्टरूपट राम०
स्यैवेति नात्र दोष इति केचित् गोरपीति यद्यपि हननं तां शास्त्रवतो गोरपि न विधेयं तोऽपि प्रसिद्धरूपोऽपि सिंहो न निरहंकारः अविकारमनागोमहेशः ८५

२८ करत्ववन्मात्स्वामित्वमपीति॰ अंबिकाशब्दस्य जनकताविशेषवत्स्त्रीत्वेन मातरि गौर्यां त्वेन गौर्यां च शक्तिरिति बोध्यं सादरेति॰
स्योपमानत्वस्य वेनबोधनादिति बोध्यं परंत्वत्र परेऽषष्ठ्या एवं विशिष्य दृष्टांतत्वेनोपादाने बीजं चिंत्यं न त्वेवं तुल्यादिपदेरपि चंद्रेण तु
ल्यमित्यादौ तत्तीयार्थान्वयद्वारा स्तुत्यैवोपमानत्वोपमेयत्वयोर्बोधात् स्रोतीत्यादित्यत आह तस्मादिति· अतीत्यनुपपत्येति· अ
यंभावः सादृश्यप्रयोजकसाधारणधर्मसंबंधो ह्युपमा· सादृश्यं चातिरिक्तः पदार्थः धर्मविशेषस्तु काचिदुपाधिः काचिदाकृतिः इत्यन्य

का॰टी॰ १३२ 132

न यथादयस्तु तत्प्रयोजकधर्मविशेषसंबंधएवशक्ताः तत्तुल्यादयस्तु हि सदृशमात्रवाचका इति उपमेय इति समानविभक्तिकपदो
पस्थाप्यत्वादिति भावः उपमानेइति तत्वादेवेति भावः एवं च सादृश्यादिपदप्रयोगेपि आर्थीव अपरे तु तत्र साधारणधर्मसंबंधउ
पमाउपमानत्वं च साधारणधर्मवत्त्वेनेषदितरपरिच्छेदकत्वं तद्धर्मवत्तयापरिच्छेद्यत्वं चोपमेयत्वमित्युपमानानीतिसूत्रे भाष्ये स्प
ष्टं उपमानविशेषणानि तत इति उपमानानिष्ठसाधारणधर्मबोधकानीत्यर्थः एवमुपमानत्वमपीत्याद्यर्थः उपमानेन तत्संबंधामि
ति उपमानत्वस्वरूपस्य साधारणधर्मघटितत्वात्तत्र तत्संबंधबोधोस्त्वित्यर्थः षष्ठीहीति साहि राज्ञः पुरुष इत्यादौ स्वस्वामिभा
वसंबंधबोधिका पुरुषार्थस्य विशेषणत्वबोधिका च सा च विशेषणस्येतरविशेषणत्वार्थसंबंधस्याकांक्षणात्तन्निष्ठविशेषणा
त्वस्य तन्निष्ठस्वामित्वस्य बोधकत्वेपि यथा प्रधाने पुरुषे संबंधस्याहित्वतास्वभावत्वात् संबंधघटकं स्वत्वं बोधयति तदाह यदनेन
रमुपनेति राज्ञ इत्यत्र राजस्वामिकमिति बोधः पुरुषपदेन च तद्विशेष्यसमर्पणमिति षष्ठी शेष इति सूत्रे भाष्ये स्पष्टं एवमिवादि
भिः स्वसमभिव्याहृतचंद्रादावुपमानत्वं तन्निर्वाहकस्याह्लादकत्वादिसाधारणधर्मसंबंधस्य बोधात् तत्र साधारणधर्मव
त्वेनेतरपरिच्छेदकत्वरूपोपमानत्वप्रतीतेस्तद्धर्मवत्तापरिच्छेद्यप्रतीतिं विनानुपपन्नेति तमपि बोधयतीति भावः एवं च चंद्र इवेत्य
त्राह्लादकोपमानचंद्राभिन्नमाह्लादकं मुखचंद्रमिति बोधः अत एवेवादिसमभिव्याहारे उपमानोपमेययोः समानविभक्ति राम॰
कत्वनियमः साधारणधर्मसंबंधस्य कश्चिद्विशेषणतया यथा चंद्र इव मुखमाह्लादकमित्यादौ कश्चिद्विशेष्यतया यथा चंद्र इव मुख १३२

माल्हादयतीत्यादौ· अत्र हि उपमानचंद्रकर्तृकाह्लादाभिन्न उपमेयमुखकर्तृक आह्लाद इति बोधो तोऽपि तयोः समानविभक्तिक
त्वेव· यत्तु अत्र चंद्रसादृश्यप्रयोजको मुखकर्तृकआह्लाद इति बोधं वदंति तेषां मुखचंद्रयोः समानविभक्तिकत्वनियमे मानं चिंत्यं· यत्तु
वाचनिकी समानविभक्तिकतेति तन्न व्याकरणेन सादृश्यवचनानुपलंभात् एवं गज इव गच्छति देवदत्त इत्यादौ बोध्यं· वने गज इव शूरः सम
सू१ रभूमिं गच्छतीत्यादौ उपमानगजकर्तृकवनगमनाभिन्नमुपमेयशूरकर्तृकं समरकर्मकं गमनमिति बोधः साधारणधर्मरूपगमनस्य वि
धेयतयोपमाविधेयिकाबुद्धिः व्याघ्र इव यः पुरुषः स गच्छतीत्यादौ उपमानशूरव्याघ्राभिन्नपुरुषकर्तृकं गमनमिति धीः शूरत्वादिसाधा
रणधर्मस्योद्देश्यतयोपमोद्देश्यिकाबुद्धिः अत एव भेदाभेदप्रधानोपमेति प्राचः यद्यपि चंद्रमुखयोरुक्तरीत्या भेदस्तथापि साधारणधर्मवे
षेणाभेदान्वययोग्यताबोध्योऽत्राधिकं मंजूषायां द्रष्टव्यं· धर्मविशेषसंबंध एवेति अस्य शक्त्या स्वसामर्थ्येन बोधनेन तदन्वयतात्पर्यग्राहक
कतया बोध्यं· तत्प्रकृतोपमानस्य तु वाचक इति बोध्यं· तुल्यादिशब्दास्त्विते च सदृशवाचकाः सादृश्यं च साधारणधर्मवत्त्वयोग्यो धर्मविशेष
इत्याहुः नवेह शास्त्रोत्पत्त्यार्थाविवेको विफलः आर्थ्या उपमानोपमेयभावनिर्णयविलंबेनास्वादविलंबस्तदभावः श्रौत्यामिति तत्साफल्या
दिति बोध्यं संबंधस्येति संबंध एवेत्यर्थः अनुपादेयमिति· धर्मिबोधेऽपि यावदप्रामाण्यं नावच्छिधीयत इति सादृश्यस्यैव विधेयत्वादित्यपि बोध्यं न
वत्यादिभिरिति· असादृश्यप्रत्ययाश्रयेन समासविधानादिति भावः इवेन नित्यसमास इति· व्याकरणे वैकल्पिकत्वांगीकारादाह वार्तिके
तथाऽपाठाच्च नित्यपदस्य कृत्येऽपोऽप्रामाणिकः स्वप्नेऽपीति· वैरिभिः स्वप्नेऽपि तव विजयानुभवादित्यर्थः उपमानेयो विशेषात्स्वभवउत्पत्तिर्यस्य तमि

का॰टी॰ त्यर्थः समरेषु नतु समरे· अत्रयन्नन्यदप्रकृतिकप्रकारवाचिथाप्रत्ययांतयथादिशब्दयोगे यद्धर्मवती स्वाधीनपतिका तद्धर्मवती विजयश्री
रितिअयविशेष्यकोबोधप्रस्ताद्यततज्ञाधर्मस्यैक्यबोधात्साहशं फलतिराज्ञः कांतस्य च बिंबप्रतिबिंबभावः तदालिंगितत्वस्याधिक
१३३ रणकत्वाणाभावोऽनुगामीसाधारणधर्म इतिबोध्यं· चकितेति· भीतहरिणवच्चंचलनेत्राया इत्यर्थः कुपितकोपे· तत्रापिकांतमित्याह
तरुणेतितरुण्याः तारुण्यवत्याः रागुष्ठा हारिणी मनोहरा कांतिर्यस्य तत्त इतिस्थानन विशेषणं· संमदं हर्षं सराभिजमाननं च समभिव्याप्
133 थमंसाहश्यवदभिन्नमिदं हृद्यमिति बोधेयस्मान्मनसा व्यंजनया वा परस्परानिरूपितसाधारणधर्मसंबंधप्रतीतिरितिध्येयं अरुणाम्र ह
शाकांतिमत्त्वं साधारणो धर्मः अत्यायतेरिति· आयतिरुदर्कः शुद्धिर्दीर्घता च· उद्धतानां गर्ववतां दानवानां च· दिव्यैरुत्कृष्टैः स्वर्गीयैश्च प्र
भाभिः प्रकृष्टशोभावद्भिः भातैः कर्त्रीरिक्रिः अनयायमयैः अपापभावप्रचुरैः उपायैः सामभेददानविग्रहैः अदः एतत् भुवनं लक्ष्मीः क
मला संपद्व राजो वनं गच्छतीव शूरः समरभूमिं गच्छतीत्यादौ क्रियासमभिव्याहृते गादेरुत्स्वेक्षाद्योतकत्वमेवेति न तत्रोपमालंकारः स्प
ष्टं चेदं सन्निधायकमाष्ये अवितथेति· अव्यर्थ वांछित विषयाविस्तारे प्रकृष्टगुणानां भारिमाणागीता श्रीर्यस्य द्योतकपोरिति द्योतक
पदं बोधकपरं गांभीर्येति· गांभीर्यं दुर्ज्ञेयांतःकरणत्वं अतलस्पर्शित्वं च· भुजंग उपपतिः सखुइः शंतनोरेवपतित्वात· दुरालोकः दु
रवेनालोकपितुं शक्यः अंबररत्नं सूर्यः अत्रबोधउक्तदिशोह्यः उत्तरत्रनिदाघांबररत्नतुल्याभिन्नो दुरालोक इतिबोधः तुल्यत्वप्रयो राम॰
जकं च दुरालोकत्वमितिपस्तान्मनसा व्यंजनया वा बुध्यते· सचेत्थं उपमानदुरालोकनिदाघांबररत्नाभिन्नो दुरालोको राजेत्येवमिति व १३३

हवः अत एवार्थालंकारमात्रार्थयोरभेदान्वयस्येति द्वियहवाक्ये कल्पनस्य निर्वाहाय अस्य वतेरपि धर्मिवाचकतैवोचिता । अनुशासनस्य त
थैव शक्तिग्राहकत्वाच्च । क्रिययोस्तुल्यत्वे एव तेन तुल्यमिति वतिः साधुः अत एव ब्राह्मणावदधीत इत्यत्र ब्राह्मणपदस्यैतत्कर्तृकाध्य
यनेन लक्षणेति भाष्यकृतः एवं चवं द्रवन्मुखमित्यादौ भवति क्रियामध्यास्त्वत्वं द्रुमवनसदृशं मुखं भवनमित्येव वाक्यार्थः चंद्रमुखयोः सा
दृश्यं तु व्यंजनयैवेति बोध्यं गंगाभुजंगवदित्यत्र गंगाभुजंगपदस्यैतत्संबंधिगांभीर्यगरिमलक्षकत्वेन गंगाभुजंगसंबंधिगांभीर्यसदृ
शमेतत्संबंधिगांभीर्यमिति बोधः तदनंतरं गांभीर्ययोः सादृश्यमूलाभेदाध्यवसायेनाभिन्नधर्मम्लापश्चात् गंगाभुजंगराज्ञोः रूपमाया
तीति गंगाभुजंगस्येवास्य गांभीर्यगरिमेत्यादिवाक्येष्वप्यन्वये गांभीर्यगरिमेत्यस्य सादृश्यात् गंगाभुजंगेष्वन्वये न सादृश्यबोधस्यैवानु
भवेन दृष्टान्तावपि तथैवौचित्यात् एवमरविंदतुल्यो भातीत्यस्यारविंदतुल्यकर्तृकं भानमिति वाक्यार्थः भानमेव च साधारणो धर्मः
एवं चोपमाविधेयिकाधीः यदा तु धर्मीतरेण तुल्यत्वं तदोपमाया उद्देश्यतावच्छेदकत्वमिति दिक् नरव्यंग्येति सत्यपि व्यंग्ये स्फु
टतया ऽलंकारकृतचारुतया प्रथमतश्चित्ताकर्षणादिति भावः विद्यमानव्यंग्यस्य साध्यत्वादिप्रयोजकतानेत्याह अवर्जनीयेति ।
अस्फुटतरतयेति अत्रालंकारवैचित्र्यप्रतीतिर्वाहितप्रतीतिकतया ऽस्फुटतरत्वं । यत्र वाच्यप्रतीत्यव्यवधानेन व्यंग्यप्रतीतिस्तत्र तु भय
मिति भावः अस्फुटतरातिरिक्तव्यंग्यसाहित्ये नाव्यंग्यत्वमत्रेति रहस्यं न द्वैवमिति । राजविषयरतिभावस्य प्रकारानुशासनस्य तत्स्वत्वेपी
तियद्येमत्वादित्याशयः तस्मादप्यनुपमात्वादिति । उपमालंकारत्वाभावादित्यर्थः वाचकवाच्योपस्कारद्वारा रसाद्युपकारकस्यैवालंका

का. टी. रत्वादिति भावः नीरसेऽपि स्वैवैचित्र्योपपादनात् ततः चमत्कारमात्रं न त्वलंकारत्वमिति तात्पर्यं एकस्य लोपे इति । लोपोऽत्रानुपादानं ननु चेद्
१३४ त्वमुखत्वादिधर्मप्रतीतेर्न धर्मलोप इत्यत आह साधारणस्येति नित्यधर्मेति इवस्य साधारणधर्मसंबंधबोधकत्वेन तदुपादानं विना त
दर्थबोधाभावात् किंच षष्ठीसमस्यतात्र हि धाने न च्छमादृश्यर्थस्य धर्मोपादानं विनान्वयासंभवादिति भावः धर्मलोपे तदसंभवादिति ।
इदमपि कंठ्योपमासमादायेव । धन्यस्येति । अनन्यमानन्यस्येति बहुव्रीहिः चेतइति मेवो धने । आकृष्टेति । संपराये । युद्धे । यत्यार्थिने न
134 याशत्रुसेनया । कृतांतो यमः क्रूरत्वमत्र साधारणो धर्मः करवाल इवेति । अत्र घातकत्वमाधुर्यनाशकत्वानेकमेण साधारणाध
र्मः उपमाशब्दस्य सदृशमात्रवाचकत्वेपि साधारणधर्मसंबंधे नित्यसाकांक्षत्वाभावाच्छब्दत्वाभावाद्धार्थीत्वं । विषकल्पमिति ।
ईषदसमाप्तौ विधीयमानस्य कल्पपः सादृश्यपर्यवसानादिति भावः उपमानमात्राद्विहितत्वेति तु पमानानंतर्यनियमेनेत्यर्थः
सत्रुलेति । सकलकरणापरविश्रामश्रीवितरणं न सरसकाव्यस्य । दृश्यते यवा निशम्यते सदृशमंशांशमात्रेण । अपि रत्नगम्यः
करणं चक्षुरादि । परविश्रामो विषयांतरेष्वेसुखं तज्जन्यशोभादाचित्यर्थः अत्र विशेषतइति । अत्रास्मदृशीनश्रवणविषयत्वे
न तुल्यमतयोक्तं शत्रुणां अस्मदगोचरं किंचिदुपमानं भविष्यतीति सादृश्यपर्यवसानादुपमानलुप्तोपमैवेयं । एतेनासमालंकारो
पमानुपमातिरिक्त इति रत्नाकराद्युक्तमपास्तं । अत एवोपमानानुपादानइत्युक्तं न त्वसत्वइति वस्तुतः साविशिष्टानुपादानमात्रे रामं॰
णोपमानलोपव्यवहारः एतेनानन्वयोऽपि व्यपास्तं । अनन्वये उपमानासत्वस्यैव विवक्षितत्वात् चिंत्यमेतदिति । तदीजंतु काव्य

१३४

मेत्वाद्वोपमानं॰ चंद्रस्य महत्त्वं शंभुरिव मित्यादौ चंद्रस्यैवोपमानत्वावगमात् एवं चोपमेयलोप इति वक्तुमुचितमिति उद्भारस्फ काव्यस्य स
मामितस्य काव्यनिष्ठसादृश्यप्रतियोगीत्यर्थः काव्यस्य वर्णनीयतयोत्कर्षायोपमेयत्वस्य विवक्षितत्वादित्या ऊः तद्विक्षानादिति॰
एवं च सादृश्यबोधकवादिलोपे षड्विधेत्यर्थः ततइति कुमुदनाथत्वं तद्विकासकत्वात् गंडइव पांडुरिति उपमानानीति समासः तेना
नंदे ततत्वनकेन॰ माहेंद्री॰ प्राची॰ अमितेति अमितभुजंगस्त्री द्राविषः सर्पजातिभेदः तद्वद्दीर्घगात्री क्वाधारत्वादसिरेव पत्रंय
स्य सः रुहरुहिकारभसोत्कंठतदाहितश्चित्रआश्चर्यं भ्रमत्स्तराग स्वरितश्चारोगमनं यस्य सः उन्नतकपोलशोभः यत्तु पूर्वोदाहरणो
उपमानानीति समासात् श्रोतीश्चत्वामितभुजगवदीर्घगाइति मध्यमपदलोपि समासादार्थीति भेदमाऊः तत्र विनिगमनाविर
हात् पौरं सुतीयतिइति॰ पौरं नागरजनं सुतमिवाचरतीत्यर्थे नपमानादाचारइति क्यच्॰ उपमानवाचकात्कर्मण आचारेर्थे क्य
जितिसूत्रार्थः उपमानादित्यनेन इवार्थस्य हेतोः प्रवेशः सूचितः अत्राचारः स्नेहपालनादिरूपः एवं चोपमानभूतसुतकर्मतयोरक
र्मकाचार इति बोधः एवमंतःपुरइवाचरतीत्यर्थे कांतःपुरीयतीत्यत्रापि बोधक्रमः अत्राचारः स्वच्छंदगमनादिः नारीवाचरतिना
रीयते॰ कर्त्तुः क्यङ् आचारोवृत्तिनयादि॰ अत्र सादृश्यसहशेनत्वात्र बोधकाभावाद्वाचकलुप्ता बोध्या यत्तु सुतपदस्य सुतसादृश्य
लक्षकत्वेपि सादृश्यवाचकाभावाद्वाचकलुप्तेति तन्न चैवं इवात्रिपद्मा ननमित्यादावपि वाचकलुप्तापत्तेः विचित्रेति विचित्रचरित्रैर्वि
त्तइति अर्थः तेन विना क्षुंडुप्रचरणपाविनि तुंडुप्रत्ययः नारीयते॰ नारीवाचरतीत्यर्थः स्पर्धइति॰ रागोद्दपार्थः रागतुल्यकृतिः साधुत्वमात्रा

का॰टी॰ थी। णाफुलर्थो भावः अव्ययकृतं भावे एव विधानात्। तस्मात्कर्मणो रेवकर्त्रैरिव चोपमानोपमेयभाव इति लुप्तोपमैवेयं। सवितेति। स
134 रितेमनसि स्तर्यश्चइ सदृशः आह्लादकत्वात्। दुरिते चेदस्तर्यसदृशः दुःखदत्वात्। एवमुत्तरत्र। क्रिय एवेति। यद्यपि क्विप्प्रकृतेः कर्त्रं
श्रतत्वसादृश्यप्रयोजकाचारलक्षणेति कथं धर्मलोपः तथापि तन्मात्रबोधकाभावाल्लोपव्यवहारः परिपंथिनीति। शत्रुमनोराज्यशोने
135 रपीत्यर्थः साक्रान्त दुराक्रम एवेति किंवक्तव्यमिति भावः संपरायो युद्धं। राजा कुंजर इवेति उपमितं व्याघ्रादिभिरिति समासः दुराधर्षत्व
स्य समानधर्मस्य प्रसिद्धत्वान्नन्यूनपदत्वं। औपम्यं समासगम्यं अत्र रूपकं त्विन। मनोराज्यशोनैरित्यादेरनन्वयादित्याशङ्कः दुंदुलंतो इ
ति। दुंदुलायमानो मरिष्यसि कंटककलितानि केतकीवनानि। मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न प्राप्स्यसे। दुंदुलायमानः अ
न्वेषमाणा इत्यर्थः एककारश्शाठ्येन प्रार्थयनित्यर्थ इत्यन्ये काचित्सौभाग्यमात्मनः सूचयंती प्रियसंनिधौ भ्रमरं प्रत्येवमाह। अत्र प
कृतत्वान्मालत्युपमेया। कुसुमांतरस्याशाप्युपदेशेन त्वदप्राप्यप्रत्युक्तं गुणमस्योपमानामिति प्रतीतेरस्तुपमितिक्रियानिष्पत्ति
रिति बोध्यं। क्वचीति विषयसप्तमीति रामसेइति। वाद्युपमेययोर्लोप इत्यर्थः अरातीति। मदग्रेपि वैरिविक्रम इति नयनाविकाम्सः
कृपाणो नोदग्रो भीषणो वा ऊर्ध्वस्य सहस्रमायुधानि यस्य तमिवात्मानमाचरतीति कर्मणि क्यच्। आयुधसहस्रनिर्गत्यास्यप्रतिप रा॰ ९६
क्षेत्त्वारणास्येकेन कृपाणेन निर्वीहाहीरप्रकर्षः सहस्रायुधीयतीति पाठे सहस्रारं चक्रमायुधमस्य विष्णोस्तमिवाचरतीत्यर्थः
विशेषणाद्वारेति। सहस्रायुधीयतीति पाठे इदं। ससहस्रायुधीयती पाठे साक्षादुपात्त इति बोध्यं। अन्यथा क्वचेति। इच्छाकान्तुनायं 134

त्रातीत्यादिविशेषणानामसामंजस्यात् तथापीत्यतः प्राह उपमेयधर्मयोरितिपाठः उपमानधर्मयोरितिपाठस्तु युक्तः तच्चोपेतपदमे
व दृष्टोऽस्त्वित्यस्योदाहरणात् तत्र शोभमानीतितत्र शोभमानिसतिमृगनयनामुनेर्मनो नयते हरतीत्यन्वयः ललिताय विलासाय यच्चविनी
रोगादन्नो विग्रहः शरीरं यया· स्मरशरैर्विशीर्णीकृतमंतरं यस्याः सानेदमुदाहरणमिति· अत्रस्त्व मात्रवोधकपदाभावात्रयाणां लो
पसंभवेन चिन्त्यमेतदित्याह: अत्रायः शबलेनेति अयः शबलपदेन स्वार्थसदृशोलक्ष्यतइतिभावः अतिशयोक्तिरिति· अयः शबलशब्द
यः शबलत्वेन स्वार्थसदृशक्रूराचारत्वरूपकान्तेनाभिव्यक्तीति रूपकत्वाये उक्तरूपसिद्धेरितिभावः निर्विषयत्वापत्तेरितिकमलमनंभसी
त्यावपि कमलादिपदैः स्वार्थसदृशमुखादेर्लक्षणादेतद्दोपत्तेरितिभावः वस्तुतोयं ग्रन्थो लुप्ताविभागो वा कासमासवत्ययाविशेष
गोचरतयाश्रदृशास्त्रमुत्पत्तिकौशलप्रदर्शनपरत्वादत्रशास्त्रेणामुत्पाद्यतामर्हतिसाचेयमुपमावस्त्वलंकाररसरूपाणां व्यंग्यानां वस्त्व
लंकारयोर्वाच्ययोश्चोपस्कारकतयालंकारतयालंकारतां भजते· न चैवमन्यानुपस्कारकसाहरणनिबंधने सच्छिन्नमूलः कृतजेनरोगु
त्तस्योपरिष्टात्प्रवक्ष्यमाणत्वात् शृंगारशेषस्याङ्गनाशनस्य पूर्वोत्थितो धूम इवावभासे इत्यादौ अलंकारव्यवहारानापत्तेः आपणेरिविक्री
यमाणानादृशायां नाटकादेः नायिकाकर्णोद्यानुपस्कारत्वेपि अलंकारव्यवहारवदुपपत्तेः कदाप्यलंकारभावमप्राप्तमंजूषादिगतक
टकादिवत् अलंकृतवीणागतधर्ममात्रसंस्पर्शानिबंधनत्वाच्च· एतेन यत्र सकलवाक्येन प्राधान्येन व्यंग्योपमा तत्राप्यलंकारध्वनिव्यवहारो
व्याख्यातः इयं चोपमा यथेव सदृशतुल्यादिशब्दोपादाने वाच्यालंकारः तद्वत्प्रतिपक्षादिशब्दोपादाने लक्ष्यासाधर्म्यस्याभेदादिति

का॰टी॰ एकशब्दवोध्यत्वेन सर्वोपमानगतत्वादित्यर्थः तद्वेदादिति उक्तमुपमानं विभ्रांतेरित्यर्थः यथा मालाकाचिदेकजातीयैः कुसुमैः क्वाचि
१३६ द्विजातीयैरपि तथेयमपि सजातीयैर्विजातीयैर्वा बहुभिरुपमानैर्घटितेति द्विविधा मालोपमेत्यर्थः अनयेनेति· मनस्विता· पांडित्यं· इत
136 रइत्यर्थः ज्योत्स्नेवेति परांस्पष्टार्थं। अनवरतेति निरंतरस्वर्णदानाय जललवभृतेन तत्संवेद्दकरेतरंगिता· पूर्वपक्षाद्भावेनश्रेणी रूपमिलि
ताअर्थितति यस्य· भाग्यतिर्वचनं मतिरिवेति· चित्ता व्याप्ता· तस्य नृपस्य समेवतस्य जयश्रीः पूरेतां जेतुं शक्ता नेति संबंधः वैचित्र्यम
हस्त्वेति विंवइति विंवभावादिभेदेन लोकसिद्धकाल्पितादिभेदेनोपस्कार्यभेदेन निरवयवादिभेदेन अन्योन्योपपावत्स्वरूपपरंपरितत्वे उपा
यत्वस्यानुकल्पप्रातिकल्पादिभेदेन तेषां परस्परं गुणने इयन्ता यावत्क्रमशक्यत्वादिति भावः इत्युपमालंकारः उपमानेति· नविद्यते
न्वयः संबंधो यथाः उपमानांतरेणायत्रसोनन्वयइति अन्वर्थमलंकारनामेदं· तत्रान्वर्थसंज्ञा वललक्ष्मणमाह उपमानांतरेति· भेदोप
चारेणेति· भेदेसत्यपि तद्ग्रहारितसादृश्येणोपचारेणेत्यर्थः आपाततः शाब्दवोधोपपन्नेन उपमानांतरव्यवच्छेदबोधाय च आहार्यः
तदुपचारः एतेन देशकालादेशकालादिभेदाद्भेदो वेति परास्तं तथासत्युपमायाएवापत्तेः गगनं गगनाकारमित्यादौ तद्युगेत
द्देशेना यथा गगनं तथैतद्युगे एतद्देशेपीति गोधात· अनन्वयेतु निरूपमानत्वनिमित्तोत्कर्षोपस्थयमेवस्वसमानधर्मस्तु रूपापरो
नैतत्समानधर्मेति प्रतीयते वहुव्रीहीति· उपमानांतरसंबंधाभावपदं वहुव्रीहिणानन्वयमाहेत्यर्थः यद्वा संज्ञेति संज्ञाभूतस्यापि राम॰
योगकथनमित्यर्थः तथाच योगरूपेयमिति भावः उपमानांतरेणेति तन्विदमयुक्तं· कस्याप्युपमानस्याभावेनांतरशब्दप्रयोगात् १३६

गतेरत आह उपमेयमभिन्नेनेतीति । एकस्येत्तूपमानव्यवच्छेदाय एवकार इति एकस्येवेति भिन्नशब्दबोध्यत्वव्यवच्छेदकैवकार इत्यर्थः । वैचि-
त्र्येति यद्यप्यस्यावदनमिव वक्त्रमित्यत्रानन्वय एव तथापि सदृश इति वैचित्र्यस्फोरणायेत्यर्थः । एकवाक्यगो इत्यस्य एकोपमाबाधक-
शब्दप्रतिपाद्य इत्यर्थः । तत्फलमाह त्रिपर्यासेति उपमेयोपमेत्यर्थः । वस्तुतस्तु तत्र द्वितीयसदृशव्यवच्छेदफलकत्वाभावेन योगलभ्या-
र्थान्तरतारतम्यसंभवाच्चेदमस्य व्यावर्त्यं । किं तु तादृशस्थले एवं तस्य फलसंभवात्तद्रूपकथनमेतदिति ध्येयं । न केवलमिति । निता-
न्तकान्तिः अतिशयितकान्तिः यावन्तो विलासास्तावत्युधाभिधस्य समकामस्तस्य लास्या वा सान्येत्यस्थानाभिप्रेतसाधर्म्यमात्रमित्यर्थः
न तु भेदांशो बाधात्तद्रूपके चन्द्राद्यभेदबुद्धिः फलं तत्फलत एव चमत्कारः अत्र तु परास्मिन्न स्वसाधर्म्याभावकृतः न तत्राभेदबुद्धिकृ-
तः तस्याः सिद्धत्वादिति ततो भेदः एतदग्रेऽत्र दशाविशेषादिभेदात्तद्भेदोपचार इति क्वचित्पाठस्तु सोऽपपाठः तथा सत्युपमायाम् ए-
वापत्तेः देशकालभेदेनाप्युपमेवानन्वयत्वं इति प्रतीतेस्तत्राप्यनन्वय एवेत्याशय इत्यलं । ननु भुवनत्रितयेऽपि मानवैः परिपूर्णे विबु-
धैश्च दानवैः । न भविष्यति नास्ति नाभवन्नृप यस्ते भजते तुलापदमित्यादौ सर्वथैवोपमाननिषेधात्मकोऽसमालंकारः प्राचीनैरु-
क्तः उपमानत्वसोपमातिव्याप्तिवारणाय सर्वथैवेति । एवं च तत्र ध्वनितेनैव चमत्कारोपपत्तौ अनन्वयस्य पृथगलंकारत्वं किमर्थं यदि
तु रस्य तु कुलत्तया कृताश्चिदंगाद्वषणाय सारतां यथा चमत्काराय तथा प्रकृते उपमालंकाराभाववर्णनमेव चमत्कारायतत्तु
तेत्रासमनामा पृथगलंकार उक्तश्चास्ते तर्हि तद्ध्वनिनैवोपपन्निरिति चेन्न । पर्यायोक्तमाह शपन्नेलाप्रस्तुतप्रशंसादौ ध्वन्यमानार्थसत्वेऽपि

का.टी. वाच्यार्थकृतचमत्कारमादायालंकारत्वमुपपन्नं । अन्यथा दीपकादावप्युपमाभिव्यक्तेरेव चमत्कारोपपत्तौ तेषामप्येतदलंकार
त्वेन स्यादिति भावः । केचित्तु सर्वेषु उत्कृष्टगुणत्वमिति प्रतीतेर्व्यतिरेकालंकारध्वनिरेवात्रेति वदन्ति तन्न चिन्त्यं । इत्यनन्वयः । विपर्यास
इति । तयोः काव्यनिबद्धोपमानोपमेययोरित्यर्थः । विपर्यास इति स च वाक्यद्वये एव संभवति । तत्र वाक्यद्वयं शाब्दमार्गेणाऽतेन रा
मराघवयोर्मिथस्तुल्यत्वावितत्वादौ नाव्याप्तिः । तेनापि रामो राघव इव तुल्यो राघवो राम इव तुल्य इति वाक्यार्थभेद इतीतः । यौगिकीति ।
उपमेयेनोपमापन्नेति यौगिकीत्यर्थः । एकस्य साधारणधर्मत्वे इयमिति बोध्यं तदाह विपर्यासस्त्वप्युपमानान्तरव्यवच्छेदार्थ इति । ए
केन हि धर्मेण तत्साम्ये एकत्र वर्णिते तेन धर्मेणापरस्य साम्यमर्थप्राप्तं पुनः शब्देनोच्यमानं तृतीयसदृशव्यवच्छेदफलमिति भावः ।
१३७ अत एवात्रोपमानस्य साधारणधर्मसंबन्धकृतचमत्काराभावात् कमलेवेति अत्रातिस्पष्टहारी यत्र प्रचितत्वविस्तृतत्वानि त्रिषु साधारण
धर्माः । इत्युपमेयोपमा वाच्यसाधर्म्यालंकारान्निरूप्यावगम्यसाधर्म्येषु निरूपणीयेषु प्रथमं प्राधान्यात् उत्प्रेक्षामाह संभावनमिति ।
अथ । वाच्यसाधर्म्यालंकारनिरूपणानन्तरं उत्प्रेक्षा निरूप्यत इति शेषः । समेन । प्रकृतमात्मनः समं करोतीति समम् उपमानं । उत्कटाप्र
कृष्टस्योपमानस्येक्षा उत्प्रेक्षा । एवं चोत्कटोपमानकोटिकप्रकृतविषयकं संभावनमुत्प्रेक्षेत्यर्थः । समेनासंभविनेति अलोकसिद्धेन
कविकल्पितेनेत्यर्थः । तदुक्तं चक्रवर्तिना । यदायमुपमानांशो लोकतः सिद्धिमृच्छति तदोपमैव येनेवशब्दः साधर्म्यवाचकः । यदा पुन राम०
रयं लोकादसिद्धः कविकल्पितः तदोत्प्रेक्षैव येनेवशब्दः संभावनापर इति । इदं चेवशब्दसमभिव्याहार एव अन्यत्र तु संभविनापि । तेन मुखं १३७

चंद्रं मन्ये इत्यादेः संग्रहः चंद्र इव मुखमित्यादौ तद्रूपमेव । एकरूपतयेति तादात्म्येनेत्यर्थः । एवं चासदृशयोः संभावनं नोत्प्रेक्षालंकारः । सा
दृश्यातिरिक्तमन्मथकस्मरणादवगत् । किंतु वक्तृमात्रे । तेन वदनकमलेन गलेस्मितसुधमालेशमावहसि यदा जगदिहजदैवज्ञानेदृशा
धिंगारोन विजितमित्यादौ नोत्प्रेक्षा । अत्रास्मितस्य संभावनोत्थापकत्वेपि जगद्विजितरूपविषयविषयिसाधारणत्वाभावा
त् संभावनाचरमणीयधर्मनिमित्तिकात्वा । जेन त्वं स्थाणुनानेन भाव्यमित्यादौ निश्चलत्वादिसाधारणधर्मनिमित्तकसं
भावनायां नातिव्याप्तिः । रूपकादिवारणायेति व्याप्तिवारणाय संभावनमिति प्रकृतस्यान्यस्य च प्रकृततावच्छेदकरूपेण ज्ञानमित्यर्थः । ते
न यत्राहार्यसंभावनं तत्रैवोत्प्रेक्षा । जेन रामसित्रिगुणतरशृणमं विलोकावनमंडलेशायोध्याराधरो यं स्यादित्युत्प्रेतिकेकिनइत्यत्रा
नाहार्यसंभावनायां नाव्याप्तिः । अत्र तेषां न्यायप्रकृत्या संभावनायां अनाहार्यत्वं । आहार्यत्वेपि तत्कोटिसहचरितभूयोधर्मग्रहिशोषा
कत्वस्योत्कटकोटिकत्वस्य संभवात् । इव त्वं नमन्ये ज्ञाने ध्रुवैमिकहेतवं यामिशंके उत्प्रेक्षे इत्यादिभिः प्रतिपादकैः सहिताप्युत्प्रे
क्षासामग्री तत्र वाच्या सा यत्र प्रतिपादकशब्दरहितं तत्सामग्रीमात्रं तत्र व्यंग्या । यथा वक्त्रमाशोक्षेत्रेवादिपादादाने यत्र तत्सामग्रीर
हितं प्रतिपादकमात्रं तत्र संभावनामात्रमेव नोत्प्रेक्षेति बोध्यं । हेत्वादीति । आदिना फलस्वरूपे । बहुप्रकारेति । जातिगुणक्रियाद्र
व्याणां अभावस्य च संभावितत्वेन स्वरूपोत्प्रेक्षा पंचधा । एवं हेतुफलयोरपि जात्यादिरूपत्वेन तयोरपि प्रत्येकं पंचविधत्वं । एवं उ
त्प्रेक्षा निमित्तस्य धर्मस्योपादानानुपादानाभ्यां बहुभेदेत्यर्थः । परंतु ईदृशेषु चित्रसहस्रेषु न चमत्कारातिशयापेतिनयं यत्र कृतोक्तं ।

का.टी. उन्मेषमिति। विकासमित्यर्थः। जातिवैरी सहजशत्रुः स्वभावलग्नत्वं तत्रेत्याध्यवसितः स्वाभाविकः शोभासंबंध इत्यर्थः। संभावित
मिति। अतिमनोहरत्वेननिमित्तेनेति भावः। अत्र लग्नपदेन लक्षणयाप्ययमुपस्थिते स्वाभाविकशोभासंबंधे यथोक्तहर्षहेतुक
१३८ पद्मलक्ष्मीलग्नत्वतादात्म्यसंभावनात्तात्पर्यानुपपत्त्यैव च लक्षणा। लक्ष्यगतातिशयप्रतीतिश्च प्रयोजनं। एतावतैवोत्प्रेक्षायां सा
ध्यवसानत्वव्यवहारः शाब्दमिति बोध्यं। न च हेतुफलयोरपि स्वरूपतया स्वरूपोत्प्रेक्षैव सर्वत्र वक्तुमुचितेति वाच्यं हेतुत्वफलत्वाभ्यां
निर्दिष्टेतरस्य स्वरूपशब्दार्थत्वात्। किंचिद्धि विप्रस्यानुभवसिद्धत्वात्। लिंपतीवेति। भ्रमातिशयप्रकारकत्वसकलवस्तुमलिनीकरणा
1386 त्वादिनिमित्ते। अत्रापि व्यापनाद्युपस्थितिः शाब्दैव। व्यापनादीत्यादिपदेन कर्तृकालिंपतं नभः कर्तृकांजनकर्मकाधःप्रसरणं गृह्यते।
नभः कर्तृकांगकर्मककर्मकव्यापनं तु स्वतः संभवत्येवेति बोध्यं। अत्रोत्प्रेक्षैवेति इं। न समभिव्याहृतेवशब्दस्य संभावनाबोधकत्वात्। सा
ऽपि चेहं समुत्रे भाष्ये। अपात्रमिति। क्रियोपसर्जनस्य कर्तुरन्यत्रान्वयायोगात्। तदुक्तं दंडिना। कर्त्रा यद्युपमानं स्यान्न्यग्भूतो
सौ क्रियापदे। स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितुमिति। देवदत्त इव यज्ञदत्तः पचतीत्यादौ पदांतरोपस्थाप्यकर्तृवि
शेषणस्य तूपमेयत्वं भवत्येवेति बोध्यं। प्रथमांतविशेष्यकबोधवादिमतेप्याह। विवक्षितेति। तन्मतेपि शाब्दशाब्दविवेके न कि
स्वरूपोत्प्रेक्षेति व्यवहार इति भावः। उत्तरार्धे तूपमैव। उत्प्रेक्षासाधकाभावात्। एवं च नामसमभिव्याहृतेवशब्देन तत्रैवोत्प्रेक्षा राम॰
यत्र संभावनोपयुक्तविशेषणादानं। यथा बालेंदुवक्राण्यविकाशभावात् बभुः पलाशान्यतिलोहितानि। सद्यो वसंतेन समा १३८

गतानां नरवद्गतानीव वनस्थलीनामित्यादौ। यत्र कश्चित् स्थितैरपि नरत्वज्ञातैर्वक्रत्वलोहितादिनोपमायां वक्रांशकत्वतया वसं
गतायकमगजवनस्थलीमवेक्षितरूपविशेषणाकल्पनं उत्प्रेक्षागमकं उपमायां तस्यानुपयोगात् इत्युत्प्रेक्षा। ससंदेह इति।
अत्र प्रकृतस्य समेन यदि त्वनुवर्तते। प्रकृतस्य समेन सादृश्यज्ञानप्रयोज्योपः संशयः संशयज्ञानं ससंदेहनामालंकार इत्यर्थः
संदेहे तस्य हि विषयतया तन्निष्ठि इति ससंदेहः अत एवैतो गतासाक्षगतानजाने गेहं गजामेत्स्दर्यं गजावेत्यत्र न संदेहालंका
रः सादृश्यमूलकत्वाभावात् अस्य प्रेमसाचोत्कर्षकत्वेपि वर्णनीयोत्कर्षकत्वाभावाच्च अस हि विषयेपि कस्याचित् प्रेमसंभव
त्वसंशयस्य समकोटिकोयाद्य इत्युत्प्रेक्षा स्थाणुर्वा पुरुषो वेति संशयवारणाय सादृश्यसंशयस्त्विति। सादृश्यमूलकत्वा
द्यभावेत्तु संशयमात्रमेव नालंकार इति बोध्यं अयंमिति। इतः युक्तः विकल्पान् संशयान् आजौ युद्धे अयं किं मार्तंड उत स्वदन्यो
वेति संशयाकारः अत्र प्रतापेन दुर्निरीक्ष्यत्वसाम्यान्मार्तंडत्वसंदेहः दुराधर्षत्वसाम्यात्कृशानुत्वसंदेहः कृशानुसकलसंहर्त्तृ
त्वसाम्यात्कृतांतत्वसंदेहः उक्तानीति। मार्तंडादिवैधर्म्येण मार्तंडत्वाद्यभावनिश्चयेपि कृशानुत्वादिसंशयात् अस्य निश्चयगर्भ
ता वैधर्म्योक्तिस्तु सति मार्तंडत्वसंशये कृशानुत्वसंशयायोगात्तत्संशयनिहत्यै कृतान्तनिश्चयगर्भत्वोपमाननिष्ठवैधर्म्योक्तौ।
आद्यंवते चसंशयः मध्ये निश्चयः स निश्चयगर्भ इति तत्र लक्षणात् निश्चयांतोपीति। उपमेयनिष्ठवैधर्म्योक्तेति भावः यथेंदुः कि
मित्यादौ ललितवचनैः सुखत्वान्निश्चयेऽप्येकेनापि रूपेण संशयाभावात्। अस्यालंकारान्तर्वीजं सादृश्यवैचित्र्येति। प्रतीयमानवदि

का॰टी॰ ति॰ आपाततः संशयेऽप्यंग्यनिश्चयकृतोऽत्यन्तचमत्कारः निश्चयस्य वाच्यत्वेन तु न स इति भावः अत्र निश्चयगर्भतया संकीर्णो निश्चयान्तः
१३५ ।सुदृक्षणचपलाञ्जलदाश्रुतालतावातरुग्णरूपादिति संशये निमग्नः गुरुनिश्वसितैः कपिर्मनीषी निरणैषीदथ तां वियोगिनीत्यादौ॰
139 अत्र मंत्रणादिगजकटकोदाविवालंकारव्यपदेशः किंशहरुणदेश्चनमकोटिकसंशयविषयत्वेऽशानोक्तिः अयं किं मार्तण्ड इत्यादेरयं मा
र्त्तंड इत्यादि संशयविषय इत्यादिरर्थः स्वसंशयज्ञापनाय च परंपरितत्थोक्तिः अस्या इति॰ अस्याः सर्गविधौ प्रजापतिर्निर्माता अभूत् नु
किं चंद्रः किं वा मदनः किं वा पुष्पाकरो मासो वसंतः इति प्रजापतिधर्मिकसंदेहत्वादिरूपविरुद्धनानाभावकोटिकः संशयः एतन्निर्मातरि
कांतिप्रदत्वमत्वेन चंद्रस्य च रतत्वेन कांतिप्रदत्वं तयोः सादृश्यं॰ अस्याः शृंगारैकरसदीपकरूपलावण्यादिमत्वेनाधरदशनादिरूपपुष्पवत्वेन
तन्निर्मातरि तादृशलावण्यादिसंपदहृद्यायाः पुष्पवत्या स्वसत्वेन मदनवसंतयोरपि तत्संपत्वात् तद्रूपसादृश्यमूलकोऽयं संशयः तत्साम
ग्रीसंपन्नेनैव तद्धर्मवतो निर्माणसंभवात् केचित्तु अस्याः सर्गविधावित्यत्र उद्दितर्कालंकारः वितर्कस्य संशयोत्तरमनिर्णये रूढः तद्धांज
कश्च नुशब्दादिः स चेत्यंचं ज्ञान्यो यदि निर्माता स्यात्कांतिप्रदोऽन्यस्यादित्याद्याकारः अत एव ब्रह्मा यदि निर्माता स्यात् निर्माणसामग्रीमा
न्स्यादिति संशयोत्तरवर्त्तितर्कस्य पादत्रये वेदाभ्यासजड इत्यादिना निषिध्यत इति तन्न॰ वितर्ककारणत्वेन त्वयाप्यत्र संशयांगीकारेण त
स्यैवालंकारत्वात्॰ सतोऽपि वितर्कस्य वर्णनीयोत्कर्षानाधायकत्वेनालंकारत्वाभावाच्च॰ संदेहेनैव तत्स्याउत्कर्षसिद्धेः वेदाभ्यासजड इ राम॰
त्यादयुक्तिस्तु जगन्निर्मातरि ब्रह्मणि सति कथमेतेषु तत्स्यात् निर्मातृत्वसंदेह इत्याशंकापनयनार्थमेवेति बोध्यं यन्नु इह नम पक्षिरः कलिंग १३५

वद्धासमरम्तुरेकरहादवद्धनुर्वैस्यत्रविकल्पालंकारः एयगेव· वाशब्दाञ्च्यात्रकल्पांतरपरः असामर्थ्योकलिंगान्यपतिवतशिरोनमयसन्ति
सामर्थ्यकरहादन्यपतिवहत्तुनमयेत्यर्थात्· व्यवस्थितस्यापंविकल्प इति तन्नवर्णानीयोत्कर्षानाधायकत्वेनैतस्यालंकारत्वेमानाभावा
त्· उपकुर्वंतितंसंतमित्यादिसामान्यलक्षणाभावात् नोपम्यंगम्यमानमलंकारतावीजमित्यपास्तं· तादृशोपम्यस्यावास्तवत्वाच्च· अ
त्येतुस्वत्रापिसंदेहएव· व्यंग्यस्फूर्तिस्तुयोमात्वर्यपर्यंतुत्यात्वेनिवत इत्याहुः इतिससंदेहः तद्रूपकमिति· यो ऽभेदस्तद्रूपकमित्यन्वयः त
दितिविधेयलिंगग्राहि· अभेदारोप इति· आरोपविषयाभेद इत्यर्थः यथाकृते हि उपमात्वमपिसादृश्यप्रतीतेः स्यात्· ज्ञातानामेव
तेषांलौकिकालंकारवत्चमत्कारजनकत्वमित्यन्यात्· उपमानोपमेययोरित्यस्योपमानतावच्छेदकोपमेयतावच्छेदकपुरस्कारेण
शब्दान्निर्दिश्यमानयोरित्यर्थः तेनाभेदप्रतीतेराहार्यत्वलाभः तेन भ्रांतिमतिनातिव्याप्तिः अपह्नुतौ अतिशयोक्तौ चनातिव्याप्तिः अ
पह्नुतौ स्वेच्छयानिषिध्यमानत्वेन भ्रांतिमतितज्जनकदोषेणैव इति वंधात् अतिशयोक्तेः साध्यवसानलक्षणामूलकत्वान्नसपुरस्का
राभावात्· अतिशयोक्तिवत्निदर्शनायामपिनातिव्याप्तिः शब्दादिति विशेषणात् मुखमिदं चंद्र इति शाब्दक्रियाहार्यतिस्त्वियगोचरता
दात्म्यव्यवच्छेदः निर्दिश्यमानयोरित्युक्त्यानूनं मुखंचंद्र इत्युत्प्रेक्षायांनातिव्याप्तिः तत्रज्ञानमलंकारः अत्राभेद इति भेदाच्च उपमानोपमे
ययोरित्येतद्विशेषणालभ्यमर्थमाह वीजंतु तत्रातिसाम्यमिति· तेनस्तुरंभमनोरमा रामा इत्यादिषु आरोपविषयाभेदनिरासः यत्र
सादृश्यप्रयुक्ताभेदस्यैवसंबंधांतरप्रयुक्ताभेदस्यापि रूपकत्वमितितन्न सादृश्यमूलकस्यैव रूपस्यालंकारतापत्तेः चंद्रादिपदानांतद्

का·टी· त्रिगुणावत्तिसारोपलक्षणायां अभेदप्रतीतिर्व्यंग्येत्येतावतैव रूपकं वाच्यं चशब्दादिव्यंग्यत्वे समुच्चय इव · मुखमपरश्चंद्र इत्यादौ तु कवि
कल्पितापरचंद्रेण रूपकं बोध्यं मुखचंद्रेण विरहतापः शाम्यतीत्यादावपि रूपकमेव · न चैवं चंद्राभेदप्रतीतौ विरहतापशामक
१८० त्वासंभवः अभेदप्रतीतेराहार्यत्वेन मुखत्वस्यातिरस्कारेण विशेष्यतया भानेन च तत्त्वसंभवात् · राजनारायणं लक्ष्मीस्त्वामालिंग
ति निर्भरमित्यादौ आहार्यनारायणत्वबुध्याहार्यस्यैव लक्ष्मीकर्तृकालिंगनस्य बोधान्न दोषः यत्तु आरोप्यमाणो यत्र विषयात्म
१४० तयैव प्रकृतकार्योपयोगी तस्मात्तत्रोणामस्परिणामः अत्र च विषयाभेद आरोप्यमाणो उपयुज्यते रूपके तु नैवमिति विशेषः वदनेनेंदु
नातन्वी स्मरतापं विलुंपतीत्यादि उदाहरणं अत्र हि स्मरतापनाशनसामर्थ्यं मुखात्मनैवेंदोः ग्रीष्मसंतापहारकत्वाद्रमणीयशोभा
धारत्वाच्च दुर्विषयितयोपात्त इति दाक्षिणात्याः तत्र · इंदोर्वदनतादात्म्यप्रतीतेर्वर्णनीयमुखाद्युत्कर्षकत्वेनालंकारत्वाभावात् इति
दिक् · आरोपविषयवदिति · तेषां श्रौतत्वे विगदाहृत्वं तत्तेति बोध्यं · श्रौता इत्यस्य व्याख्या शाब्द इति · सावयवत्वे च परस्परसापेक्ष
रूपकसमुदायत्वं · ज्योत्स्नेति · छुरणमंगलेपनं · व्यसनं · कौतुकं मुद्राकपालं कापालिकानां अंजनादिधारणकपालं · अत्र समु
दायात्मकस्य सावयवरूपकस्यावयवानां सर्वेषामपि समर्थ्यसमर्थकत्वं परस्परं तुल्यं तथापि कवेरात्रौ कापालिकीरूपकस्यैव सम
र्थ्यत्वेनाभिप्रेतत्वादितरेषां समर्थकत्वं गम्यते · रात्रिकापालिकीत्यस्य कापालिकाभिन्ना रात्रिरित्यर्थः उपमानपदस्य लक्षणायाम राम·
पि व्यंग्याभेदघटितवाक्यार्थस्यापि बोधात् · उपमायां तु सादृश्यघटित एव वाक्यार्थबोध इति विशेषः रूपकोपमयोरिति · उपमितं १८०

व्याघ्रादिभिरितिसूत्रेणासमासः उपमेयविशेष्यकएवबोधः उपमानोपमेयसमभिव्याहारे उपमेयस्याविशेष्यतायालोकव्युत्पत्तिसि-
द्धत्वात् । अतएवेदं सूत्रं विशेषणं विशेष्येणेति सिद्धे विशेष्यस्य पूर्वनिपातार्थमिति काशिकायामुक्तं मुखचंद्र इति विशेषणसमासे
चेद्रूपकत्वव्यवहारः यत्तु रूपके विशेषणं विशेष्येणेति समासे उपमेयस्य पूर्वनिपातनियम इति तन्नमयूरव्यंसकादिसमासस्य
विशेषणसमासपदेन लिंगकरणात् एवं च संदेहः स्पष्ट एवेति भावः एतदेव ध्वनयन्नुदाहरति ध्याति जस्सरणोति । नवांतः शूरस्य विशे-
ष्यत्वे हि मंडलाग्रलतादीनां वाच्यानामनन्वयः स्पष्ट एव एवं च कापालिकी च रात्रिः कापालिकाभिन्ना रात्रिरिति वा ज्योत्स्नाभस्मेव
ज्योत्स्नेव भस्मेति वा अस्थ्याभिन्नास्तारकाः अस्थिसदृशास्तारका इत्यादिक्रमेण रूपकोपमयोः संदेह इत्याशयः रात्राविति । कापा-
लिकभेदानापन्नरात्राविति अर्थः रात्रेरेवेति । कापालिकाभेदानापन्नरात्रेरेवेत्यर्थः अन्वय इति बाधादिति भावः कापालिकभेदग्रहे
त्वतद्धर्मांतर्धानव्यसनरसिकत्वान्वयेनानुपपत्तेरिति भावः ननु स्वांतर्धानं स्वस्य चोराणां चेति उपमायामपि न तदन्वयानुपपत्ति-
रिति चेन्न साधारणधर्मप्रयोगस्य तदासत्त्वेनोपमितसमासानापत्तौ मयूरव्यंसकादिसमासस्यैव वृद्ध्या त्वेन रूपकस्यैव सिद्धिरित्याश-
यात् व्यसनरसिकत्वस्य स्वरसतस्तस्यामनन्वयाच्च । विशेषणेति रूपसंघातस्यावयविनश्चावयवे कास्मिंश्चिद्रूपके विशेषणताग्रहमु-
खेन स्फुटतयेत्यर्थः जस्सेति । यस्य रणांतःपुरे करे कुर्वतो मंडलाग्रलतां । रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना । मंडला-
ग्रः खड्ग एव लता तदाकारत्वात् । रसो वीरः शृंगारश्च । सांमुख्यं युयुत्सा रतेच्छा च । पराङ्मुखता युद्धात्कामिसंगमाच्च । अंतःपुरत्वारो-

का·टी पेति · अंगतः पुरेतासामेवौचित्यादिति भावः तदाह अन्यथेति · यद्यपि लिंगविशेषात्करग्रहणादेः समं पुरस्त्वादेर्नायिकाधर्मत्वेन प्रसिद्ध

१४१ त्वात् श्लिष्टत्वाच्च समासोक्तिविषयत्वेन नायिकात्वावगतिर्व्यक्तं शक्या तथाप्यंगतः पुरस्त्वारोपोपि न त्वनेन मित्याशयः न च रूपकसंघा

तात्मकस्यास्य रूपकभेदगणनायां गणनमनुचितमिति वाच्यं · चमत्कारविशेषजनकतया तत्समुदायात्मकस्याप्यस्य मालारूपका

141 दिवत्तद्भेदेषु गणनात् · यथा मौक्तिकालेकतिगणनायामेकं नाम मौक्तिकमिव तत्संघातात्मिका मौक्तिकमंजर्यादयो गण्यं

न्ते तद्वत् · ननु वक्त्रमारोविहसन्मानसेत्यादौ राज्ञो हंसत्वारोपो यथा मनसः स्मरस्त्वारोपमपेक्षते तथात्रापि नायिकाप्रतिनायिकात्वा

रोपमप्यंगत्वेनांगतः पुरस्त्वारोपोपेक्ष्यत इति परं परिणतत्वमस्य स्यादिति चेन्न राशेः पुरस्त्वस्य स्मरसंचारास्पदत्वादिनेव मंडलाग्रलतादेर्ना

यिकात्वारोपस्य लिंगविशेषकरग्रहादिनापि संभवेनास्य परंपरितत्वाभावात् · राज्ञि हंसत्वारोपस्तु मनसि स्मरत्वारोपं विना न भ

वत्येव · सरोवराक्षेपत्वं विना राज्ञि हंसधर्मान्तराभावात् · एवं ज्योत्स्नाम्भस्येत्यादावपि बोध्यं · अत एव नियतारोपणोपाय इति

वक्ष्यति · एतादृशस्याव्यवहितपूर्वमात्रपरामर्शकत्वं वारयति · प्रकारद्वयवदितीति · आहितीयमिति · अंगांगिभावहीनमित्यर्थः ।

केवलस्यैव रूपणादित्याशयः सावयवत्वमनेकविषयपरस्परसापेक्षं चेति बोध्यं कुरंगीति · स्तिमितयति निष्क्रियाणि करोति · प्रस

यति · प्रसवं तं प्रसविषयं करोतीत्यर्थः अन्तः स्वपितीति · नयनानुद्वारोऽपि विषयं न गृह्णातीति · अभिनवां · तस्या एव सकौचित्यात् · अ रा०

त्रप्रेमभावेऽपि इति, तत्तदनुपपादकत्वेनाकाचिदप्यनारोप इत्यर्थः वैचित्र्यांतरं · एकविषयत्वं परस्परमंगांगिभावानापन्नत्वरूपं · ए १४१

वं च सांगस्येत्यस्यानेकरूपकसमुदायस्येत्येवार्थः क्वचित्तु निरंगस्येवेति पाठः एकविषयनानापदार्थारोपरूपत्वान्मालात्वं परस्प
रसापेक्षत्वविरहाच्च निरंगत्वमिति तदर्थः अयमेव युक्तः पाठः स्रग्वदिति व्याचष्टे यथेति एकत्रेति· उपमेये इत्यर्थः एकस्योपमानस्य
नानोपमेयकृतस्तत्र न कश्चिच्चमत्कार इति न तत्र एव गण्यते· तरंगिणीति· तरंगत्वेनोत्तरोत्तराविच्छेदः· योऽयमस्थाने प्रथमाहर्षः कार्म
णकर्म· वशीकरणक्रिया· तत्क्रियाविशिष्टो हि जगद्वशीकरोति· कान्तिरप्येतद्विशिष्टा तथेति जगद्वशीकारकत्वं साधारणो धर्म
इति भावः नर्मरहस्यं रहस्यपरिहासानां आवासभूर्वसतिस्थानं· यायद्वा मन्मथरसं तिबाधकेसा न हन्तीति सामान्यतो व्यापारग्रहीत
त्वहत्वं साधारणो धर्मः एवमग्रेऽपि ऊह्यं· चक्रगिरां सांकाशवचसां विद्या उपदेशिका· अनवधिनिःसीमं यत्र चातुर्यनिर्माणकौशलं त
स्य सा ब्राह्मक्रियाकरणव्युत्पत्त्याप्रत्यक्षहेतुः प्रियायामेकस्यां बहूनामारोपान्मालात्वं· यथैकत्र स्रजैव बहूनां पुष्पाणामिति दिक्· नि
यतस्य पुरुषस्येति वर्णनीयत्वेन प्रकृतस्येत्यर्थः हृत्विंतवइत्यर्थः अप्रस्तुतस्य· अप्रकृतस्य· यत्रन्यारोप इत्यर्थः केचिदिति अत्राप्र
चिवीजं तु आलानं जयकुंजरस्येत्यादाववाप्तेः प्रकृते एव जयेकुंजरत्वारोपस्य प्रकृते एव राज्ञि आलानत्वारोपहेतुत्वात परस्यान्यस्ये
ति· अप्रकृतस्य प्रकृते यत्रारोप इत्यर्थः एकरूपणहेतुकमिति· यद्यपि दुर्गाणामसमार्गणादौ दुर्गामार्गणादीनामारोपेण रूपकं किं
तु श्लेषमहिम्ना रोपमात्रं तथापि रूपणपदमारोपमात्रपरमेवेति न दोषः इदमेव चास्योपायत्वमारोपे यत्तन्मूलीभूतसाधारणधर्मसं
पत्तिः साधारणधर्मसंपत्तिरूपके तो वेत्यत्र न किंचिन्मानं यद्वा श्लेषस्थले पि शाब्दरूपसाधर्म्यकृत एवाभेदाध्यवसाय इति तस्यापि रूप

१४२

का॰टी॰ कत्वमेवेति न दोषः विद्वदिति॰ हंसः पक्षिभेदः॰ नीललोहितः शिवः समितसंग्रामः समिषस्तु॰ स्वीकारोऽनुपेक्षणं॰ वैश्वानरो वह्निः सती
पार्वती॰ दक्षः प्रजापतिः प्रागभावः प्रथमोत्पत्तिः भीमः भीषणः पाण्डवश्च॰ साम्राज्यं चाज्ञया राजशासकत्वं॰ वैरिंचं ब्राह्मं॰ दुर्गाणां॰
विषमभूप्रदेशानां॰ अत्र मानसादिपदं श्लिष्टं॰ अत्र श्लिष्टशब्देनार्थद्वयोपस्थितौ श्लेषमहिम्ना प्रकृतसंबंधिनि अप्रकृताभेदप्रत्ययः प्र
करणेन प्रकृतसंबंधिनो विशेष्यत्वात्॰ सत्वाभिधामूलं व्यंजनयेति बोध्यं॰ वाचके इति च बोधके इत्यर्थकं तत्तत्तमेव साधारणधर्ममा
श्रित्य प्रकृते राज्ञि हंसत्वाद्यारोपरूपरूपकमिद्धिः उक्तं॰ प्राचीनैः वक्ष्यतेऽस्माभिः उभयालंकारत्वमिति॰ मानसादिपदस्य परिहृत्य
सहत्वात् हंसादिपदस्य च परिहृत्तिसहत्वात् इति भावः श्लेषापवादकं रूपकमिति वक्ष्यमाणीतिः उभयमप्यर्थालंकार इत्युक्ते श्लेऽस्यपि
बोध्यं नैरेकदेशंति॰ पक्षाश्रोंतः पुरस्त्वारोपे तद्विशिष्टसंबंधस्य मंडलाग्रलतादावयोग्यतया तद्वल्लादेवतायिकत्वारोपस्तथा राज
नि हंसत्वारोपे तद्विशिष्टस्यांतःकरणसंबंधायोग्यत्वेन तद्वन्मानसे सरस्त्वारोपे नैकदेशविवर्त्तीति तेरुक्तमित्यर्थः नव्यमते तु उक्त
लक्षणराहित्यान्नैकदेशविवर्त्तित्वमिति बोध्यं॰ आलानं गजबंधनस्तंभः दृषदामिति दार्व्यार्थं॰ करवालः खड्गः चंडमहारविः लीलास्व
रवस्वापः उपधानं शिरोनिधानतूलपटः संग्रामस्य ताभृतसागरो लोड्यत्वात् प्रकृष्टमथनमेव क्रीडासुखनिर्वाह्यत्वात्॰ गीरापे वैरि
णः तदन्येषामुपेक्षणीयत्वात्॰ तुष्यतेइति॰ कुंजराभिन्नजयाधारत्वसाधर्म्यणेति भावः एवमग्रेपि बोध्यं॰ एवं जये कुंजरत्वारोपे भु राम॰
जरूपालानसंबंधित्वं साधारणधर्मः नचैवमस्योन्याश्रय कल्पनामयतया सकलासिद्धेः कल्पनायाश्चस्वप्रतिभाधीनत्वात्॰ शिलि १४२

भिः परस्पराववष्टंभमात्राधीनस्थितिकाभिः शिलेष्टकादिभिर्गेहविशेषनिर्माणमिवेति केचित्। वस्तुतो जयकुंजरयोरभेदप्रत्ययश्छा
धीन आहार्य एव समर्थकारोपः सादृश्यमूलक एवेत्यत्र तात्पर्यम्। इत्यन्योन्याश्रयसंभावनैव नेव नेति दिक्। अलौकिकेति अलौकिक
स्य लोकेनादृष्टस्य महस्सत्यन्तवस्य लोकस्याचरणेन प्रदर्शनेन प्रकाशितं जगत्त्रयं येन। अलौकिकमहालोको यश इति वा। महः
शो महस्तुलितं तदेव सहोदरः मुक्तात्वनिस्थानं तत्रत्वं मुक्तारत्नं अत्र राशि मुक्तात्वारोपे कुलगतो वेरतत्वारोपो निमित्तं। निरवधीति। नि
रवधि। बहुकालं निराश्रयं अपराधीनं स्थितं स्थितिः अनिवर्तितनृत्यादिप्रपंचं। प्रथमः सन्नप्रत्यक्षतः सत एव लब्धारत्यादिस्तु लोके
वा नित्यारोपो राज्ञि कंदत्वारोपे निमित्तं। स च राज्ञि कर्मत्वारोपे हेतुः। ननु पूर्वश्लोके मुक्तात्वारोपे प्रकाशितजगत्त्रयत्वारोपो निमि
त्तं। अत्र कर्मत्वारोपे निरवधिस्थितत्वारोपो निमित्तमितीदं द्वयं अनेकारोपनिमित्तत्वान्मालापरंपरितमेव युक्तमिति चेन्न। ज्योत्स्ना
भस्मच्छुरणाधवलेत्यादेरपि तथात्वापत्तेः तानापरंपरासत्वेऽप्यमालापरंपरितत्वस्य युक्तत्वाच्च। किमलयेति। लतानां नलिनीनां
च स्त्रीत्वमार्थं। करकमलैरिति पुरंदुमिरिति च योषितामित्यनेनान्वेति। पूर्वपूर्वारोपमाणानां परत्रपरत्रारोपविषयत्वात्समना
रूपता। नतातथेति। उपमेयोत्कर्षप्रतिपादनायोपमानीकृतानामुपमेयीकरणात् दुत्कर्षप्रतिपादनस्य गमनात्। नत्वारोपाभेदा
दविरोधः एकत्रकावो उपात्तत्वादिति कृ। इति रूपकं। अथापह्नुतिः प्रकृतमिति। निषिध्येत्यं तेन रूपकमुदासः तत्र प्रकृतनिषे
धाभावात्। उपमेयमिति। इदमुपलक्षणं। किंचिदपह्नुत्य कस्यचित्प्रदर्शनमपह्नुतिरित्येव लक्षणं। अत एव वक्ष्यमाणेऽस्तु वनामोऽपि

का॰टी॰ १६३ 163

ष्ट्यादौ स्वयं न ह्युपलालयन्नाम्नाज्ञस्ते हरिणोपि तत्र ततः परामर्शं संभावयितान्यं दशानन्य जंतीत्यपह्नुतिर्व्यज्यत इति प्रकाशकारेणाप्युक्तेर्थे
उक्तं · एवं च नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसी मुखमित्यादावपह्नुतिरेव · अत एव दंडिनोक्तं अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्श
नं न पंचेषुः स्मरस्तस्य सहस्रं पत्रिणां यत इति · एतेन नायं सुधांशुरित्यादौ न विषं विषमित्याद्युक्तं ब्रह्मस्वं विषमुच्यत इत्यादौ च
नापह्नुतिः किं तु दृष्टोपरोपरूपकमिति परास्तं · नेदं मुखं चंद्र इति प्रसिद्धापह्नुत्युदाहरणेपि मुखत्वनिषेधे चंद्रारोपदार्ढ्यं संपादक
तायावक्तुं शक्यत्वेनानुभवसिद्धत्वेन तत्रापह्नुतिमात्रस्योच्छेदापत्तेः यदि तु निषेधपूर्वकारोपे चमत्कारविशेषस्यानुभवसिद्धत्वा
लंकारांतरत्वं तर्हि प्रकृतेपि तुल्यं · ननु निषिध्यमानस्य निषेधार्थकत्वे शिखाध्मस्येयं परिणाम इति रोमावलिवत्तु इत्यादौ अपह्नुतिर्न
स्यादत आह अप्रस्तुतेति · साध्यते · आहार्यनिश्चयविषयीक्रियते · तेन न पद्मं मुखमेवेदमित्यादौ नातिव्याप्तिः तथा विरहिजनस्वाको
नायं चंद्रः पितृमान्नेत्यादौ नैषा · तज्ज्ञानस्य दोषविशेषजन्यत्वेनानाहार्यत्वात् · नायं चंद्रो रविरिदं वा तु एवं वेदं शृंगीहृदशाङ्कस्य च वैने
षा निश्चयविषयत्वाभावात् · गाहीति · गाहते न पद्मं सत्यत्वमादृसे त्यर्थः · अवामइति · परिणतस्य चः पूर्णस्य शशांकस्य च पुष्पिशुग
ल्भ्यं प्रकटत्वं ग्राम इत्यन्वयः · विगलती मृतस्य पयः स्यंदः प्रस्नवणं तेन शीते · मुखोरसीत्यन्वयः · वनेति · कामिलोके स्मरस्य कियद्दर
मित्यन्वयः सहकारेषु तनुषेषु · छलं व्याजं · उदंकितं प्रकाशितं · अवछलेति · सत्यत्वे व्याजताविरहात्तेन भृंगाणामसत्यत्वप्रति
पादनमिति भावः अमुष्मिन् मृगदृशः पृथुजघनभागे लावण्यामृतसरसि शर्वलुष्टः शिवदग्धः स्मरो नूनं नियतित इत्यन्वयः प्र

रस॰ १६३

शामपि शठना· शांतिस्तु चिकापरिणाम ति· प्रादुर्भवति· तत्रांगारस्य जलत्व वैशेष्यमशिरत्वा भवतीति भावः अत्रानिषिद्धेति काप्र
त्ययार्थो लक्षणोऽविवक्षितः तेन मंथानभूमिधर मूलशिलामहत्व संघट्ट जन्माः किरणाः स्फुरंती तु मध्ये· छायामृगाः शशक इत्यादि पाम शे
क्ति रित्यादावारोप पूर्वकापह्नवेनाव्याप्तिः अपह्नव स्वरूपाभरवचनोपन्यासादर्थसिद्धः वाक्यभेदस्यात्र· गतमखिलमनुपपत्तिनित्यनयोरे
कवाक्यतेति बोध्यं· प्रजल्पन्मत्पदे लग्नः कांतः किं न हि नूपुर इत्यादावपीयमेव· व्याजोक्तिरित्यन्ये· क्वचित्भंग्या व्यंजनया निषेधबोध
नं· यथा कंके पिशशांकिर इत्यादौ· इत्यपह्नुतिः अथ श्लेषः तत्र शाब्दश्लेषालक्ष्ये दर्शयति परिच्छिन्नेति सहानामेवेति उदयं· उदयाचलं· सम्बद्धं
च· दिङ्मालिन्यं तमसापायेन च· निद्रा जन्या मुद्रा च कुषः निद्रैव मुद्रा निरुक्ता हस्ताच· क्रियायां गमनादिः विहितक्रियायां· स्वैराचारो
ऽभिसारादिः स्वेच्छयावेदनिषिद्धाचरणं च· विभाकरनामेति· एवं च तदंशे परिवृत्त्यसहत्वेन शब्दश्लेषेपि उदयमित्यादिषु बहुष्वर्थश्लेषाद्
दाहरणत्वमित्याह उदयत इत्यादीनीति· द्वयोरपि वाच्यत्वादिति· प्रकृतत्वेनेत्यादिः उभयोः प्रकृतत्वेऽप्रकृतत्वे वा ध्वनितामावादिति
भावः एतेनार्थश्लेषे विशेषणानामेव श्लिष्टत्वं न तु विशेष्याणामपीत्यपास्तं· केचित्तु विभाकरपदं शक्त्या स्वर्यं न प्रयोगेन बोधयतीत्येत
दंशेप्यर्थश्लेषः परिवृत्तिसहत्वादित्याहुः यदि तत्र राजा प्रकृतोरविरप्रकृतस्तदा द्वितीयार्थस्य शब्दशक्तिध्वनिरेवेति बहवः इति श्लेषः अ
थसमासोक्तिः परमप्रकृतमिति· अप्रकृतव्यवहारमित्यर्थः यत्र तु प्रकृतेन प्रकृताभिधानं तत्राप्रस्तुतप्रशंसेति भावः अनेकार्थानीति· प्र
कृताप्रकृतोभयानुगतानेकार्थानीत्यर्थः उभयान्वितेति तु न युक्तं अकृतस्यानुपादानात· अप्रकृतार्थवचनं· अप्रकृतगतव्यवहाररूपार्थ

१०५

का॰ टी॰ १४४

स्ववचनं प्रकृतवृत्तांते आरोपो व्यंजनया प्रतिपादितं इत्यर्थः एवं च समासोक्तौ प्रकृते व्यवहारे ऽप्रकृतव्यवहारारोपः रूपके तु विशेष्ये प्रकृते ऽ
प्रकृतरूपारोपः अत एव एकदेशविवर्त्तिरूपकविषये न समासोक्तिः संक्षेपेण । एकेनैव शब्देन । तस्य श्लेषत्वादिति । उपमाध्वनित्वादेः स्व
पि बोध्यं । लहिक्करोतीति । लक्षणात च वाङ्मुखस्पर्शं यस्याः स कोपुस्त्वा सः जयलक्ष्मीस्तव विरहेन खलु ज्वलन्तु पीत्वानन्तुसा । परमप्रकृतार्थक
त्वमिति । केवलं तस्य कांतावाचकत्वं नास्ति विशेषणानां तु उभयगतवाङ्मुखस्पर्शाद्यादिबोधकत्वमित्यर्थः एवं च लहिक्करणेनादि
बोधानां अभेदारोपात् व्यंजनया कांताव्यवहाराभेदेन प्रतीयमानस्य जयलक्ष्मीव्यवहारस्य जयलक्ष्मीरूपेण तया प्रतीयमानस्य चमत्का
रकत्वेति भावः अत एवोक्तं कुवलयानंदे कृतापि । समासोक्तावप्रस्तुतव्यवहारसमारोप एव चारुताहेतुरिति । अयं भावः अयमैंद्रीमुखं
पश्य रक्तश्चुंबति चंद्रमा इत्यादौ श्लिष्टविशेषणप्रतीतप्रस्तुताप्रस्तुतवृत्तांतयोः श्लेषभित्तिकाभेदाध्यवसायेनाभेदप्रतीतिविषय
योः प्रस्तुतचंद्रादिरूपेण ज्ञातात तत्तयोर्वृत्तांतयोः परस्परं विशेषणविशेष्यभावे कामचारे ऽपि प्रस्तुतवृत्तांतो विशेष्यः तद्बोधबोध्याप्रस्तु
तस्तु अभेदेन तद्विशेषणं । तत्र यद्यपि प्रस्तुतस्य स्वसाधारणधर्मेण चंद्रे न्वययोग्यतास्ति तथापि अप्रस्तुताभेदमापन्नस्य तस्यास्ती
ति तद्रूपावच्छिन्नस्य प्रकृते धर्मिण्यारोपः आरोपो व्यंजनया बोधः न त्वाप्रस्तुताभिन्नत्वे ऽपि विशेष्यतायाः प्रस्तुते एव सत्त्वे नाप्योगान्व
ययोग्यतेति वाच्यं । विशिष्टवैषेण्यान्वयायोग्यत्वात् नच रूपकवत्समासोक्तावपि प्रस्तुते चंद्रे ऽप्रस्तुतजाररूपसमारोपश्चारुताहे
तुरस्त्विति वाच्यं तद्वाचकपदसमभिव्याहाराभावेन तस्यासंभवात् । न चाक्लिष्टजारादिनाक्लिष्टरूपकमस्तु । पश्यतीति विद्युन्नयनैः पयो

रामं॰ १४४

१०५

रद्दत्यादौ पयोर्द्वे द्रष्टृपुरुषविशेषाक्षेपकनिरीक्षणावदाक्षेपकाभावात् · न च विशेषणसामर्थ्यप्रतीताप्रकृतजारदृष्टान्त एवं दृष्टान्ते त
या प्रतीयमानत्वादाक्षेपकोऽस्तु · अप्रस्तुतस्य प्रस्तुते विशेषणतयाऽप्राधान्येनानाक्षेपकत्वात् · स्फटिके जपाकुसुमसंनिधौ लौहित्य
स्यारोपेऽपि जपाकुसुमत्वानारोपात् तत्र तेनाक्षेपासंभवेऽपि रनायिकामुखचुंबनस्य विषमर्यादया व्यञ्जनया वा प्रतीतस्य प्रकृते ध
र्मिण्यारोपसामान्यजारसाधारणधर्मत्वेन प्रकृतधर्मिणि जारत्वव्यञ्जकतास्त्वेव चेत्यपास्तं · किं चैवं सति वाच्यार्थबोधोत्तरं त
द्भङ्ग्यप्रतीतिः सापि न केवलं व्यवहारमात्रज्ञानात् · अपि तु तादृशनायकनायिकासंबंधविशिष्टव्यवहारज्ञानात् एवं च वाच्यार्थबोध
कालिकचमत्कारबीजमत्र निरूप्यत इति न दोषः न चैवं समासोक्तौ रूपकध्वनिनैव निर्वाहे पृथगलंकारत्वं न स्यात् · वाच्यार्थबोध
कालिकचमत्कारस्यापह्नोतुमशक्यत्वेनालंकारत्वस्यानुरूपकगतत्वात् · विपरीतं नायकत्वव्यञ्जनस्य समासोक्तौ तन्मते एवं वदतो ध्वनि
त्वस्य दुर्निवारत्वाच्च · तद्भङ्ग्यस्याधिकचमत्कारकारित्वेन प्राधान्यात् · न च श्लिष्टशब्दोपस्थापितयोर्दृष्टान्तयोः परस्परमभेदेनान्वयो मा
नाभावः सहृदयहृदयस्यैव प्रमाणत्वात् अत एवागत्यसंप्रतिवियोगविसंष्ठुलत्वं गामित्यत्रार्थशक्तिमूलो नायकनायिकादृष्टान्तो वा
च्चरविकमलिनीदृष्टान्तो वाध्यारोपेणैव स्थित इति प्रदीपकृतः प्राचीनानुभवमेवापलप्यापि यदि एकत्र हृदयमिति तिरीत्या प्रस्तुताप्रस्तुतदृ
ष्टान्तयोर्विशेष्ययोर्वान्वयः स्वीक्रियते एवमपि वाच्यार्थबोधकाले प्रस्तुते धर्मिणि नाप्रस्तुतजारत्वारोपप्रत्याशा · तथा हि · यद्यप
नयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्ययोरेकवाक्यादन्वयात्समप्राधान्यमस्तीति स्वीक्रियते तथाप्यप्रस्तुतदृष्टान्तान्वयानुरोधात्प्र

का॰ टी॰ प्रस्तुते ऽप्रस्तुतरूपसमारोपः प्रस्तुते ऽप्रस्तुतवृत्तान्तारोपे पर्यवसिद्धेः अप्रस्तुतरूपसमारोपे ऽपि प्रस्तुतवृत्तान्तान्वयायोग्यतायास्तद
१८५ वस्थत्वाच्च । नन्वेवं समासोक्तिविशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिति प्राचीनलक्षणासंगतिः अप्रस्तुतधर्मिव्यञ्जनस्य त
दनपेक्षणादिति चेत् । न स्वरूपतो ऽप्रस्तुतवृत्तान्तारोपस्य न चमत्कारित्वं किन्तु प्रस्तुतकामुकादिसंबन्धित्वेनावगम्यमानस्यैव
१८५ तस्यैवारोपः अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन चुम्बनादिनैन्द्रीं चन्द्र इत्येतदन्तस्त्रीलिङ्गपुंलिङ्गसहकृतेन त
त्संबन्धिनि कामुकादौ त्वभिव्यक्ते पुनस्तदीयत्वानुसंधानात् विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापेक्षणात् अ
प्रस्तुतस्येत्यस्य अप्रस्तुतव्यवहारस्येत्यर्थो गम्यते तेन वदनचुम्बनस्य पुत्रादिसाधारण्यात्कथं कामुकाभिव्यञ्जकत्वं । किं चाङ्कस्थं चुम्ब
ति भानुर्विम्बमित्यत्रापि नायकाद्यभिव्यक्त्यापत्तिरित्यपास्तम् । यत्तु चन्द्रैन्द्रीपदगतलिङ्गाभ्यामभिव्यक्तनायकयोः स्वव्यञ्जकपदोप
स्थापिताभ्यामभेदेनेत्यन्वय उचितः समानपदोपात्तत्वप्रत्यासत्तेरिति तन्न । एवं हि वदनव्यवहारावच्छेदकत्वं तयोः स्वीक्रियते न वा ।
आद्ये एकस्यार्थस्योभयत्रान्वयो ऽव्युत्पन्न इत्यन्तः अन्त्ये रसाननुगुणत्वं । यद्यपि पैन्द्र्यादौ नायिकात्वाभाने केवलं व्यवहारावच्छेदकत्व
मात्रस्वीकारे बाधः नायिकात्वानालीढकेवलस्त्रीमुखचुम्बनरूपस्य व्यवहारस्य नायकासंबन्धित्वात् न हि दिङ्नादात्म्यं विना ना
यिकायाः पृथङ् मुखं विशेषयितुं सामर्थ्यमस्तीति तदपि न । मुखशब्दश्लेषसामर्थ्येनैन्द्रीमुखमित्यस्यैन्द्र्यंशोभोन्मेषेण केवलमुखचुं राम॰
बनस्योपस्थितेः । न चैतद्युक्तं कुवलयानन्दे श्लेषादिमहिम्ना स्वरूपतः समर्पितेन वदनचुम्बनादिनेति न त्वैन्द्रीशब्दार्थेन दिग्रूपेण वदन १८५

रूपमुख्यपदार्थस्यान्वयो वक्तुं शक्यः मत्वदयैः नन्वेतादृशक्लिष्टकल्पनापेक्षया विशेषणसाम्यमहिम्ना प्रतीतोऽप्रकृतवाक्यार्थः स्त्री
लिंगपुंलिंगाभ्यामभिव्यक्तनायकाद्यभिन्नचंद्रादिघटितप्रकृतवाक्यार्थस्यावयवतादात्म्याय न्न तदवयवोऽवतिष्ठत इत्येव कल्पयि
तुं युक्तं एवं च नायिकाभिन्ने इंद्रदिशासंबंधिवदनाभिन्नप्रारंभकर्मकचुंबनरूपसंबंधाश्रयो नायकाभिन्नश्चंद्र इति बोध इति चेन्न ।
एवं हि हरिदंशे नायिकाभेदप्रतीतो मुखचुंबनादौ वदनचुंबनाद्यभेदप्रतीतावपि वदनचुंबने साक्षान्नायिकासंबंधाप्रतीत्या रसोद्बोधा
नापत्तेः न च व्यंजनया तत्प्रतीतिरस्त्येव यस्मिन्नाद्भेदः तत्संबंधिनि तत्संबंधस्य भेद इति न्यायेन कामानसीमितत्प्रतीतिसत्त्वात् एवं च मत्का
र इति वाच्यं । तदपेक्षया साक्षाच्चमत्कारोत्पादकवाच्यार्थगोचरबोधानुत्पादनस्यैवौचित्यात् । ननु व्यंजनयाऽप्रकृतार्थबोधः शक्तेः प्रक
रणादिना नियंत्रणात् ततो व्यंजनमाहात्म्यादेव प्रकृतवाक्यार्थतादात्म्येनावतिष्ठत इति चेत् व्यांजनिकोऽप्रकृतार्थबोधो नायि
काद्यविशेषितो विशेषितो वा । नाद्यः रसाननुगुणत्वात् । अंत्ये स्वपदोपस्थाप्ये लिंगाभ्यां नायिकाद्यभेदबोधो व्यर्थोऽसंभवी च ।
नायिकाविशेषणकव्यवहारबोधनेन कृतार्थत्वात् । अपि च तथा सति जारकर्तृकसानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रा
रंभसंयोगाश्रयो जाराभिन्नश्चंद्र इति बोधकदर्थनमेव स्यात् तस्माद्व्यंजनया शाक्त्या वोपस्थिताप्रकृतेतरत्वांते न व्यंजनयोपस्थि

का॰टी॰ १४६ 146

तेनायकादिसंबंधित्वेन गृहीतेनाभेदमापन्नप्रस्तुतवृत्तांतारोपः प्रकृतविशेषो॰ न च मते श्लेषस्थले ऽप्रकृतोपस्थितेः शाब्दत्वे सत्वेन तन्म
तेशक्त्यैवाप्रकृतार्थोपस्थितिः शाब्दी तु व्यंजनयेत्येतावान्विशेषः एवं च वाच्यार्थबोधानंतरं यदि चंद्रादौ नायकत्वादिप्रतीतिरपि सहृ
दयानुभवसाक्षिकी तदास्त्वित्युपपादितमेव प्राक् अत एव समासोक्तौ साधारणविशेषणबलादेवोपमानप्रतीतेरुपादानवै
यर्थ्यमिति शेषे वक्तुमिति प्रकाशकृत अनेन तत्सादृश्यप्रतीतिर्व्यंजनया न तु तदभेदप्रतीतिरिति लभ्यते प्रस्तुतशाखावृत्तांते आरो
प्यमाणाप्रस्तुतखंडितनायिकाविशेषवृत्तांतसमर्थनाय तस्या वशपकत्वाच्च॰ एवं च मानुरागपरनायिकामुखचुंबनाभिन्नप्राचीश
रंभसंयोगाश्रयखंड इत्येवंबोधः समासोक्तिर्गुणीभूतव्यंग्येति व्यवहारस्त्वप्रकृतव्यवहारेऽप्रकृतव्यवहाराभेदस्य व्यंजनया प्रती
तेर्निर्बाध एवेति दिक् अत्रोपमागर्भादीनामिति॰ आदिना साधारणविशेषणा॰ अधमेन पातभीत्या संचरता मया विषमविषयेषु॰
दृष्टमिह मया गृहीता हिमगिरिशृंगादुपागता गंगा॰ अत्र गिरिशृंगप्रभववेणुयष्टिव्यवहाराभिन्नव्यवहारवती गंगेति प्रतीयते
इति समासोक्तिः अप्रस्तुतनिदर्शना॰ असंभवत्प्रतीतिविषयतामलभमानः वस्तुनोर्वाक्यार्थयोः पदार्थयोर्वा संबंधोन्वयः अत एव प्रती सम॰
तिपर्यवसानाभावादस्य दृष्टांततो भेदः परस्परनिरपेक्षयोर्वाक्यार्थयोर्दृष्टांतालंकारः इयं पुनः सापेक्षयोरिति भेद इत्यन्ये न हि वा १४६

त्वामसंगतं स्यादत आह उपमापरिकल्पक इति· औपम्याक्षिप्तपर्यवसायिनीत्यर्थः क्वेति अत्र स्वमतिसूर्यप्रभवंशयोरत्वंता
न तु रूपत्वं बोध्यते· तदनंतरमुडुपकरणकसागरतरणेच्छाया अप्रकृतायाः कथनेन तादृशमतिकरणकवर्णनेच्छायाः प्रकृ
तायाः प्रबोधितस्याक्षेपः तयोश्च परस्परासंबंधस्य स्फुटत्वादौपम्यमादाय पर्यवसानं· तत्फलितमाह उडुपेन सागरतरणव
दिति· उपमायाः कल्पनं· व्यंजनं· प्रतीयमानाभेदारूपणायेति भाव एवं चात्रार्थी निदर्शना· त्वत्वादनरवैरत्वानियोजनं जय
ति यावकैः इंदुचंदनलेपेन पांडुरीकृतेति हिम इत्यादौ तु शाब्दी बोध्या· वाक्यार्थगा चोभयत्रापि· एवं तत्त्वादनस्वरत्वानां प
दलेक्षकमार्जितं इदं श्रीखंडलेपेन पांडुरीकरणं विधोरित्यत्रापि एवैव· न चेदं वाक्यार्थरूपकं लोकप्रसिद्धोपमानत्वोपमेयत्वव
तोरभेदस्यैव रूपकत्वात किंचात्र उपमहशालक्षणान्मूलाभेदप्रतीतिः इह तु प्रतीयमानाभेदानुपपत्त्या तत्कल्पनेति भेदा
त नितरां निर्गते नीरे सेतुमेषा चिकीर्षतीत्यादौ किंचिदाक्षिप्तसमागतत्वालोपेक्षितप्रतिनिहत्तनायिकांतरासक्तनाय
कानयनार्थमसावीषपि तु कामं नायिकानुद्दिश्य सख्या वचनेपि आर्थी निदर्शनैव· एतेनात्र ललितालंकारः वर्णनीयवा
क्यार्थमनुक्त्वैव तद्गतधर्मिणि तत्स्वरूपस्य कस्यचित्प्रस्तुतवाक्यार्थस्य वर्णनरूप इति अपास्तं नहि प्रस्तुताप्रस्तुत

का. टी. दृष्टान्तयोः शाब्दोपात्तयोरेव निदर्शने त्वत्र मानमस्ति० न चैवं मतिशयोक्तिविषयस्याप्यार्थरूपकेणापहारः स्यादिति वाच्यं विष
१६७ यितावच्छेदकरूपेणाभाने विषये विषयितावच्छेदकावच्छिन्नाविषय्यभेदस्य रूपकशरीरस्य विषयितावच्छेदकरूपेणाभासमा
न विषयात्मकादतिशयोक्तित्वरूपाद्विलक्षणत्वेन तयोरैक्यासंभवात्० न च निदर्शनाविषये व्यंग्योपमयैवास्तु चमत्कार
इति वाच्यं अत्राभेदप्रतीतिकृतचमत्कारस्यैव सत्त्वात् कल्पितोपम्यमूलिकया पर्यवसन्नया तथैव चमत्कार इत्याशयात् त
137 दुक्तमुपजीव्यत्वेन भेदादिति उदयतीति अहिमरुचिः सूर्यः हिमधामा चन्द्रः विलम्बिघण्टाद्वयेन परिवारितो यो वारणेन्द्रस्त
स्य लीलां अभिन्नां लीलामित्यन्वयः श्लेषेण लीलापदेन लीलाद्वयोपस्थितेः श्लेषाश्रयणे बीजं दर्शयति अत्रान्येति· अन्य
लीलातादात्म्यस्यान्यलीलाया असंभवाच्चेत्यविरोधः न चैकदेशस्थले ऽन्वयानुपपत्त्या लीलापदस्य तत्सदृशलीलायां लक्षणे
व स्यादिति वाच्यं आरोपेणाप्यन्वयोपपत्तेः वस्तुमाहात्म्यादेवत्वस्य सादृश्यव्यंजकत्वं तदाहुरुपमायां पर्यवसानमिति·
अत्रोपमानोपमेययधर्मयोरभेदप्रतिपत्तिरतद्द्वयमेवपदार्थनिदर्शने त्युच्यते न्यैः तत्रपदार्थनिदर्शनात्वेकस्य चिद्युक्तिरेवड्य राम०
तिरेवं चेति समस्तत्वेनाक्षेपकस्यापि यदत्वादिदं चिन्त्यं० दोर्भ्यामिति तरंगवतीभुजंगः समुद्रः हरिणाङ्कस्य चन्द्रः १६७

अत्रैकस्य गुणगणानेकधर्मस्य बहूनामुपमानानीति माला · स्वस्य · कार्यस्य · व्याख्याने · परम्परातिरोधाने · उन्नतं · उत्कृष्टं ऊर्ध्वस्थानं च · लघु
त्वमतिः अपकृष्टगुणत्वं वा अ·पतनं पदभ्रंशः अधःसंयोगहेतुक्रिया च · तास्मात्ततो मंदत्वात् ततः न तु मंदभावात् हेलया पातो पपा
दकमिदं तथा संबंधः कार्यकारणभावरूपः इयं संभवद्वस्तुसंबंधनिबंधनेत्युच्यते · एतच्च क्रिययैवैतस्यैव कारणं दर्शितं · अन्यत्तु स्वहे
तुत्वयस्येत्युपलक्षणं स्वक्रियया यत्किंचिदर्थबोधनस्य · एवं च चूडामणिपदे ध्वनेर्योदेतं रविमागतं स्तनां कार्यातिथ्यपीति बोधयन्त्य
हमेषितइन्यादावयोर्धेवत्याङ्गः इति निदर्शना · अथाप्रस्तुतप्रशंसा · अप्रस्तुतस्य · अप्रकृतस्य · अप्रस्तुतप्रशंसैवेति · तस्यैवाच्ये
वेत्यर्थः एतच्चेति · अप्रस्तुतप्रशंसनमात्रसमासोक्त्यादावतिप्रसक्तमितीति तद्वारणाय प्रस्तुताश्रयेत्युक्तमित्यर्थः तदेवोपपादयति · अ
प्राकरणिकेनेति · प्रस्तुतव्यंजनं प्रस्तुताप्रस्तुतयोः संबंधेनेतित संबंधदर्शनमुखेन तं विभजते कार्ये इत्यादि यातादिति · न मिलं
तिनायांति · या कृता साकृतैव · पुनर्न कार्येत्याह तुनरिति · नैवं चिंताकृते त्यपलापे तत्कार्यमाहनितरामिति · गमनानिच्छाज्ञाने नया
लज्जातया मंथरानिःक्रियान्तरकाय प्रलज्जया कस्यापि पुरतो नवलोकनात् · धारारूपं मधु · पीता मधुगोतिपात्रे निपतदेव पीतं संहृतं
अस्तुपदे त्यर्थः च प्रत्येकवर्तनं लज्जया संमुखदर्शनविच्छेदाय · हसितेन · मदनमनेपथ्येन तस्या गुणाः स्याः स्पतीति एतन्मनस्यत्तीति विस्म
य प्रयुक्तेन · कार्ये · निवृत्तिरूपे · अत्रेदमेवप्रस्तुतं वर्णनीयत्वात् अत्राप्रस्तुतेन मदनशोभातिशयागमननिवृत्तेरनुरागोत्कर्षकत्वेने
तस्यालंकारत्वं अत एवोत्तरेणाप्रश्नोत्तरयनेपि नोत्तरालंकारः तस्यातमत्कारजनकत्वाभावात् अनयोर्द्वयोः समावेशात् मिश्रं इति · गजनिति ·

का·टी·
१४८

कुमाराश्च तस्य चिरायुर्भूतेः एषां भोजनसमये शुकस्यापि भोजनलाभात् कार्यमुक्तमिति तेन चकारेणाभ्युज्यते इत्यर्थः अत्र व्यंग्यापेक्षया
वाच्यस्याधिकचमत्कारकारित्वेन न ध्वनित्वव्यपदेशः किंत्वलंकारव्यवहार एवेति बोध्यं एवमग्रेऽपि · एतन्नस्येति · सुरवान् एतारकस्य
कस्यचिन्मुखादुपगतं श्रुत्वा व्यसनजं दुःखमनुभूतमासीदिति शिलामंजीरएतन्नस्याकियत् · यतो अस्मादप्यधिकं विज्ञातं बोधकमस्ति तदा हि
अंगुल्यग्रेति · शनैरादीयमानेऽपि · अंगुल्यग्रस्य लघुक्रियया स्वल्पचालनेन पतितलिपिनि अंगुलावेव लग्न इत्यर्थः मसलविशेष इति · भ्रम
विशेष इत्यपि बोध्यं स्तनहृदिति · जलेति गण्डूल्पत्व सूचकं · वैरशक्तिपातनं कृतपीडेषु पीडाघनं · विष्टुना नरकासुरे हते कोपि कश्चन त
न्मंत्री नरकासुरे हते कोपि कश्चन तन्मंत्री नरकासुरस्तु हृदं प्रतीदमाह । श्लिष्टत्वस्येति · प्रकाशे श्लेषसमासो क्षिपदे श्लिष्टशब्दः श्लि
ष्टविशेषणपरे · अप्रकृताप्रकृताक्षेपेतयोरभावात् · द्वयोः प्रकृतत्वे अप्रकृतत्वे वा श्लेषस्य प्रकृतेऽप्रकृतव्यवहारारोपेच समासोक्तेः
स्त्रीकारादिति भावः पुंस्त्वादिति · पुंस्त्वपौरुषं पुंव्यंजनं च · नारीभूयाभूतहरणात् · अधः संपतच्छशः पाताले च · दानाहावतारे पा
ताले गत्वा एधि सुद्धरणात् · प्रणयने याचने · न महान् · महत्वरहितो ल्प इत्यर्थः बलिप्रार्थनेवामनत्वप्राप्त्या जगदुद्धरणात् · वि
श्वस्योद्धरणं · विरहितादर्शने नरकहननं · दिक्प्रकारः प्रकृष्टोत्तमः प्रकृष्टश्रेष्ठः श्रीकृष्णस्य · सत्यस्येति · अप्रकृतस्य श्रीकृष्णस्या
प्रतीतो जातायां पश्चात्प्रकृतेत्यादिः न च श्लेष एवेति · विशेषणविशेष्ययो रुभयोरपि श्लिष्टत्वादिति भावः अवयवशक्तेरिति · राम·
न च प्रकरणसत्वे योगाप्रवळत्वात् · विशेषोद्धरणरूप पदार्थसामर्थ्यात् लिंगस्य विष्णावपि सत्वात् · एतेन श्लेषमूलो ध्वनिरित्यपा १४८

कृ

स्तं· ये तु श्लेषस्थले उपयोरप्यर्थयोः क्रमेणाशङ्क्यैव शातिपादनमिच्छंति तन्मते कथमत्राप्रस्तुतप्रशंसा अप्रस्तुतेन प्रस्तुतस्याव्यंग
त्वादत आह श्लेषसत्वेपीति · अप्रस्तुतप्रतीत्युत्तरं तन्मूलितन्मूलमूलिका वाच्यत्वप्रस्तुतावगतिस्तत्राप्रस्तुतप्रशंसेति भावः एकश
ब्दत्वसाधर्म्यात्परं तत्वेन तत्वसेतुदाहरणान्तेति वोध्यं· ये नासीति · श्रीरामधनः कश्चित्उपजीवनार्थमपकारिणां सधनमनुसर
तीति विदुपालभ्यते · ये ताभ्युदितेन तत्कांतिं गमितोसीति संबंधः उदितेनैव · न त्वप्रकृतेनापि · कांतिस्तेजो हीनता ग्लानिश्च · पूजित
तु · प्रत्ययकर्तृपादः पदं · रश्मिश्च · क्षीणेन · धनहीनेन · कलाहीनेन च · मनीगीषद्दणि किं न लज्जसे इत्यर्थः अस्त्वेवं · लज्जास्प
दत्वमपस्क जडधामता · हिमाधारता · मूढता च · विस्फूर्जसे सगर्वं मुदेषि · अमायां सूर्येण सह संगत्य ततस्तेजो ग्रहणं चेद्दूसेत्या
गमसि हुंपादग्रहणं · अत्रास्तिश्लिष्टविशेषणमात्रमाहात्म्येन प्रस्तुतसधनानिर्धनप्रतीतावप्रस्तुतः आदायेति · सुखं वहंतं नदीसंगमस्था
नं च · अत्र ग्रामकल्प परधनमपहृत्य विफलव्यपकर्तृ रिदुरीश्वरे प्रकृते तत्सदृशस्याप्रकृतस्यार्णवस्य कथनेन कौटिल्यमिति अत्रदु
ष्पप्रसक्तगिरा वृत्तांताक्षेपः अध्येरिति · अशोमः अभइत्येव कश्चित्स्यादस्येनस्यगितो तिरस्कृतो भुवनस्य भूमेराभोगः विस्तारः पा
तालकुक्षिस्तन्मध्यं च येन · सर्वं शस्थि गान्वाब्धिप्रतिबंधेनात्तग्रहणान्निरस्कारः जलैर्व्यापनात्पातालकुक्षेरपि तैः पोतो पायाः स्तुत्यु
पगिराजः पोतोल्लिपातं · कान्तेतं उत्तहंते · आहोइत्यव्ययं प्रश्नार्थे · अवधः स्तनाः कुहरं तस्यैव गंभीरभागः कल्पः समर्थः अत्रोप
मर्दनशीलस्य दुःश्रमोः प्रशान्तेवरं न रिक्ततामस्यंतोपमर्दनात्पत्रेरिति वांज्यगुराणीभूतमेव · अत्र समुद्रेपीति पादः ध्वनित्वं तु नात्र · इहा

का. टी. १४५ 149

स्यं तत्प्रस्तुतस्य तस्याटोदेव वर्णनमनुचितमिति तत्तात्पर्यवशात्तेनास्य संबोधितत्वमिति हृदये व्यंग्यार्थस्य वल्गाद्राक्षुत्वेन वाच्यासिध्यं गत्वा
त. कस्त्वमिति. शाखोटकः भूतावासवृक्षः कस्त्वं भो इति द्रष्टुं प्रति प्रश्नः कथयामीत्यादि तदुत्तरं वैराग्यादिवेति पुनः प्रश्नः उत्तरं
साध्विति. पुनः प्रश्नः कस्मादिति. इदं वैराग्यं. वामेन. वामभागे. वामाचारेण पुरुषेण सर्वात्मना. छायारोहणाशयनादिना. न छायेति
. भूतावासत्वेन शाखोटकच्छायायामाश्रयणं. प्रतीयमानो वृक्षताश्रयः पुरुषः नचात्र रूपकं प्रकृतो ऽप्रकृतारोपएव तत्स्वीकारा
त. एतेन शाखोटकवटपदाभ्यां साध्वसाधुपुरुषौ निगीर्याध्यवसितावित्यतिशयोक्तिरित्यपास्तं तत्रारोप्यस्यैव प्राधान्येन संबोध्य
त्वाघटनाद्वचनाद्वस्थानाच्च. विद्यमानाया अप्यतिशयोक्तेरतद्गत्वाच्च. अत्र सधधर्मः श्रुतो ऽधर्मो निंद्य इति प्रस्तुतव्यंजनं. नचैवा
प्रस्तुतव्यवहारेणाप्रस्तुतव्यवहारस्यानिगरणमेवास्तु. किमनया. तात्पर्यानुपपत्तेरविलक्षणावीजत्वात्. वोध्यसंबंधस्त्वलक्
ण. वाच्यव्यवहाराभेदेन च प्रस्तुतव्यवहारस्यान्यथा इति चेन्न. वाच्यार्थतादवस्थ्येनैव व्यंग्यप्रतीतेरन्नसहृदयसंमतत्वात्. शक्यसंबंधस्ये
व लक्षणात्वाच्च. सोऽपूर्व इति. रसनाविपर्ययो वचनास्थैर्यं. विपरीतार्थत्वं च. उपकंठे तद्दसनाश्रमिति प्रसिद्धः कर्णचापलं. परव
चनप्रतार्यत्वं. अनवरतकर्णचालनं च. मदो गर्वः दानजलं च. स्वपरादिक्रमाणामविभागः एतत्सर्वं किं विस्मृतवानसि वा
यत् यत इत्यर्थः निश्चितवानसीति युक्तः पाठः यत्सेव्यते एष इत्यन्वयः वारणो गजतवारको हस्ती चव्यंतः स्वल्पकरो निर्धनो राम.
मं मास्तदिप्सितामध्यसुंडादंडस्य. मदश्चेति. चेतनाविस्मृतस्वपरादिकं. एवं च रसनाविपर्ययादौ वचनास्थैर्यादिकमारोप्य प्रमेरेव १४५

पत्रसेवकत्वमारोप्य वारणो निवारकत्वमारोप्य कार्यार्थोपपत्तेरिति भावः करोतीति एवं चैतद्देशे भ्रमरपदं हि रेफपरमेवे-
तिभावः ऐकरूप्यायैकतावच्छेदकता पचनं देशे प्यारोप इत्यन्ते· अत्र श्लिष्टशब्दरूपसाधारणधर्मनिबंधनं साहश्यं· अत्रेदं बोध्यं· अप्रस्तु-
तपदेन प्रस्तुततात्पर्यविषयीभूतार्थातिरिक्तोर्थो ग्राह्यः एतेन किं भृंग मत्तां मालतीं केतकीं कंटके हृदये त्वं प्रियतमेन साकं सु-
खानि विहरंती काचित् भृंगं प्रत्येगाहेति प्रस्तुतेन वाच्येन परमस्तु दर्यः कुलवध्वाः त्वां विहाय दुष्टसंकुलपरवनितासक्तं नायकं प्र-
त्युपालंभः प्रस्तुत एव व्यज्यते इति प्रस्तुतेन प्रस्तुतांतरद्योतने प्रस्तुतांकुरनामा भिन्नोलंकार इत्यपास्तं· मदुक्तरीत्या तस्या एव
सम्भवात्· प्रस्तुततात्पर्यविषयत्वाभावादप्रस्तुते पर्यवसानानन्तरध्वनित्वं· ध्वनित्वमेवेत्यपि कश्चित्· यदा तु भृंगग्रहणांतरमेव प्रस्तुत-
तात्पर्यविषयः प्रस्तुतस्य नायिकानायकवृत्तांतः तदुत्कर्षकतया गुणीभूतव्यंग्यमन्यदा त्वसाहश्यमूलासमासोक्तिरेवेति केचि-
त् अन्ये तु अप्रस्तुतेन प्रशंसेत्यपि अप्रस्तुतप्रशंसाशब्दार्थः एवं च वाच्येन व्यंग्येन वा अप्रस्तुतेन वाच्यं व्यंग्यं वा प्रस्तुतं यत्र सा-
हश्याद्यन्यतमप्रकारेण प्रशस्यते उत्कृष्यते इत्यर्थाद्वाच्यमेवेत्याहुरिति दिक् इत्यप्रस्तुतप्रशंसा ॥ अथातिशयोक्तिः इहो-
पमीति· स्वासाधारणधर्मेणानुपादानादनाहार्याभेदधीरित्यर्थः गौरणसाध्यवसानामूलेयं· तदेवेति· एवकारेण धर्मिभेदाभावः
सूचितः अन्यत्वेनेति नवान्यादिशब्दैः विविक्ताकारं अतिशयिताकारं कमलमिति कमलकांतावक्त्रं· कुवलये नीलोत्पले नेत्रद्व-
ये· तानि कुवलयेद्वे कमलं च· कनकलतिका· कांता तनुः अत्र प्रकरणालभ्यनायिकावक्त्रादीनां कमलादिना तादात्म्येनाध्यवसानानुगु-

का॰टी॰ देऽतिशयः अत्रोपमानतादात्म्यमुपमेये. अत्र केचित् प्रकृतस्यापरेगोत्वेन प्रकाशे पाठदर्शनात्तत्र चासामान्यतो निर्देशात्तच्छुद्ध
१५० साध्यवसानलक्षणाया धर्मधर्मिणोरेकत्वाध्यवसायेऽप्येषा. अभेदेनातिपादितेऽपि तदुपलक्षणं. यथा कर्णलंबितकंदर्पमंजरीकेश
150 रारुणकपोलमंडलं. निर्मलं निगमवागगोचरं नीलिमानमवलोकयामहे इत्यत्र नीलिमपदस्य तदाश्रये शुद्धसाध्यवसानल
क्षणया नीलिमाभेदप्रतीतिः एवं हेतुफलयोरभेदाध्यवसायेऽप्येषा. यथा चित्रासक्तं समरसीमनि शात्रवाणामाजीवनं विबु
धपर्षदि कोविदानां. संमोहनं स्मरतमंसदि कामिनीनां रूपं त्वदीयमवलोकयतो नृप मेऽस्मादौ चित्रासक्तादिपदस्य तद्धेतौ शु
द्धसाध्यवसानाः. एतेन हेतोर्हेतुमता सार्धमभेदो हेतुरुच्यत इति हेत्वलंकारोऽप्येष एवेत्यपास्तमित्याहुः अत्र भेदेऽभेदः अ
त्रकमलादिपदानां मुखत्वलक्षणतावच्छेदकं तेन रूपेण प्रथमतो बोधे तद्धर्मावच्छिन्नेकमलाभेदप्रत्ययो व्यंजनया. बाधबुद्धे
स्तु न व्यंजनिकेप्रतिबंधकत्वमित्याहार्याधीरेवेति केचित् आह्लादकत्वेनैव मुखत्वं लक्ष्यं. शेषं प्राग्वदित्यपरे. अत्र एकेन तद्ध
र्मावच्छिन्नेकमलाभेदबाधस्यैव भावादनाहार्यत्वस्यैवमेव. अन्ये तु शक्यतावच्छेदकरूपेणैव मुखत्वादिभानं वदंति तन्मतेऽभेदप्र
धानातिशयोक्तिरिति स्यादुपमानतावच्छेदकस्यैवाभेदाभावरूपतया निर्वाहः एतदेव चात्र मते निगरणं. यस्तु वाचकपदेन
शक्यतावच्छेदकरूपेणोपात्तस्य बोधनेऽसादृश्यातिशयमहिम्ना च बाधबुद्धेरस्थगनादेतन्मते पनाहार्यबोधीरिति दिक्. अन्य राम॰
स्मै कुमार्यमन्यैव कापि वर्त्तनच्छाया. एषा मासामान्यप्रजापतेरेखैव न भवति. स्तु कुमारशाहस्य लडहादेशः वर्त्तनं गात्रीरं. छाया १५०

कांतिः यथा माशीतो स्मकालेनु स्मशीता· सामान्यप्रजापतेः सर्वसाधारणप्रजापतेः रेखानिर्मितिः अत्रान्यदेवस्तो कुमार्यमित्यत्राऽस्याः
सौंदर्यातिशयदतिशयः प्रतीयते· अत्राभेदेभेदः अत्रेदं बोध्यं प्रकृतस्य पदस्यान्त मित्यस्य प्रकृतस्य अन्यवक्तव्ये नाध्यवसायइत्यर्थः
यथा तस्याः सत्वेनियतमिंदुस्तुधा मृणालज्योत्स्नादिकारणमप्रमदनस्य वेधाइत्यत्र प्रकृतनाधिकासंबंधिकारणस्यनिर्मातृस्यति
क्ताकारवत्वं तरूपत्वमृणालादित्वेनाध्यवसानं· अस्याः सर्गविधाविधाता देवतु नैवं निस्तुयाभागात यथा वा प्रसंभोनवपुंडरीकमुकु
लश्रेणीश्रनिस्माधरं श्रोणीदोरुदयः प्रतिक्षितिस्तहेमवल्लीप्रसूतोत्कारः किंचान्यत्कथयामि वीरजगतीरालिपतिर्मधशोथिस्तारेप्रति
देशमेवादिविष्वक्चोतस्वतीनिर्झरः अत्रैकैकेवकीर्तिस्तवस्थाने योग्यतावशान्नेनतेन रूपेणाध्यवसिता· यथा वा स्त्रीभिः कामोर्थि
भिः स्वर्द्धः कालः शत्रुभिरेक्लिस इति· अत्रानिमित्तमभेदान तद्रूपेणाध्यवसायः सच कविनिबद्धकर्तृकइत्यन्यत· गुरुवंचनसांज्ञेनोर्यकीर्त्तिं
भीष्मः शरासनेइत्यत्रापीयमेव· अत्रश्लेषसंकीर्णोयमित्यन्यत एतेनेदशेषु विषयेषु श्लेषालंकारोपमातिरिक्तइतिकेषांचिदुक्तिः प
रास्ता· गजत्रातातिहस्तामिः श्रीकांतइतियोवततेः यथास्थितस्त्रगतामिर्हरिः शौरिःसकौतुकमित्यत्रतन्नायमलंकारः अध्यवसानाभा
वात नचैवं कोन्नालंकारः नकोपि· किंतु तेषां तेषां तथाज्ञानानिज्ञायमानानि मगाद्विषयकभावे उद्दीयमानानीति बोध्यं त
स्मुद्दीयमानसंसारः सर्वोपालंकारेष्वेवेतिनियमोस्ति· एवमकृशंकुचयोः कृशंवलग्नइतिपद्येपिबोध्यं॥ ॥शंकायामिति· ध्रुवंहिसुप्रौढ़ौ
कलंकामावस्यासंबंधेसंबंधः कल्पितः उत्तरार्धेसाम्यसंबंधसंभवेपितदसंबंधः पराभवपदेनसूचितः एवंचासंबंधेसंबंधः संबंधेचासंबं

का.टी धइतिद्विविधेयं। यद्यर्थोक्ताविस्तुपलक्षणं तत्काप्रकारद्वयस्य एवं च सो भाद्यनिपुरस्यास्यस्पर्शांतिविधुमंडलमित्यत्राप्यसंबंधे संबंधरूपा
१५१ इयमेव। यत्तु यत्रास्पर्शांतीवेंदुमंडलमिति कृते उत्प्रेक्षायाः प्रतीतेरिवाभावेगस्योत्प्रेक्षैवोचिता। अन्यथात्वत्कीर्तिभ्रमणश्रांताविवेश
151 स्वर्गनिम्नगामितिवद्युक्ते॰पि गम्योत्प्रेक्षानस्यात् इति तत्र। नूनं मुखं चंद्र इत्यादौ नूनंपदाभावे गम्योत्प्रेक्षायाश्चापत्तेः रूपकस्यानाप
त्तेश्च। त्वत्कीर्तिरित्यत्र वक्तृद्वारा गमने स्वर्गगमने वा स्वर्गगाप्रवेशे ज्ञातादात्म्ये उत्प्रेक्षायाः कीर्तेः स्वर्गगाप्रवेशकर्तृत्वोत्प्रेक्षाया अनंगीकारे
श्रां भ्रमणश्रांतत्वरूपविशेषणवैयर्थ्यं तस्य कृते उत्प्रेक्षासाधकाभावाच्च। स्वर्गसंबंधित्वरूपानुपात्तधर्मनिमित्तेयं। अस्याः स्वर्गगमनस्त्व
पात्तुयात्तधर्मनिमित्तेतिदिक्॥ शकायामित्यत्र हरणो द्यतिरेकालंकारगर्भेयं॥ एवं त्वावरणप्रविशा च्छायो न गणितः क्लेशो महा
न्जितः स्वच्छंदं चरतो जनस्य हृदये चिंताज्वरो निर्मितः। एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहि
तस्तन्वीमिमां तन्वता॥ अत्राप्येषापि स्वगुणानुरूपरमणाभावादित्यत्रासंबंधे संबंधरूपा लावण्यप्रकर्षप्रतिपादनार्थं उक्तः
चतुर्थी कार्यकारणयोः पौर्वापर्यविपर्ययरूपा। विपर्ययः कार्यस्य शाघ्यमेन सहभावेन च। तत्राद्यमाह हृदयमिति। अत्र कार
णस्य कांताधिष्ठानस्य शीघ्रकारित्वं वक्तुं कार्यस्य कंदर्पाधिष्ठानस्य प्रथममुक्तिः। अन्त्यं यथा। सममेव समाक्रांतं द्वयं द्विरदगामि
ना। तेन सिंहासनं पित्र्यं मंडलं च महीभृतामित्यत्र। सममेव न तु पूर्वापरभावेनेति प्रतीतेः सिंहासनाक्रमणं कारणं महीभृन्मंडला राम॰
क्रमणं कार्यं। इत्यतिशयोक्तिः॥ अथ प्रतिवस्तूपमा। एकस्येति। तेन निदर्शनादृष्टांतयोर्व्युदासः॥ तत्र बिंबप्रतिबिंबभावेनानिर्दे १५१

शेनैकत्वाविरहात्। अवस्थितिरुपादानं। प्रतिबिम्बकशतिवाक्यार्थस्तु उपमासमानधर्म्मोऽस्यामिति भुग्नत्वेनेतदाह्लादकत्वमिति एवं चोप
मेयत्वमपि वाक्यार्थस्येति ध्वनितं। न चापि विस्थितो भानुरिव मृग्यस्य स्वभावजमेनदेवेति वाक्यार्थोपमायामपि व्याप्तिरिति वाच्यं बिम्ब
प्रतिबिम्बभावापन्नसाधारणधर्मकं वाक्यार्थयोर्यस्योपम्यमित्यस्याविवक्षितत्वात्। तत्र तु इव शब्देन वाच्यमेवेत्यदोषात्। निर्म
लं वदनं कांतिविमलं कमलमेमेतत् दावितिप्रसंगवारणाय वाक्यार्थयोरिति। अत एवाननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतं।
भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहमिति स्मरणालंकारेऽपि नातिव्याप्तिः पद्मसदृशमाननं तामिन्द्रेव वत्तवद्वतीति। अपह्नुतिः स्वल्प
महाशय चक्रवर्त्ती विस्तार पत्रस्तनतटे बध्नदामभावः कालागुरुदेहनमध्यागतःसमं तात् लोकेन्नरं परिमलं प्रकटी करोति इत्य वा
यद्धनत्वदहनमध्यागतत्वयोर्बिम्बप्रतिबिम्बभावेऽपि उपमानोपमेययोरत्रिधर्मो बिम्बप्रतिबिम्बभावापन्नः एव दृष्टांते नुसारस्तात् दृष्टि
धर्म्मो प्रेविंबप्रतिबिंबभाव इतितनो विशेषः। एकस्येव वक्ष्यमस्य पृथक् कृशाङ्ग्यामुपादानं बिम्बप्रतिबिम्बभावः देवीकृतामिषे
का। परिवारपदं। साधारणपदं। परिभोगोम्रूषाद्यर्थस्तु उपादानं। दैवतेति। स्वर्गादिघटितप्रतिमेत्यर्थः। इत्येके इति अत्र
रुचिस्कारयोर्वाक्यार्थगतसादृश्यरूपत्वाभावः एकार्थतयेति अनोचित्यरूपे कार्थतयेत्यर्थः। एवं च दैवतरूपांकित
रत्नस्य भोगयोग्यत्वं यथानुचितं तथा देव्याः परिवारपदयोग्यत्वमनुचितमित्यौपम्यपर्यवसानं। न तु यथा पर्यवसानं। न
तु यथा पर्व तत एतद्वा क्रिमानस्तनदुमादि स्यात्र महानस्य स्य हष्टांततानुचिताएवमेव परिवारपदत्वा योग्या देवीत्वादिन्यत्र दैवतरू

का.टी. पंकितरत्नस्य दृष्टांततानानुचितेति चेन्न । तेन दृष्टांतेन तत्तद्व्यक्तिसामान्यधर्मावच्छिन्नयोर्व्याप्तिसिद्धौ यत्सामान्ययोर्व्याप्तिस्तद्विशे
१५२ षयोरिति न्यायेनोक्तविशेषनियमसिद्धेरदोषात् । नियमविशेषरहितकेवलार्थमात्रस्य प्रकृतत्वेन तत्र दृष्टांततया कार्थानिरू
पितमेवोपमामात्रं गम्यं । यथा मेरुरुद्रेभासते चंद्रोपि भाति भवानुद्येरिति दिक् । वैधर्म्येणापि दृष्टांतः । वशमवो गुणान्विनापि
संगविशेषेण पूज्यते पुरुषः न हि तुंबीफलविकलो वीणादंडः प्रयाति महिमानमित्यादौ । यद्यप्यत्र पुरुषः पूज्यत्ववान्सं
गविशेषवत्त्वादित्यर्थे तुंबीफलवैकल्यप्रयुक्तमहिमाभावविशिष्टो वीणादंडो न दृष्टांतस्तथाप्यनेन दृष्टांतेन संगविशेषा
भावप्रयोज्यपूज्यत्वाभाववानिति व्यतिरेकव्याप्तिराक्षिप्यते । तत्र प्रवीणकरीत्या एकविशेषे परविशेषस्य दृष्टांतत्वाभावान्न तद्व्यक्ति
सामान्यावच्छिन्नव्यतिरेकव्याप्तिराक्षिप्यते सिद्धे च तस्मिंस्तु पाणिविपरीतदृष्टांतेन तादृशसामान्यान्वयनियमसिद्धौ यत्सामान्ययो
रिति न्यायात्तादृशविशेषावच्छिन्नकार्योक्तान्वयनियमसिद्धिः एवं च तुंबीफलराहित्यवद्वीणादंडसदृशः संगविशेषाभा
ववान्पुरुष इति बोधः तुंबीफलवद्वीणादंडसदृशः संगविशेषवान्पुरुष इति च बोधः यदीति । किमद्भुतं स्वाभाविकत्वान्नाद्भु
तमित्यर्थः किं ततः सदैवेत्यनयोरप्येवं । सत्नामविषादित्राप्रकतिरेवस्वभाव एव तावद्वर्यमित्यर्थः इति प्रतिवस्तूपमा । अथ दृष्टां
तः प्रतिबिंबनं बिंबप्रतिबिंबभावः तत्त्वे कान्तमित्यर्थः अत एव प्रतिवस्तूपमातो भेदः न चात्रोपमा । यथैवादिशब्दाभावात् । नाप्य राम०
र्थांतरन्यासः सामान्यविशेषभावाभावात् दृष्टांतपदप्रयोगमाहहेहेइति । गृहीतप्रामाण्यकइत्यर्थः । निश्चयः दार्ष्टांतिकवाक्यार्थ १५२

निश्चयः दृष्टान्ते वाक्यार्थे गृहीतसहचारेण दार्ष्टान्तिकार्थप्रमाणेन निश्चयात् । त्वयीति दृष्टवदृष्टसाढे । तस्यामालविकायाः अ-
त्र पदे त्वयीति तत्र सप्तमीनिर्देशात् हिमांशोरित्यत्र षष्ठीनिर्देशात् च मनोभवज्वलितत्वप्रतिनिर्देशात् स्मरविकिरणज्वलितत्वस्यानुक्त्या न्यून-
त्वाच्चासंपृक्तत्वमिदं पद्यं । अत्र नृपचन्द्रयोर्मालविकाकुमुद्वत्योर्मनःकुसुमयोर्मनोभवज्वलितसूर्यकरज्वलितयोः निर्वाणप्रकाशयोः अनु-
बिंबप्रतिबिंबभावः कुमुद्वत्या महिमांशुदर्शने विकासरूपवत् तस्या मनसस्त्वद्दर्शनेन तत्त्वासइति प्रतीयमानोपमायां मन कुसुमयोः बिंब-
प्रतिबिंबभावापन्नयोः साधारणधर्मत्वं । अत्र नृपदर्शनमनोभवज्वलितप्रकाशयोः कार्यकारणभावनिश्चयोपपद्यदन्वयानुविधायित-
नन्यत्वमिति व्याप्त्या दृष्टान्ते गृहीतसहचारनिश्चयप्रयुक्तया भवतीत्यनुष्टुप्संगतिः । न च हिमांशोरालोके यथा कुमुद्वती कुसुमं वि-
कसतीति तथा त्वयि दृष्टे तस्या मनो लष्यतीति उपमां विना पूर्वोत्तरार्धयोः संबंधानिदर्शनासंकरः ॥ ॥ तत्र साधारणधर्मानुपादानात् ।
अत्र वाक्यार्थयोः स्वस्वार्थे निरपेक्षत्वात् निदर्शनायां तत्रापि सापेक्षत्वाच्च । वैधर्म्येण । विपर्यये साधर्म्यपर्यवसायिना । आह वेणु हे । सा-
हसैकमणाः प्रकाशान्तशर्मयस्य । विशारारुत्वं शरीरमित्यश्वरत्वं वैधर्म्यविपर्यये । वातेनतत्र तथ्ये त्व एवं रूपे । अत्राहवर्गातसंबंधिभंगुरत्वा-
स्थिरत्वयोः उपमानोपमेयभाव इति दिक् । इति दृष्टान्तः १४ अथ दीपकं सकृदिति । प्रकृताप्रकृतयोः सजातीयधर्मसंबंधस्यो-
पमायां पर्यवसानात् साम्यव्यंग्येव । वाचकविरहात् व्यंग्याया अप्यस्या वाच्योपकारकत्वात् गुणीभूतव्यंग्यत्वमेव न तु ध्वनित्वं अत्रो-
क्तोपमाशंका क्रियादेरित्यादिना गुणादिसंग्रहः एकस्थस्येति । एकत्र तिष्ठतीत्यस्यार्थः साम्यादिति दीपवद्दीपकं । संज्ञायां कन् ।

का·टी· प्रकृताप्रकृतप्रकाशकत्वेन च सादृश्यं· रूपरागानां धनं नागानां फणामणिः केशराः सुसिंहानां· कुलपालिकानां च स्तनाः कुतः स्प
१५२ र्श्यन्ते मृतानां तु पमेयादृति· प्रकृतत्वात् अन्येषां तूपमानत्वं अत्र तत्तदुपमानैः प्रत्येकमौपम्यप्रतीतिः अत्र क्रियासाधारणधर्मः
गुणो यथा· रूपामलाः शारदे शरणा मिदिशो ज्योत्स्नापंक्तिभिः भुवश्च स्तकुमाराभिर्नवशाद्वलपंक्तिभिरिति· यन्नु वर्षत्स्वतु दमाले
153 यं वर्षत्येषा च शर्वरी उन्मीलन्तिकदंबानि स्फुरंति कुटजोद्गमाः माद्यंति चातकास्तृप्ता मा द्यंति च शिखावलाः इत्यादावावृत्तिदीप
कं क्वचिद्धक्त्वस्यार्थस्योभयोर्वावृत्तेरिति तत्र· धर्मस्यसकृदुपादानाभावात्· प्रकृताप्रकृतेोभयाहत्तित्वाच्च एवं वाचकलुप्तो
पमैवेत्याहुः प्रकाशानुसारिणः अन्ये· वह्नीभुक्रियास्तु कारकस्य सकृद्वृत्तिरित्येतत् कारकस्य क्रियास्वित्युक्त्या क्रियादीपकं· ना
दृता च्चासकृद्भूताश्रूयते· असकृद्भूतायाश्चोपमानत्वाभावः सत्त्वे बाध्यत्वेनैवेति दृ· तेनो पमानमस्तीति ग्रंथेन प्रतिपादितं इति अ
न्ये उपमानोपदेयभावप्रतीतिः पूर्वस्मिंस्तत्रत्वतीतिरितिभेदः एककर्तृकत्वादिधर्मकृतसादृश्यस्य चमत्कारित्वाच्च· इदं च प्रकृता
नामेव प्रकृतानामेव प्रकृताप्रकृतानां च अनेकचमत्कारि क्रियादौ शिष्टेन वर्णप्रकारकोत्कर्षकतया चमत्कारित्वेनास्यालंका राम·
रत्वं· एतेन दीपके सर्वत्रौपम्यस्य गम्यत्वाद स्य दीपकत्वं चिंत्यं चिद्यतीत्युदाहरणे क्रियाणां सादृश्याविगतापि सर्वसां प्रकृतत्वान्का १५२

रकतुल्ययोगितात्वमेवोचितमितिचपरास्तं तुल्ययोगितात्वोपमागर्भत्वेनेति व्याख्याते. स्विद्यतीति. स्वेदः सात्त्विको भावः दयिते च परिरं
भोद्युते कूजतीति मृदु शब्दं करोति ततोप्यनिवर्त्तिनि वेल्लतीति संकोचमालम्बते विवलतीति परिहत्य शेते. निमिषतीति चक्षुषा नेत्रे मुद्रय
ति. अतः न वोढात्वेन बहिः प्रकाशात्. चुंबितुमिच्छतीति न तु चुंबति. अत्र वधूरीति. शयने इत्यपि वोध्यं यथोत्तरेति अस्यती भि
तत्वादाद्यमित्यत्रापि वीप्सा बोध्या. अभवत्स्मृतयोगदोषपरिहाराय मुग्धाप्रेइत्यादिपाठांतरे कल्प्यते. आसादितमितिनत्वं
सकारान्तं सकारान्तं सकयोरेकशेषः एकवत्वं च. अत्र कोदंडेनारिशिरः प्रापयता शरा उपक्रियन्ते शरैरपि भूमंडलं प्रापय
द्भिररिशिरः शिरसापि मज्जायकं त्वा लंभयता भूमंडलं भूमंडलेन च कीर्तिमा साहयता नृपातिः नृपेण गापित्रैलोक्यं व्यापयता की
र्त्तिरिति पूर्वपूर्वेभ्यः परस्य परस्योपकारः एकस्या आसादनक्रियायाः संबंधाद्दीपकता. अत्र शरादीनामरिशिरः प्रभृती
नां च साहाय्यमपि व्यंग्यं. इति दीपकं १५ अथ तुल्ययोगिता. प्राकरणिकानामेवेति एवं चाप्राकरणिकानामप्राकरणिकोभया
त्मकत्वे सति श्लोपम्यान्वयकत्वं लक्षणं. सत्यं तेन दीपकमुदासः न चाक्षेपलभ्यसाम्यव्यतिरेकभेदेतिव्याप्तिः तत्रोपमेयासिकाक

का·टी·

१५४ नस्फुटचमत्कारः न तु साम्यप्रतीतिकृत इति विशेषात् उपमेयानाधिक्येन विशेषणान्न दोषः इत्यन्तो औपम्यं वात्र गम्यं न त्वयो
ज्ञकसमानधर्मोपादानात्तद्वाचकाभावाच्च · धर्मवाचकपदेऽस्मिन्नुद्धृते साधर्म्यभानेऽपि सादृश्यपर्यवसानाभावात् · पांडुरिति · प्रकृ
तानामिति · विरहानुभावत्वेनायमर्थः वदनादीनां · पांडुत्वादिविशिष्टानां · न तूपमानरोगेति उपमानरोगजपांडुतादीत्यर्थः अ
त्रावेदनक्रियया विरहरोगयोरौपम्यप्रतीतिः वरार्प नायिकामेवं क्षिपत्वेन विरहरोगयोः प्राकरणिकत्वं अचिकित्स्यत्वरूपं हेतु
यत्वं साधारणो धर्म इत्यन्ये अत्र क्रियारूपधर्मैक्यं · कुमुदेति · प्रसादे कुमुदसाम्यं · माने कमलसाम्यं प्रकृतदशायां नीलनीरज
साम्यं · ललितो मनोहरः विलासः कटाक्षः प्रतिहतं निर्जितं · एकपदे · युगपत् · आननस्येत्यस्याग्रे इतिशेषः अक्षिक्षिप्तत्वेन
प्रतिहतत्वेन च तेषां परस्परं साम्यप्रतीतिः अत्र साम्यप्रतीतावपि तावन्मात्रकृतो न चमत्कारः किंत्वेकधर्मान्वयकृतोऽपि · अतो
गम्योपमया नातिनिर्वाहः जगाल मानो हृदयाद् मुग्धाविलोचनाम्भोभिरिव वारिधाराः इत्यत्र न तुल्ययोगिता सादृश्यप्रतीत्यैव चम राम·
त्कारात् · चंद्र इव मुखं दर्पणस्तत्र खमिव अत्र च न दीपकं · एवं प्रदीयते पराभूतिः मित्रशात्रवयोस्त्वया · तत्रापीयमेव · प्रदीयते पराभूतिरिति श १५४

154

द्वेष्यश्लेषमूलकाभेदाध्यवसायेनाभिन्नीकृततदर्थस्य वा धर्मस्यैक्यात् तादृशधर्मेण तयोः साम्यप्रतीतौ हिताहितविषयकात्तु
ल्यकर्तृत्वरूपं वाऽप्यवाच्यराजोत्कर्षकतया गुणीभूतं प्रतीयते इत्यन्यत् नैतावताऽस्य तुल्ययोगितान्तरत्वं वक्तुं युक्तं लोकपालो
यमः पाशी श्रीदः शक्रोऽभवानपि इत्यत्र तूक्तं दीपकमेवेति दिक् इति तुल्ययोगिता व्यतिरेकः स्याधिकं गुणविशेषकृतमुत्को
र्षः स्यदेवेति · योगेनैव लक्षणालाभात् स व्यतिरेको नामालंकार इत्यर्थः उपमानादेरुत्कर्षे कुमुदादतिरिच्यते मुखमित्यादौ नायमलं
कारः पुनर्हीनेति · यौवनं तु न तथेति उपमेयस्य न्यूनतेत्यर्थः अस्येयं हीनेति · अयं भावः न ह्यत्र चन्द्रयौवनयोः सादृश्यं किं तु तन्नृरूप
योस्तत्र चन्द्रस्य सादृश्याधानतया न्यूनत्वं · यौवनस्य सान्त्वनाध्यानतयाधिकं मानप्रसादनानुगुणतया प्रकृतवाक्यार्थानुगु
णत्वात् इति · अस्येयं रूपः एवं त्वत्र वाक्यार्थः चन्द्रो हि पुनः पुनरागमनेन लोके सुलभोऽतो न तादृशमाहात्म्यशाली इदं
पुनर्यौवनमपुनरागमनेनाति दुर्लभमिति मानादिभिरन्तरायैर्विदग्धया भवत्या सुधागममापितं न साम्प्रतमिति अन्यथा कि
मिति अस्य कदर्थस्य यौवनस्य कृते मया मानाद्विरंस्यते पात्तु नाम यौवनमिति प्रतिकूलेनार्थेन प्रकृतार्थस्यानुपपत्तेः ·

का·टी· यद्धितकारिणाहृत्याहीदं वचनं एतेन रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियायाँगुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मु-
१५५ क्ताः सखे मामपि कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृत इत्यत्रो-
पमेयस्य नतापर्यवसायी व्यतिरेक इत्युपात्तं सशोकत्वेन तज्जन्यचेतनत्वसहृदयत्वादिभिर्गुणाधिक्यस्यैव सत्त्वात् नच न्यू-
155 नत्वपदेनापकर्षोऽभिव्यक्तिः सच शोकस्य स्वस्वरूपेणापकृष्टत्वादस्त्येव वाच्यार्थगोचरकालिकोत्कर्षापकर्षयोरेव तदलंकाररूप-
त्वादिति वाच्यं प्रकृतवाक्यार्थानुगुणधर्मवत्त्वस्यैवात्राधिक्यपदार्थत्वात् चरमचेतनत्वमेव सम्यक् न तु पुनः प्रियावियोगा-
दिजन्यशोकास्पदं चेतनत्वादीति पर्यवसानेन तस्य प्रकृतवाक्यार्थस्तवविरहानुगुणत्वात् अत एव प्रियावियोगाद्यपि तुल्य-
मित्यर्थकमावयोः सर्वं तुल्यमिति वाक्यं चरितार्थं· एतेनोपमालंकारहरीकरणमेवात्र चमत्कारि· इत्याद्युक्तलतयाकु-
तश्चिदंगात भूषणाय मारणामिव रसानुसारेण क्वचिदलंकारावियोगोऽपि शोभाव इति ध्वनिकृदुक्तमपास्तं· एवं ह्न्यमदादौ यश- राम·
सा मयापुनर्द्विषां हृत्सेर्ष्यत्यपथः सिताः कृत इत्यत्र नलमहीपतेः स्वनिंदया लक्ष्मनिर्वेदातिशयरूपप्रकृतवाक्यार्थद्रुत्यागतस्सनंता
१५५

स्वता· कांतिमता· रविरणाच· त्रियामा राः त्रिः अप्राकृतिस्नैवेति· विनिर्जितपदार्कृतिमेवेत्यर्थः दृष्टव्यामिति· समरासक्तमनसायं क
जावलितंदन इतिच पाठे इत्यर्थः अत्रैदं चिंत्यं उपात्तवैधर्म्यांशेश्लेषे शौवत्र्यातिरेकस्याक्षेपमूलकत्वमुचितं· नत्रुपत्र कुत्रापि श्ले
षेण· एवं चोभयानुपादानेप्याक्षेपकृतमेदत्रयं चिंत्यमेव· न च यत्र हि जगस्त्रालपमातरि गुणादिशाद्द्वेद्ये श्रूयमानो यमेयेषु स्वशब्दो
पात्तएवश्लेषोव्यतिरेकोन्यापकतत्वैतदुदाहरणांस्मृपपादे· तत्र स्वशब्दवेद्यस्यैव वैधर्म्यस्य संभवादिति· स्वछेति· स्वच्छात्मतानिर्म
लत्वमेव गुणास्तेन समुल्लसितं प्रतिबिंबितमिंदुबिंबं यत्र· मुखेपि कपोले चंद्रप्रतिबिंबनात· मधुपङ्क्तेप्येवमेव यद्वा समुल्लसितं
दुबिंबमितिनिरूपकं· मुखपक्षे समुल्लसितत्वं प्रशस्तत्वं· यद्वा स्वच्छात्मता विकृराणामेव उत्कर्षकत्वेन गुणाः ॥ बिंबप्रभोऽधरोय
त्रेतिमुखपक्षे· मधुपक्षे बिंबप्रभां धरतितत्त जीर्णमधुनोरक्तत्वात अकृत्रिमो मुखवासनादिकं विनागंधांतरयोगंविनाच
हृद्यो गंधो यस्य· अतीव अतिशयेन· [illegible] नाम मधु तस्यांपानेछां जहार त्वाननं अधरपानेछायाश्चानिहृत्त्वे रित्यन्वयः अंगनानामान
नं मधु सदृशं हृद्यगंधादिमत्वादित्येवं श्लिष्टविशेषणोपमाक्षेपेपि तत्स्थां जहार नाननमित्यतोवैलक्षण्याद्व्यतिरेक इतिवो
ध्यं· अत्र सर्वलोक लभ्यत्व गुणैक लभ्यत्वरूपोत्कर्षा हरणाहरणरूपोत्कर्षापकर्ष हेतू नोक्तो· उक्तेप्युदाहरणेषु अयमस्माद
धिक इतिव्यतिरेकाकारो गम्य एव· इंदोः पद्माश्चाधिकं मे प्रियायावदनंमतं· विलासैः सद्यगंधैश्चेत्यादौ तु वाच्य एव· अयमेवा
तुभवपर्यवसायीत्युच्यते· प्रियायावदनेनेदं पंकजं च सदृशं नहि विलासैः शोभमानत्वाद्विकासित्वाद्विश्व दयेइतिपद्ये शिशुपालेका

रतिरस्कारकोव्यतिरेकः निलंकनिरांतकचतुःषष्टिकलाधर सदाऽपूर्णो महीपत्वं चंद्रोसीति मृषावचः इत्यत्र रूपकतिरस्कारकोयं
हृदंतरनिवद्धदुष्टेः कोशानिषण्णस्य सहजमलिनस्य · कृपणस्य कृपाणस्य च केवलमाकारतो भेद इति पद्ये केवलपदस्वारस्येन अ
नयोः केवलं आकारवत्पदवाच्यत्वतदभाववत्पदवाच्यत्वाभ्यां आकृते अभेदः गुणैः साम्यमेव हटतरेत्यादिविशेषणसामर्थ्यादि
तरगुणे श्लेतिप्रतीतेर्गम्योपमैवालंकारो न त्वयं आधिक्यस्य चमत्कारित्वात् · कृपणस्योपमेयत्वेन उत्कर्षाभावाच्च · औपम्यातिर
स्काराभावाच्चेति दिक् · इति व्यतिरेकः १७ अथाक्षेपः वक्तुमिष्टस्योक्तस्य वाख्यावचनार्हस्येति · अवचनानर्हस्येति वा पाठः नि
षेधः अभिधाननिषेधः अनपेक्षिताभिधाननिषेधस्य न यद्यं शुखमेवैतद्दित्यादेशवारणाय षष्ठ्यंततृतीयांते · निषेध इवेति · अ
भिधाननिषेधेप्यभिधेयानिषेधात् विशेषणसामर्थ्यमेवाभिधानस्यापि निषेधादिति भावः · अर्थगतस्येति · तस्य प्रकृतत्वादेवाभिधा
नुपपत्तिः तस्य क्रियमाणो निषेधो वाधितः सन् आभासत्वे पर्यवस्यन् विधेराक्षेपक इति भावः · केचित्तु वक्तुमित्युपलक्षणं करिष्यमा
णस्यापि निषेधस्याक्षेपः तां सुंदरीं वर्णयितुं नमेवाणी प्रवर्तते इत्यत्र करिष्यमाणवाणीप्रवृत्तेर्निषेधो वर्णनीयस्या निर्वाच्यताव्य
ञ्जकीयस्याङ्गः एष हि किमपि कस्या अपि कृते निष्क्रयभराणामिष्टलमथवा · अविचारितकार्यारंभकारिणी प्रियतां न भणिष्यामि किं
किमपि · तत्पीडातिशयरूपं एष इति सामर्थ्यसंवोधने · अलमथवेति पूर्वाक्षेपे अविचारितेत्यादि तत्स्वभावाः स्थैर्या सौर्य्यं विचार्यं
वप्रवृत्तेरनर्थकं अलमित्यनेनैव निषेधलाभेन भणिष्यामीति पुनः कथनं खेदातिशयद्योतकं अत्र नायिकासंतापातिशयो वर्ण्य

वक्रकुमिषेण च यासौ गिरिशिष्य वक्रकुंशक्य इति व्यंजयितुं निषिद्धः नायकं प्रति दूत्युक्तिः एवमग्रेपि ज्योत्स्नेति· शीतांशुः कांतद्रवः चंद्र
कांतमणिजलं· आः इभेरवदे अंतर्मानसं· मानसमध्ये· प्रभवतादाहकारणसमर्थेन· प्रवसतेति वा पाठः त्वया कारणभूतेनातो
दुःसमाधानत्वं· प्रभवतेति पाठे प्रभोरनभियोज्यत्वं· अत्र वियोगिनीनां ज्योत्स्नादि स्फुलिंगायत इत्यत्र जाति प्रसिद्धत्वं विशेषं व्यंजयितुं ज्यो
त्स्नादीनामुक्तात तत्कथं न प्रतिषिद्धं· अत्र व्यांपेनाशक्यवक्रव्यत्वादिना व्यंजकं ताद्रूप्येव चारुत्वमावहतीति गुणीभूतव्यंग्यता· यन्नु वा
मनेन· उपमेयेप्सतिकि मुपमानेनेत्येवमुपमानाक्षेपस्याक्षेप इत्युक्तं तत्त्वव्यक्तमाणप्रतीयरूपतया गतार्थं इत्याक्षेपः १८ अथ विभा
वना· कारणेति· प्रसिद्धकारणेत्यर्थः त्स्ववेक्रियते नेनेति व्युत्पत्त्या क्रियाशब्दः कारणपर इति भावः एवं च कारणव्यतिरेकसामा
नाक्षिकरणेन प्रतीयमाना कार्योत्पत्तिर्विभावनेत्यर्थः नकठोरं नवातीक्ष्णमित्यादावपि कठोरत्वादिविशिष्टायुधस्य जयहेतो
रभावेपि कार्यकथनाद्विभावनैव· अतिशयोक्तिस्तु तदंगं· कारणतावच्छेदकावच्छिन्नकारणव्यतिरेकस्यविवक्षितत्वात् ननु
कारणाभावे कार्योत्पत्तौ स्फुरितस्य विरोधस्य प्रसिद्धातिरिक्तेन कारणेन परिहाराद्विरोधाभासप्रकारोयमितिचेन्न· समबलयोः प
रस्परविरोधेन तत्त्वीकारान्तरहतु कारणविरहेण कार्यमेव वाध्यत्वेन गम्यते न तु तेन तु जेन कारणविरह इति विशेषात् कुसुमि
तेति लताहननं विरहिणारोगहेतुः म्लानलिनीति रूपकं· भ्रमरदष्टाः परिवर्त्तहेतुः तरंगसंवेधो घूर्णनहेतुः नलिनीयुक्ततरंगेरि
ति वार्थः अत्र विरहस्वरूपहेतुं तरजमितानां रुजादीनां अन्यत्वेप्येकताध्यवसायो विभावना मूलं· स च प्रकृते नाहार्यः निरुपादानसं

ख

का॰टी॰ भारसमभिन्नावेवतन्वते जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने इत्यत्राहार्यो रूपकक्षतः सर्वथा कार्यांशेऽभेदबुद्धिर्विभावनाजीवितं
१५७ साच क्वचिदतिशयोक्त्या क्वचिद्रूपकेणोत्पद्यते अयमलंकारस्सामान्यकारणाद्युपमित्यत्र स्वाभाविकत्वेन परिहारः अत्र कारण
व्यतिरेकः प्रतिबंधकसत्त्वाद्यास्त्रपुलक्षणं तेन सातपत्रंदहत्या प्रपश्ना पजपनस्तवेत्यत्राप्येषा अत्रापि स्वभावमादाय विरोधपरिहारः
157 प्रतिबंधकाभावस्यापि कारणत्ववादिनां तु यथाश्रुतमेव समस्य क्व पर्यं तत्कारणव्यतिरेकप्रतीतेरार्थी तिबोध्यं शंखाद्वीणानिनादो
यस्तु देति महदद्भुतमित्यत्र वीणां विनेति प्रतीतेरार्थी कारणाभावप्रतीतिरस्त्येव अत्र शंखत्वेन कांताकंठस्तंत्रीनिनादत्वेन तत्र हीतं चाध्य
वसितं शीतांशुकिरणास्तन्वीं हंतसंतापयंतीत्यामित्यत्रापि दाहकारणतावच्छेदकधर्मावच्छिन्नाभावप्रतीतेरार्थी स्त्येव विरहकालि
कदाहकारणतावच्छेदकत्वं शीतांशुत्वेपीति विभावनाद्विशेषपरिहारः वस्तुतः शंखाद्वीणानिनादोपमित्याद्युदाहरणानि विरोधस्यै
व परस्परबाध्यत्वावगमात् यतः पयोधिरमवत्कारकल्पतरोस्तवेत्यत्रापि विरोधाभास एव परस्परं विरोधावगतेः एतेन कार्योत्का
रणजन्मापि विभावनेत्यपास्तं कारणांतरं विभावयतीति अन्वर्थाभावेन तस्य विभावनात्वाभावात् एवं निमीलितादक्षियुगाच्च नि
द्रया हृदोपिवाह्येंद्रियमौनमुद्रितात् अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः समहन्महीपतिरित्यत्रापि एषा अक्षियुगात्
हृदोपि संगोप्य अत एव महत्तरहस्यं यथा स्यात्तथा स नृपतिर्निद्रया दर्शि॥ निमीलितत्वेनाक्षिसन्निकर्षराहित्येन गोपनं बाह्येंद्रियस राम॰
हकृतात्मनस्संज्ञत्वाद्बाह्येंद्रियव्यापाररहितत्वान्मनसो गोपने पर्यवस्यति सा विशेषणोहीतिन्यायात् कालांतरीणादर्शनजनितस्मरण १५७

ख

सहृदयतमनसोपनीतमानं स्यादतश्चाह कदाप्यवीक्षितइति एवंचयोगजधर्मवद्दृष्टविशेषाद्धि नैवोपनयंनलत्वेन मानमभिमतं·
अदृष्टमप्यर्थं महदृष्टैव भवान्करोति स्वप्निजनदर्शनातिथिमिति उक्तेः अत्रदृशाधातो ज्ञीनसामान्येन लक्षणयात्रदर्शनाभेदलाभात्
कारणाभावे कार्योल्लाभेन विभावना· कुसुममिति तदुदाहरणोऽनुक्तनिमित्ता एषा· उक्तनिमित्ताप्येषा· यथा· यद्ववक्षितिविलासभवनं यौ
वनमुदियाय चंद्रवदनायाः दहनं विनैव तदधिप्लवं नल्लदयानिदत्यसेते· अत्रोपात्ते यौवनेदाहहेतुत्वपर्यवस्यतीति इतिदिक् इतिविभाव
ना· १९ विशेषोक्तिरिति· विशेषकं चित्तमिति पादमिदमनुक्तिरित्यर्थः निदेति· घुरत्वं स्यादयः कारणसत्वे कुतः कार्यानुत्पत्तिरित्येवमत्र
विरोधः कार्यानुत्पत्तेः कारणसमवधानबाध्यत्वात् अत्रनिमित्तं व्यंग्यमपि नचाविति गुणीभूतव्यंग्यता· कर्पूरइवेति· अत्रशरीरदाहः
शक्तिध्वंसे कारणं· सत्यपि तदनुत्पत्तिकथनं· सइति एकोऽसहायः कुसुमेत्यनेनायुधस्य निःसारता नशक्तत इति शालित्वकगम्यत्वा
दिति भावः यद्यप्यनुक्तत्वाविशेषादेषाप्यनुक्तनिमित्तैव तथापि प्रकरणादिना ज्ञातस्य निमित्तस्यावचनेऽनुक्तनिमित्ता· अज्ञात
स्यावचनेऽपरेतिभेदः यत्तु एकगुणहानिकल्पनया साम्यदार्ढ्यं विशेषोक्तिः यथा द्यूतंहि नाम पुरुषस्यासिंहासनं राज्यमिति·त
न्न· अत्र द्यूते राज्यस्य तादात्म्येनारोपेण रूपकसत्वात् तत्रसिंहासनरहिते द्यूते सिंहासनसहित राज्यतादात्म्यं कथं सिध्येदिति स्वा
रोपोन्मूलकयुक्तिनिरासायारोप्यमाणराज्येपि सिंहासनराहित्यं कल्प्यतइति दृढारोपरूपकमिदं· एवं गुणाधिक्यकल्पनायाम
प्यतदेव· यथा धर्मौ वपुषा मनुविक्रान्तवीर्यइत्यादाविति दिक्॥ ॥इति विशेषोक्तिः॥ १०॥ ॥क्रमेण· उपदेशक्रमेणापूर्वस्य पूर्वेणसंबंधो

का॰ प्र॰ साम्यधेनांशस्यांशेनैकत्वमित्यर्थः अन्वयि समसंख्यपदार्थज्ञानस्य यथासंख्यान्वयबोधत्वं कार्यतावच्छेदकं · यद्यपि कविशतिभानि
१५८ मितत्वस्यालंकारताजीवातोर्लेशतोऽप्यभावादस्य नालंकारत्वं तथापि एकत्रपदे बहूनां क्रमान्वये वैचित्र्यादलंकारत्वेनोक्तः इ
ति यथासंख्यं ॥ सामान्यमिति · अनुपपद्यमानतया संभाव्यमानस्यार्थस्योपपादनार्थं यदर्थांतरं न्यस्यते सोऽर्थांतरन्यासः हेत्वाने तु
158 सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यत इति ततो भेदः साक्षाद्धात्वादेरनभिधानादनुमानतो भेदः कविनिबद्धप्रमात्रंतर
निष्ठानुमितेरेवानुमानालंकारविषयत्वाच्च सुंदरमेव · सुंदरमपि · अत्र निजदोषेत्यादिना मान्यं शंखपीतिमा विशेषेण समर्थितं य
द्यपि दोषेण प्रमो भवतीत्यर्थे पामरस्यापि नानुपपत्तिसंभावना तथाप्याहार्यसावबोधानुमितेत्यादिना ऽभिहितो विशेषः कृतनामी
त्यादिना सामान्येन समर्थितः गुणानामिति · गुणानां रूपदोषादेव · धुर्यः श्रेष्ठः धुरि कार्यभारे नियुज्यते · अखर्जानवर्ष्माणः स्कंधो
यस्य · यत्रासंजितं युगं बलात्पातयति स गौर्गलिः अहो इति सत्स्वंदंयत्यपि यं वदत उक्तिः तेऽस्यनेन सामान्येनामत्यदार्थस्यापि य
हणात्सामान्यत्वं तेऽधन्या इति सामान्येनाहमधन्य इति वैधर्म्यद्वारा स्वापुरुषराधरूपो विशेषः समर्थ्यते अत्र हियत्यपत इत्यादेः प्रतिपा
दकस्याभावे समर्थ्यसमर्थकभावस्त्वार्थः तत्र लेशाद्वः ननूपकारमेव तनुते विपद्गतः सद्गुणो नितरां · मूर्छां गतो मृतो वा निदर्शनं
पारदोऽत्र रसः इत्युक्तोऽलंकार इति चेदयमेव · निदर्शनशाद्वस्य समर्थकपरत्वात् उपमानालंकार इति कश्चित् एते नोदाहरणांलंकारो राम॰
पमतिरिक्तो इत्यपास्तं · कारणेन कार्यस्य कार्येण कारणस्य वा समर्थने तु काव्यलिंगस्य विषय इति बोध्यं · समर्थ्यसमर्थकयोः सामा १५८

त्या विशेषभावसंबंधे यंतदितरसंबंधेकाव्यलिंगमित्युपगमात् अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं एको हि दो
षो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवांक इत्यत्र द्वयोरप्यर्थांतरन्यासयोः संसृष्टत्वादिति बोध्यं एतेन यस्मिन्विशेषसामान्य
विशेषाः सविकस्वरः यथा नेतेति रूढिर्विकस्वरालंकारोप्येष गीत्यपास्तं· इत्यर्थांतरन्यासः ११ विरुद्धयोरिवेति विरोधप्रतिभा
प्रयोजकरूपेणायदभिधानमित्यर्थः यथा कृतशाहोपस्थितिमहिम्ना विरोधज्ञानेपि शंका स्यात्तन्नतात्पर्यान्न विरोध इत्यपि विरोधा
भास इत्युच्यते विरोधश्चैकाधिकरणासंबद्धत्वेन सिद्धयोरर्थयोः समानैकाधिकरणसंबद्धत्वं· एकाधिकरणासंबद्धत्वेन प्रसि
द्धयोरेकाधिकरणसंबद्धत्वेन प्रतिपादनं वा· स च वाधबुद्ध्यनभिभूतो दोषस्य विषयः तदभिभूतोऽलंकारस्येति बोध्यं· क्रियेति· क्रिया
शब्देनात्र धातुवाच्योर्थः अभिनवेति· दवदहनो दवाग्निः पविर्वज्रं गौणत्वादिति· वियोगजन्यसंतापातिशायकेलाकृशिकत्वादि
त्यर्थः नन्वेवमत्रारोपमूलं रूपकमेव न विरोधः अन्यथा मुखं चंद्र इत्यत्रापि विरोध एव स्यादिति चेन्न· अत्र विरोधोत्थापनार्थमभेदस्य
विवक्षितत्वेपि तस्यान्यार्थमुपादानेनाचमत्कारित्वात्· विरहिण्यवस्थायामत्यद्भुतत्वस्यात्र प्रतिपिपादयिषितत्वेन तदनुगुणतया
नंगीकृताप्यर्थो विरोध एव चमत्कारितया समुल्लसतीति तस्यैवालंकारत्वात् मुखं चंद्र इत्यादौ तु चंद्रनिष्ठाह्लादकत्वादि सकलगु
णानां मुखे प्रतिपत्त्यर्थं चंद्राभेद एव चमत्कारी न तु सन्नपि विरोधः विवक्षितार्थाननुगुणत्वात् इति रूपकमेव न तु विरोधोलंकारः यदि
तु विरहिण्यवस्थाया अत्यद्भुतत्वेन विवक्षितमप्यर्थश्च नगभीकृतः किंतु पीडाजनकत्वाद्यतिशयमात्रं तदा रूपकमेव· यदि वा नग

रविशेषास्थितेरप्रकृतत्वाद्विवक्षयाऽप्यर्थगर्भीकरणेन च यज्ञकारीणां स्त्रीत्वं चेदृश इष्टं च्यवते न दानाच्चाविरोध एवेति दिक् । गिरय इति । नक्त
न्यार्थे तेनाल्पो वृत्तिरल्पवेगस्त्वल्पगम्भीरा इत्यर्थः । गाम्भीर्यं मंदवेगत्वाद्गुरुत्वाद्वर्णनीयेन तद्गतिशयप्रतीतेः । अतिलघुत्वं अपकृष्टगुरुत्वं ।
वर्णनीयातिशयेति । वर्णनीयोत्कृष्टत्वाद्यतिशय इत्यर्थः । अत्राद्यो मुग्धः । द्वितीयेऽस्त्येष दोषलेशः एवमग्रे प्रत्यूह्यं । येषामिति । कंठपरिग्रहप्रणयिनां ।
आलिंगनप्रेमवतां । नीहाराः दारुणाः अतएव तेऽकवर्णाः प्रीतिमांसास्ते हाश्विकारिता । सोढार्दं च । संगरसंगो युद्धप्राप्तिः । प्रमाधनमलं
करणं । लोहितेति । रुधिरसंपर्कक्तेत्यर्थः । अनुदाहरणत्वेति । नीहारत्वस्य जातित्वाभावादिति भावः नीहारस्यापि कचिदनुरागदर्शि
नाच्चेत्यपि बोध्यं । अत्र शफरत्वेति । लीलयास्वसंभवात्तमत्स्यशरीरपरिग्रहस्यागमसिद्धत्वादविरोधः । दृश्योति । स्वात्मपरत्वाल्लना
दैनपदस्य द्व्यपरत्वं । विरोध इति भगवान्वशात्तरहव्यापारनिरस्यात्तत्परिहारः पेशलमिति । पेशलं कोमलं । सततं त्वितत्वमिति च पर्या
यः मलयजरसस्पंदनद्रवः विरोध इति पेशलपरुषपदयोः स्वप्रवृत्तः अवतार्थकतया दहतिपदस्य संतापार्थकतया च तत्परिहारः
स्रवत इति । हरपते । शास्त्रतोऽज्ञायत इत्यर्थः । क्रौंचेति । अतिमहद्भिः पाषाणैर्दृढो यस्य वारणानामनर्गलं अभिघातैर्विध्वंसनानतत्त्वं च
त्यातेरति । नवपद्मपत्रपुंजकोमल इत्यर्थः । विरोध इति । भार्गवमहिम्नाऽभिजातपदस्यानुभवेद्यत्वपरतया परिहारः यद्यपि कुमा
रः क्रौंचदारुण इति कोशात्स्कंदेन त्वेव प्रसिद्धं तथापि स्कंदसहायार्थं भार्गवोऽपि तत्कृतवानिति पुराणेषु प्रसिद्धं । विरोध इति । विरहवै रामं १५९
क्लिष्टेण कालभेदान्न तत्परिहारः अयमिति । स्वीयकरचुलुकगर्भगतं । कोटरोगर्भः विरोध इति अगस्त्यतपःप्रभावातिशयेन परिहा

रः न द्रवोऽस्ति किं तु जातीत्यर्थः एतेनासंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनमित्यसंभवालंकारोऽत्रेति परास्तं। न ह्युक्तो विरोधपरिपोषक
त्वात्। समदेति मत्तगजमदजलप्रवाहनदीसंबंधात्। शिवस्य कंठजटासमूहजातत्वं वर्धिनी आपगा गंगा। कालिंदी यमुना। विरोध
इति कालिंदीपदस्य श्यामाभामात्रपरत्वात्परिहारः इति विरोधः। १३ स्वभावेति। डिंभादेरित्यनेनैव संबंधावगतेः स्वशब्दोऽन्ययोगव्यव
च्छेदक इति भावः। स्वपदेनेति अजहत्स्वार्थलक्षणयेति भावः। अत्र चमत्कृतिहेतुत्वमलंकारसामान्यलक्षणप्राप्तं तेन पशुपवा
यं वलीवर्दो घासमत्ति मुखेनेत्यादेर्निरासः साधारणस्वभाववर्णनस्य स्फुटत्वान्नालंकारत्वं। असाधारणस्तु लोकसिद्धोऽपि क
विमात्रवेद्यत्वादलौकिकवज्जात्यलंकारः। डिंभः शिशुः। आदिना युवतिमुग्धकातरतिर्यक्भ्रांतहीनपात्रादिसंग्रहः। एतामेव जा
तिरिति केचिद्व्यवहरंति। पश्चादिति। पश्चादंघ्री पश्चिमपादौ प्रसार्य त्रिकं पृष्ठवंशः तस्य नत्या विस्तृतमंगं उच्चैरिति शेषेण द्राघयित्वा
दीर्घं कृत्वा आभुग्नकंठो वक्रग्रीवः उरसि मुखं संयोज्य सटा ग्रीवाकेशा विधूय कंपयित्वा तेषां ग्रासवांछया अनवरतं निरंतरं चलं
तौ प्रोथतुंडइवोष्ठाधरौ अग्रोष्ठाग्रेना यस्य अश्वेति पश्चादित्यादिना संस्थानस्य घासग्रासेत्यादिना क्रियाया इत्यर्थः। इति स्वभावोक्तिः
१४ रूढिः पर्यवसाने। अन्यथा। एतेनोनिद्रायां वा। मुखे इत्यनेन पर्यवसानाभावेऽवद्द्वाधितत्वमभिप्रैति। अत एव नास्या ध्वनित्वं। तत्र
हि निर्वाधेन वाच्येन व्यंजनयार्थांतरावगतिः। न चैवं प्रकृते बाधेन लक्षणाप्रसरात् उपक्रांतं वक्तुमेव नाम्ना दिव्यत्त इति बोध्यं। ह्रियेति। अ
वरोधहीनमनसां मूर्धन्यस्त्वदपरो न। लज्जा अन्यत्वं चलत्वं विनानान्यत्र उभयत्र हेतुमाह यद् इति। मुखशशांकैः मुग्धादिप्रकारशतैः रात्र

३.

१६० का॰टी॰ आक्षिप्तत्यागरूपनिंदाव्याजेन महादातृत्वेपि लक्ष्मीवत्त्वाभिधानात्स्तुतिः हे इति हेलया लीलया जितो बोधिसत्त्वो येन· अतिका
160 रुणिकानामपि जेतरित्यर्थः परार्हितप्राधानेपरहितकरणे· मरुदेशे नरैकाकिना निर्जलत्वात् तृषितानां यथोपकाराभाववज्जन्मायशोभा
रो गृहीतः त्वयापि क्षारजलत्वान्न भारं गृह्णता तावत्तस्य साहाय्यकेनोपकारः कृत इति स्तुत्या तृषितानां यथा नुपकारेण निंदायां पर्यवसानं·
नवात्राप्रस्तुतप्रशंसैवास्तु· स्तुतिनिंदात्मकतया विच्छित्तिविशेषात्· कार्यकारणभावादिसंबंधाभावाच्च· अस्तु व्यंजनाविषयत्वाभा
वाच्च· ननु स्तुत्या निंदायाः कथमलंकारत्वं· वाच्यानुत्कर्षकत्वात् इति चेन्न· वीभत्सहास्यान्यतररसालंबनत्वाविघ्नस्य तद्रसानुत्कलो
त्कर्षकत्वस्य सत्त्वात् इत्याहुः अन्यस्तुत्यान्यस्तुतेरन्यनिंदयान्यनिंदाया अन्यनिंदयान्यस्तुतेर्गम्यत्वेपि एषा स्तुतिपदेन बोधनस्य
बोधनात् निंदादीनां व्यंग्यत्वेप्यलं इति व्याजस्तुतिः ३५ एकार्थाभिधायकं एकान्वयार्थाभिधायकं अनेकेति· अनेकान्वयार्थाभिधा
यकमित्यर्थः अत्र सहशब्दार्थः साहित्यं· एककालीनैककालिकक्रियाद्यन्वयित्वसमनियतं· पुत्रेण सहागत इत्यत्र३जियोगिकसाहि
त्यवानागत इति शाब्दबोधः तेन पुत्रकर्तृकागमनसमानकालिकसमानदेशागमनवान् पितेति मानसो बोधः तत्र तृतीयान्तस्य विशेष
णतया गुणत्वं· प्रथमान्तस्य विशेष्यतया प्रधानत्वं· एवं च प्रथमान्ते आगमनस्य शाब्दोन्वयः तृतीयान्ते तु सहार्थसामर्थ्यादार्थः एवं च य
त्र गुणप्रधानभावावच्छिन्नयोः शाब्दार्थमर्यादया एकधर्मसंबंधस्तत्रायमलंकारः समुच्चये तूभयत्र प्राधान्यं शाब्द एव चैकान्वय इति राम॰
ततो भेदः चैत्रमैत्रौ सह गच्छत इत्यादावपि तथैवेति नायमलंकारः हृद्यत्वं चालंकारसामान्यलक्षणप्राप्तं· तेनानेन सार्धं विहरांबुराशे १६०

३.

ल्पादोनेयं । इद्धं तं वाप्याः स्रोतःमित्तिका भेदाध्यवसानात्मकेन केवलाभेदाध्यवसानात्मकेन वातिशयेनाल्पज्ञाताने भवतीति बोध्यं ।
सह दिवसनिशाभिर्दीर्घाः श्वाससंदंशा सह मालिवलयैर्वाष्पधारा गलंति । नवसंभग वियोगे तस्या उद्विग्नायाः सह तनुलतया दुर्बलाजी
विताशाः दंडाकाराः श्वासाः श्वाससंदंशाः वाष्पो नेत्रांबु । अत्र दिवसनिशादौ दीर्घत्वं दुःखदायित्वादौपचारिकं । इयं धर्मयोरभेदा
ध्यवसायमूला । इति महोक्तिः १६ विनोक्तिरिति । अत्रापि विनाशब्दार्थ एव विवक्षितः तेन नञ् निर्विअंतरेणाऋते रहितविकल
त्पादिष्वपि योगेपीयमेव । अरुचिरिति । न चात्र शशिसहितैव निशा रमणीयेति महोक्तिध्वनिरेव युक्तः । तत्तन्नस्यैव चमत्कारस्य स
म्पात इति वाच्यं । वाच्यार्थकृत चमत्कारस्यानपलपनीयत्वात् । मृगेति । य एव राजपुत्रः स्त्रीमोहितः कृत्यविकलः स एव तया वि
नाति व्यवहाराभिज्ञः यद्वद्धिः सहृदालिंगितो विषमत्वहृदयः स एव तेन विना विमदपल्लवहृदय इत्यर्थः । इति विनोक्तिः १७ कस्यचि
दानमिति । परकीयस्य कस्य कस्यचिदादानमित्यर्थः । विनिमयपदस्यानैव शक्तेः एवमादाय दानेपि आदानादानव्यवहारः कवि
कल्पित एव न वास्तवस्तनुलंकारत्वाभावात् तेन क्रीणांतियत्र मुक्ताभिर्वदराणि पिकालिका इत्यत्र नेयं । परकीयस्येत्युक्तेः किं
मित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलमित्यत्र नेयं । विनिमयाभावात् लतानामिति । मरुत्संबंधेन लतानां
लास्यदर्शनात् लतादर्शनेन च पथिकानां भ्रान्त्यादिदर्शनाहरत्वं कविकल्पितं । नानेति हस्तारिवीरसन्नाहेन हेत्रपयुद्धेत्वच्छस्त्र
प्रहारान्स्वीकृत्य तद्भयं विरहत्मन्याललिंगनवती सुमतीति तीर्णेत्यर्थः । इति परिवृत्तिः १८ प्रत्यक्षतयेति । अलौकिकप्रत्यक्ष

का॰टी॰ तिसयाप्यपि लौकिकप्रत्यक्षविषयतयेत्यर्थः अभिप्रायो लौकिकप्रत्यक्षविषयत्वेन बोधनेच्छा॰ न चेयं भ्रान्तिः भूतभाविनोर्नैव निर्दे
१५९ शात्॰ अंजनाद्यसत्वेपि तत्कृतशोभाद्यभिप्रायेण तथाप्रयोगाच्च॰ न चैवं स्वभावोक्तिः तत्र वस्तुधर्मो वैचित्र्याधायक इह तु क
161 वेस्तादृशव्यापाराभिप्राय इति विशेषात् आसीदिति॰ अत्र पदे जनं दृश्यमासीत् इति तद्युक्ते लोचने पश्यामीत्यर्थः भाविभूषणोः संभि
यतेस्मा॰ तद्युक्तामित्यर्थः यथाश्रुते आसीदिति पश्यामीत्यन्वये भूतादेर्लौकिकसाक्षात्कारविषयत्वं नोपपादितं स्यात् अंजां
जनभूषणादिकं विनापि स्वरूपवैलक्षण्येन शोभातिशयात्तेषां वैयर्थ्यं ध्वन्यते कश्चिद्भूतत्वादिनिर्देशं विनाप्येष दृश्यते अहं वि
लोकयेऽद्यापि युध्यन्तेऽत्र सुरासुरा इत्यादौ॰ अत्रेदं चिन्त्यं असंबन्धे संबन्धरूपातिशयोक्त्यैव गतार्थोयं॰ प्रत्यक्षासंबन्धेपि तत्संबन्धव
र्णनात्॰ भूतादिवस्तुसंबन्धेपि तत्संबन्धवर्णनाच्चेति॰ साऽनुप्राणिका चेति कश्चित् इति भाविकं २९ हेतोरिति स्वतोऽनुपपद्य
मानार्थोपपादकहेतोर्वचनमित्यर्थः पदार्थतेति यदमप्येकमनेकं चेति बोध्यं॰ व्याप्याद्यनिर्देशान्नानुमानसंकरः श्रोतृधीलिंग
कानुमितिबुबोधयिषया कवेर्व्याप्यादिविशिष्टहेतुबोधककाव्यनिर्माणात् लिंगमनुमानविषयः काव्यलिंगं नानुमितिस्तेन
कविना श्रोतृबुबोधयिषिता किं तु श्रोतृप्रतीत्या दर्पितिषितेति भेद इत्यन्ये व पुरिति॰ कश्चित्कस्मिन्नपि जन्मनि॰ त्वन्नतौ शारीरोत्प
त्तेरभावात् अग्रेप्यनतौ अतनुत्वमेकपदार्थो हेतुः अतनुत्वे च नमन्मुक्त इत्यनेकपदार्थो हेतुः अनमनमपराधे इति॰ यद्यप्यन राम॰
मनमेवापराधस्तयोश्च न हेतुहेतुमद्भावस्तथापि तदिदमित्यस्य सर्वनाम्नो बुद्धिस्थपरामर्शकत्वात्तदुरितविशेषरूपमित्यर्थः १५९

कृतत्वमित्यस्यच लक्ष्मणायानाशनीयमित्यर्थ इत्यर्थः इत्यदोषः श्लाघ्यायीति· मालवधोद्यमद्योरघं तं स्तुतिमाधवस्येयमुक्तिः प्रिय
सख्याः सलीलो योहासस्तत्सहितेन ध्रुवमैः ललितं मनोहरं स्तवाकाव्यत्वादिति साकांक्षत्वादितिभावः विशेषणत्वादिति· विशे
षणीभूतार्थोपस्थापकत्वेन विशेष्यसाकांक्षत्वादितिभावः प्रसन्नेति शिवप्रसादेनजाततत्त्वज्ञानस्येयमुक्तिः हासोपानपरं· तस्याः
शोच्यतेत्यर्थः तत्संस्कारकर्तृभावात तटस्थतयेति· परस्परमनन्वितत्वेनत्यर्थः पर्यवसानमिति· सामान्यप्रार्थस्योक्तस्य प्रामा
ण्यग्रहहेतुत्वमित्यर्थः इहतु साक्षादेवेति तत्तत्पदार्थनिरूपितहेतुतयोपनिबद्ध इत्यर्थः हेतुविभक्त्यादिनेति क्वाचित्कोप
पादः गम्यमानहेतुत्वकस्यैव हेतोः सुंदरत्वेन प्राचीनैः काव्यलिंगतत्याभ्युपगमात· अतएवतुः प्रादुर्भावादनुमितमित्यंशो
नायमलंकार इत्याहुः सामान्यविशेषभावसंबंधानालिंगितत्वेन ततोभेद इत्यन्ये· केचित्तु निर्हेतुरूपदोषाभावः काव्यलिंगं·
हेतुहेतुमद्भावस्य वस्तुसिद्धत्वेन कविप्रतिभानिर्वर्त्यत्वाभावात्तत्र प्रयुक्तचमत्काराभावेनास्यालंकारतायाद्रूपपादत्वाच्च श्ले
षादिसंमिश्रणोपि तत्कृत एव चमत्कारो नैतत्कृत इत्याहुः इति काव्यलिंगं ३० पर्यायोक्तमिति· वचः प्रतिपादनं· स्वरगमनव्यापा
रो व्यंजनाभंग्यंतरं· प्रकारभेदः तेन नपौनरुक्त्यंप्रबने स्फुटितीति· व्यंग्यस्यागूढत्वादितिभावः परावरां· हरेः इंद्रस्य· एकएवार्थ इति विमो
चननिवासप्रीतित्यागयोरेकत्रपर्यवसानादितिभावः तेन चेति· तथा चलक्षणासंगतिः पौनरुक्त्यं शंकतेनचेति· यथेति· येनप्रकारे
णाव्यंग्यंते न रूपेणाभाहेन नोच्यत इत्यर्थः एकस्यैव प्रकारभेदेन वाच्यत्वव्यंग्यत्वयोरविरोधः यथायावककुसुंभजराकुसुमादिरू

का॰टी॰ पाणां रक्तत्वादिना वाच्यत्वेपि तन्नद्वैजात्यरूपेण प्रत्यक्षत्वमेव न वाच्यत्वं तथैवाहापीति भावः नपुनर्यथेति॰ निर्विकल्पके प्रउक्तं तदा
१६२ श्रयगोत्वतदाश्रयचलनतदाश्रया विशकलिताभासंते सविकल्पके तु संसृष्टतयेत्यर्थः निर्विकल्पस्याविशिष्टधीहेतुत्वादिति भा
वः भिन्नत्वेति॰ भेदोऽत्रद्यारनिक्तरूपत्वेन संसर्गग्राहित्वेन च निर्विकल्पकविषयता॰ भेदोऽत्रद्यारनिः परनये॰ तस्याः सविकल्पके
विशेषणत्वेवाप्याभसंते॰ अन्यमते संसृष्टत्वेति॰ प्रकारशब्दो विषयमात्रपरः एवंचयथा निर्विकल्पकस्याविशिष्टज्ञानहेतुमात्रतो
वैलक्षण्यं तथा निवासप्रीतित्यागरूपवाच्यज्ञानस्य मदमुक्तत्वरूपव्यंग्यज्ञानहेतुत्वाद्वैलक्षण्यमितिभावः यद्वा निर्विकल्पके
किंचित्वेन वस्तु भासते सविकल्पके तु तन्नाम जात्यादिप्रकारेणेति नपुनर्यथेत्यादेरर्थः इदमेव भिन्नत्वाविषयकत्वादीति वोध्यं॰
अत्र व्यंग्यमर्यूटंगचादवारुचेति नध्वनित्वं॰ नमस्तस्मै कृतो येन पुधा राहुवधूकुचौ इत्यत्रापि भगवान्नास्तु देवो राहुशिरःछेदकारि
त्वरूपेणास्वासाधारणधर्मेणाव्यंग्यस्ततोपिचारुतरेण राहुवधूकुचवैयर्थ्यकारित्वेन रूपांतरेणाभिहितः केनचिद्रूपेणाव्यंजनया
लभ्यस्यार्थस्यततोपिचारुतररूपेण पदवाच्यतेति लक्षणतात्पर्यात् यद्यपि भगवतः सर्वप्रक्रांतत्वाद्यछद्देनाभिधानाद्वनव्यंग्य
त्वं तथापि व्यंग्यतावच्छेदकरूपेणावाच्यत्वाभावाद्व्यंग्यत्वमेव॰ एवंचप्रकारभेदाद्व्यंग्यस्यैवाभिधाविषयत्वं युक्तं॰ नच प्रामाप्राप्रविवे
कन्यायेन धर्मीशे एव व्यंग्यत्वेन धर्म्यंशाइति वाच्यं॰ धर्मिणः स्वरूपतोऽवाच्यत्वात्॰ यदि धर्मीस्वरूपतः कस्यचिद्वाच्यः स्यात्तस्याद राम॰
पितया॰ औपाधिकभेदेन घटाकाशादिषु भेदप्रतीतिवत्तत्तद्धर्मरूपोपाधिभेदेन धर्मिणोपिभेदेन धर्मिणोपिव्यं १६२

गम्यत्वाच्च॰ एतेन व्यंग्यस्य प्रकारांतरेणाभिधानासंभवात् कार्यमुखेन कारणाभिधानं पर्यायोक्तं उदाहरणे राहुवधूकुचवैफल्यमह
पेणकार्येण राहुशिरश्छेदः कारणरूपो गम्यत इत्यलंकारसर्वस्वोक्तमपास्तं प्रकाशोदाहरणाविरोधाच्च॰ यत्तु पर्यायोक्तं त
द्यत्कार्यव्याजेनेष्टसाधनं यथा युक्तं भोजयितुं यामि युवाभ्यामास्यतामिह अत्र नायिकां नायकेन संगमय्य युक्तभोजनव्याजेन निर्ग
छन्त्या सख्या तत्त्वाछन्दरूपेष्टसाधनं पर्यायोक्तमिति तत्तु ध्वनिमर्यादां नातिशेत इति दिक्॰ एवं चानापि देशः कतमस्त्वपाद्यवसे
न मुक्तस्य देशं गमनस्येत्यन्तप्याययमेव॰ अयं देशो लंकार्ये अयं इत्यादौ चेत्यलं इति पर्यायोक्तं ३१ उदात्तमिति महत्तां चोपलक्षणा
मितिवक्ष्यमाणानयानपुंसकानपुंसकयोरेकशेषः वस्तुनः धनशौर्यौदार्यादेः एतेन शौर्यादेरत्युक्तौ अत्युक्तिर्नामा पृथगलं
कार इत्यपास्तं॰ अद्यासंबंधे संबंधातिशयोक्तिरत्तु प्राणिका॰ मुक्ता इति बाला षोडशवर्षा समृद्धियोग इति॰ तेन वर्णनीयन्नृप
तेः समृध्यातिशयः सौधाग्रारिणीपुरस्त्रासामस्य शांतिविधुमंडलमित्यादौ पौरसमृद्धिवर्णनेति व्यंग्यपोर्ये॰ वर्णनीय इति अंगिनी
त्यर्थः तदिदमिति॰ पुष्पकविमानस्य स्थलक्षणास्यांगदं प्रतीयमुक्तिः महत्वं च रामस्य दशरथाज्ञावशात्त्यक्त्वाज्यस्यागपूर्वक
वनवासात् वाङ्मात्रसाहाय्येन सकलरक्षःक्षयकरणाच्च अत्र दंडकारण्यस्यांगित्वं रामस्यांगत्वं॰ ईदृशो रामो यत्र स्थित इ
त्यरण्यस्याधिक्यं॰ उदात्ताद्दातिशयस्त्वेति॰ वीरप्रधानस्य रामस्य वाङ्मसहायत्वेन तदतिशयप्रतीतेरक्षःक्षयस्यानुभावस्य प्रती
तेश्च ध्वनित्वं स्यादिति भावः अंगत्वादिति अंगोत्कर्षकत्वादित्यर्थः अंगांगस्य वाच्यप्राधान्यान्न ध्वनित्वमिति भावः रामविषयक

ज

का॰टी॰ इति भावस्याप्यपरिपुष्टत्वान्न भावध्वनित्वं इत्युदाहृतं ॥ ३१ ॥ इति विशेष इति । समाधौ हि एकेन कार्ये निष्पाद्यमानेऽन्येन कस्मादापति-
१६३ ता सौकर्यादिरूपातिशयसंपादनं । इह तु एककार्यसंपत्तौ सर्वेषां खलेकपोतन्यायेन पातः कार्यस्य च न कोप्यतिशय इति भावः
काव्यलिंगे हेतुत्वमात्रं विवक्षितं न तु हेतूनां गुणप्रधानभावस्यैकत्वानेकत्वस्य वा चिंता । अत्र तु एकस्यैव तत्कार्यकारित्वेऽन्येषां
163 साहाय्यमात्रमिति ततो विशेषः दुर्वारा इति । त्वं त्रितयविशिष्टप्रतिवाका चिह्नदति । दूरे । प्रवासात् । गाढं अतिशयितं । कुलनैर्मल्यात्स्वा-
छंद्याभावः नन्वेवं धैर्यमेव कार्यमत आह स्त्रीत्वमिति । मन्मथसुहृत् । विरहिणीपीडकत्वात् । कालः वसंतः अक्षमः मारणे । क-
रिति । नाशकत्वात् । अचतुराः नायकादिघटनाऽसमर्थाः शठः पीडादायीति विरहविशेषणं । शठेति विशेषसंबोधनं वा एव-
गिति सद्योगसमुच्चयत्वादिनेत्यर्थः कुलमिति निर्मलं कुलं सुंदरता । वेदादिज्ञानं । अतिशायितं बलं । लक्ष्मीरृद्धिः अकुंठप्रभुत्वं ।
दर्पोऽहंकारो यथाप्रवर्त्तकः अंकुशाः खलत्वनिवेधकाः कुलादीनां प्रकृतिसुभगत्वेन समीचीनत्वं । अत्र निर्मलकुले दर्पजन्मभावहे-
तौ सत्येव मदमूर्च्छादिकमपि तत्त्वेनोपात्तं । एवं स्मरमार्गणादीनां विरहिणीदुःखदत्वादसमीचीनत्वं शशीति । शशी स्वरूपेणास-
न्नपि दिवसधूसरत्वेनासन् । एवमग्रेऽपि । एवमत्र सदसतां शशपादीनां योगः अत्र सदसतोर्योगः दुर्जनस्यासत्वात् शशपादीनां सत्वा-
दिति । इदं चिंत्यं एवं हि सहचराभिन्नतास्यात् । सर्वत्र विशेष्यस्य शोभनत्वविशेषणस्याशोभनत्वं च प्रक्रांतमिति भग्नप्रक्रमतास्या- राम॰
त् । तस्मात् नृपांगणगतखलसंयुतमिति पाठो युक्तः सदसदिति च कर्मधारयो युक्तः अत्रैकैकमपि मानसशल्यभूतज्ञानजनने हेतुस्तत्रा १६३

ज

न्यदपि चक्षुष्मत्त्वमिति लक्षणसमन्वयः पूर्वमिति प्रियतमः शोभनोऽपि दूरस्थत्वदोषेणाशुभ इत्यर्थः चिंतावीजं तत्र एकस्य तथा
त्वेऽपि मार्गणत्वयोर्वंशत्वनाकेवलानामपि विरहिणीदुःखदानां सत्त्वमिति सम्भवद्योगोदाहरणमेव तदिति· उक्तोदाहरणेषु सतां यो
गस्यासतां योगस्य सदसद्योगस्य वानुरूपत्वस्यानुरूपत्वस्य वा ॥ उत्तीर्णेर्समस्य विषमस्य वालंकारस्यात्र प्रसंग इति दिक्· विशेषविवक्षा
विरहे गौणेति· गुणत्वक्रियात्वरूपविशेषेत्यर्थः केचित्तु गौणे च क्रिये च गुणाः क्रियाः गुणाश्च क्रियाश्च गुणक्रियेत योरेकशेषेणावक्ष्यमाण
र्थलाभ इत्याहुः· युगपदिति क्रमव्यावृत्त्यर्थः अवेति· तयोराश्रयभेदेन चाभावं समुच्चय इत्यर्थः एकपदेऽकस्मात्· अनेनेति अनाप्या
श्रयभेदः वैयधिकरण्ये एवेति· आश्रयभेद एवेत्यर्थः इति समुच्चयः ३३ समुच्चयेति· वक्ष्यमाणविशेषालंकारद्वितीयभेदवार
णाय चेत्यपि बोध्यं तत्र योगपद्यसत्त्वादिति भावः नन्विति· आश्रयास्थितिः आश्रयणारीतिः विशिष्टयदाविशिष्टाधिकरणा· अ
न्नाधारभेदाद्भिन्नाधेयएकत्वेनाध्यवसितः श्रोणीति· श्रोणीभागादीनां प्राथमिकाधारत्वमार्थमेवतेद्वृत्यनेनमध्ये पूर्वमतनुता
सन्नाभोधिता एवमग्रे पिञ्चत एवावि विनिमयः संगच्छते तनुताकार्श्यं· तरलगतयः चंचलगतयः चंचलदर्शनं च· कुचसचिवतां· सद्वि
तीयतां· धत्ते इत्यनेन तस्मिन्भागद्वितीयत्ताया अस्थिताया वक्रेणारहीतेति बोधितं· मुखे द्वितीयत्वं निरूपमत्वं वक्त्रे द्वितीयराहित्य
तयोश्चाभेदाध्यवसायः कुचसाचिव्यवक्रत्वेनैव मुखस्य निरूपमत्वं· अत्र तनुत्वत्यागादिना तन्नेत्रोत्कर्षाभिव्यंजनयोगो ध्यते· बिंबोष्ठए
वेति· न चैकसंबंधनाशोत्तरमपरमपरसंबंधे सत्येव लोके पर्यायप्रसिद्धेः कथमिदमुदाहरणमिति वाच्यं एकमनेकस्मिन्क्रमेणोत्येवल

का॰टी॰ रूपणात्॰ शाहूणाम्यमात्रेणालौकिकार्थाविवक्षणात् एतेनात्र वर्धमानालंकारः पृथगित्यपास्तं॰ तत्रैषां श्रीमहोदररत्नाभरणोत्स्न
१५८ दयमेकरसं विंबाधरे प्रियाणां निवेशितं कुसुमवाणेन॰ श्रीमहोदररत्नेकौस्तुभसदाभरणोहरौ॰ एकरसं तत्परं॰ कामेन प्रियाविं
बाधरे चुंबनाद्यासक्तं कृतमित्यर्थः केचित्तु पदस्थराणां हृदयं विजिगीषाज्वलनजाज्वल्यमानं श्रीमहोदररत्नानामासमंतात्तद्धरणो
164 त्सुकमासीत् तत्तत्स्तुकुमारतरोपकरणोपि कामेन प्रियाविंबाधरे निवेशितं सकलरत्नसारतुल्यो बिंबाधर इति तेषामभिमानोत्प
त्तेरेवं च वंशाजोपमात्रेत्याहुः तन्मतेपि हरणस्यैव विषयिकाधारत्वात्पर्यायोक्तिरेव अत्रापिक्रमेणोति सत्तु च्छ्वरवारणाय॰ मधुरि
मणा रुचिरं अथमोहहेतुं तदेवांतर्गतं विषं कथयतीवेत्यन्वयः नतभिन्नित्यवं॰ दिवःस्वर्गात लब्धावकाशं॰ मंदिरं॰ राजयोग्यं
गृहं दिवमेनं तु मासेवे षैर्वीदानं॰ स्वीयवस्तुसमर्पणं॰ उपादानं परकीयवस्तुग्रहणं इति पर्यायः २४ साधनमिति॰ एतत्रू
पत्रयविशिष्टो हेतुः साधनपदेनोच्यत इत्यर्थः व्यापकत्वाभिमतस्येत्यस्याय स्येत्यादिः साध्यमित्यस्य तदित्यादिः व्यापकसं
बंधो व्यापकाश्रितत्वं॰ तत्तु भयेति कविप्रतिभोल्लिखितेत्यादिः चलाचलाः अतिचंचलाः चलाचलेति पाठे चंचलपांग चक्षु
ष इत्यर्थः व्यापारयंति वक्रीकुर्वंति॰ यत्र पुंसि॰ अग्रतः पुरः अत्र पूर्वार्धे संततनिपतत्तन्मर्मभेदिबाणाकलमत्र व्यापारस्था
नकत्वं साधनं पक्षश्चेति त्वेनोक्तं॰ परार्धे साध्यं यत्र ज्ञाव्याप्तिः सूचिता॰ तत्र वस्तुतो व्याप्यमत्त्वेपि कविप्रौढोक्त्या तथाभिधा राम॰
नं॰ अत्रानुमानमित्यत्र भावे ल्युट्॰ तेन जायमानानुमितिरत्रालंकारः साच मत्येशंकेवेमिजाने इत्यादिगा च कोपादाने वाच्या॰ १५८

यत्रलिंगलिंगिनोः सत्वतत्रतेवाम ऊमितिबोधकत्वात् यत्रस्मादृशणादिनिमित्तमज्ञावस्मजोत्येज्ञावोधकत्वं॰ वक्ति कथयतीत्यादि
लक्ष्णकपदोपादानेलक्ष्या॰ उभयानुपादाने साध्यसाधनताभ्यांतदाक्षेपप्रतीयमानेतिबोध्यं॰ नचितिएवंचानयाशीन्यारनुमान
स्य हेतुविध्यं वक्तुमुचितमितिभावः माद्यिति॰ त्वदिहाल्ला हलमेवकेवलं॰ अतएवनिपीयतेधरो हृदयं मुष्टिभिरेवतापतेड्ग तिपादत्रयं॰
तादृशेति॰ कार्यकारणयोर्वैपरीत्येन दितिकार्यकारित्वप्रतीतिरूपवैचित्र्यवदिहतथाभावाभावात् तन्नविशिष्टोक्रममिति भावः
यत्तु केनचिदर्थेनोक्तेन तल्पकारणत्वाद्दृष्टांतरस्यापादानमर्थापत्त्यलंकारः यथा मजितस्तनमुखेनेन्दुः कावान्नां सरसीरु
हां तवाग्रे यदिदारिद्र्यं स्थितं भूपद्विजन्मनां॰ शनैः सवितरप्येतमः स्थास्यत्यसंशयं॰ नेयं वा क्वचित्संमताऽर्थापत्तिः आपादक
स्यार्थस्यापतितमर्थं विनानुपपन्नेरभावात् असंचार्थान्तरं लोकेऽविद्यमानमपि कविना कल्पयतीति मया कल्पयित्वा यथापाद्यतेतदा
लंकारत्वं ते नोदुंबरफलानीव ब्रह्मांडान्यन्नियः सदा॰ सर्वगर्भोपदृः कालस्तस्य के मशकावयामित्यादौ नायमलंकाइति तत्र॰ आ
पादाहरणेऽनुमानस्य संभवात्॰ द्वितीये यद्यार्थान्तिशयोक्तेः सत्वात् सा च द्विविधा॰ आपाद्यापादकयोरुभयोरपि सुसंभवि
त्वेन कविकल्पिततया॰ आपाद्यमानस्यैववैतत्स्यापि स्तुवचत्वात् निर्णीतं तु शाक्यमस्तीतिमध्येतवनितं गिनि॰ अन्यथानोपपद्ये
त[illegible]पयोधरमरस्थितिरित्यर्थापत्तिस्त्वनुमानमेवेति दिक्॰ इत्यनुमानं॰ उक्तिःपरिपुष्टिः अर्थाद्विशेषस्येति विशेषणानां परस्प
रनिराकांक्षत्वादिति भावः साभिप्रायत्वं प्रकृतार्थोपपादकचमत्कारिव्यंजकत्वं महोजसइति॰ तेजस्विनो मानिनः धनैः पूजिताः

का॰टी॰ १६५ 165

रसोपपादकीभूयः न संहताः न परैरुपजप्ताः परस्परमेकमत्यमापन्ना इत्यर्थः तस्यापि दयाणि प्राणोऽपि कर्तुं वांछनीत्यन्वयः आदीति· मा
नमगमीकृत्योपकृतत्वमुद्दोतन्त्रकृत्वकार्यकरणात देकप्रयोजनापेक्षित्वान्मादिपदार्थाः तेनापंडुर्जयइतिवाग्यं· वद्धृतामिति· वि
शेषणेनेतिविकृत्वविवक्षितमित्यर्थः तादृशेकेति· अखिलावगाधजलाशयतस्याहाहंतमीननयनायाः हरस्येत्यपि किंवा कथया
मे विस्तरेणालमित्यादौ अनुभवसिद्धत्वादिति· यथानित्ये संध्यावंदनादौ दोषाभावस्यांगवैकल्येपि सिद्धौ सांगतत्करणं फलाति
शयायैव तथा दोषाभावस्य विशेषणाननुपादानेपि संभवेन साभिप्रायैकविशेषणानिबंधनस्त्रमत्कारोनुपपन्न इति भावः किंवस्तु
धांशुकलितोत्तंसस्यायं हरन्तुवः शिवइत्यादौ यत्र सुधांशुकलितोत्तंस इति विशेषणाभावेपिता पहरणासामर्थ्यस्य सामर्थ्याति
शयेनाप्युपपन्नत्वात् विशेषणानुपादानेपि न क्षतिस्तत्र तद्विशेषणोपादानमधिकचमत्कारायैवेतिबोध्यं अत्रत्स्य वंगं च क्वचिद्वाच्य
सिद्ध्यंगं क्वचिदपरांगमितिगुणीभूतव्यंग्यमेव· अत्र विशेषणैरित्युपलक्षणं विशेष्यस्यापि तेन साभिप्राये विशेष्ये प्ययं· यथा च
तुर्णां पुरुषार्थानां दाता देवश्चतुर्भुज इत्यत्र· अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भं· वाक्कलकल्म
कर्मत्युक्तं तत्करणात्युक्तं विशेषणाशब्दयोरेकशेषेण· उक्तिरित्यस्यार्थं कथनमित्येवार्थः एतेन साभिप्राये विशेष्ये परिकरांकु
रनामामिनोलंकार इत्यपास्तं· इति परिकरः ३६ कथंचित्· लिंगादिना· केनापि· कपरेन· प्रकृताप्रकृतयोरिति इदमुपलक्षणं राम॰
तत्रोपमेयनिषेधपूर्वकमुपमानव्यवस्थापनं अत्र तु किंचिदनिषिध्यैव निमित्तांतरमुक्त्वा वक्तुर्नोनिमित्तांतरप्रयुक्तत्वज्ञापनमित्य १६५

पिरोध्यं· शैलेंद्रेति· प्रतिपाद्यमाना· दीयमाना· नुपगूढं संबंधः रोमांचादि· आदिना कंपः विसंष्ठुलो व्यग्रहस्तः स चासौ अखिलवै
वाहिकक्रियाभंगाकुलः· हा इत्याश्चर्ये· शैलांतःपुरेऽस्त्रीजनैः मातृमंडलं शच्यादिगणास्तैर्नगरागानेद्यादयस्तैर्दृष्टेत्यर्थः· अत्रेति
पार्वतीकरस्पर्शजन्यरोमांचादेः शैलेंद्रस्पर्शजन्यत्वप्रतिपादनादेति भावः· सात्विकाभ्यां रतिभावानुभावाभ्यां गूढा वरतिः पा
र्वतीविषया· शैत्येति शैलेंद्र शैत्येत्यर्थः· गोपनपदेन गोपकव्यापारमात्रं न तूक्तिरेव· तेनायांतमालोक्य हरिं प्रतोल्यामाल्याः पु
रस्तादनुरागमेकारोमांचकंपादिभिरुच्यमाने भामान्तु गूहप्रागामत्यैतन्मित्यादावप्ययमेव· अत्र व्यंग्यस्य गुणीभूतत्वे एवा
यमलंकारः· तेन सखि पश्य गृहाराम परागैरस्मिन्नसरेत्यादौ ध्वनित्वमेव· एतेन गूढोक्तिरम्भोदेशंपचेद्युदन्तप्रातिकथाने इषायेदि
परक्षेत्रादायाति क्षेत्ररक्षक इति सूक्ष्मोक्त्यलंकारः परास्तः तस्य ध्वनित्वाक्रांतत्वात् क्वचिद्गुणीभूतव्यंग्यत्वात्· अलंकारत्वं तु
नोचितं उपस्कारकत्वाभावात् प्रकृते शिवविषयकभावोपस्कारकत्वं स्पष्टमेव· एतेन गगनाम्बुजेत्यादौ विहृतोक्तिर्गुसावि
करणरूपेत्यपास्तं· गुणीभूतव्यंग्यमात्रत्वात् वाच्यरसाद्युत्कर्षकत्वाभावाच्च एतेन लोकप्रवादानुकृतिर्लोकोक्तिरिति
गण्यते सहस्व कतिचिन्मासान्मीलयित्वा विलोचने इत्यपास्तं उपस्कारकत्वाभावात्· न च तत्र कोलंकार इति चेन्न कोपि· एतेन छे
कोक्तिर्यत्र लोकोक्तेः स्यादर्थांतरगर्भता· भुजंग एव जानीते भुजंगचरणं सखे इति छेकोक्त्यलंकारोपि परास्तः उपस्कारकत्वाभा
वात्· क्वचिद्ध्वनित्वं गुणीभूतव्यंग्यत्वं वा न निवारयामः गामालिखंती दृष्ट्वा त्यपध्नुः पौ सांकरे लिखत तमत्रापि व्याजोक्तिरेव· अक्ति

काटी· पदस्य व्यापारमात्रपरत्वात्. एतेन युक्तिः परातिसंधानं क्रियया मर्मगुप्तये इति युक्तिनामा ऽन्यालंकार इत्यपास्तं. एवमुत्कर्षाहेतौ न हे
१८८५ तुत्वकल्पनारूपोप्यो टोक्तिः असंबंधे संबंधरूपातिशयोक्त्यागतार्था. संभावनं यदीत्थं स्यादित्यूहोन्यस्य सिद्धये यदि शेषो भवेद्वक्ता
166 कथितास्स्युर्गुणास्तवेति संभावनालंकारो यद्यर्थोक्तौ च कल्पनमित्यतिशयोक्त्यागतार्थः किंचिन्मिथ्यात्वसिध्यर्थं मिथ्यार्थांत
रकल्पनं मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् इति मिथ्याध्यवसितिरसंबंधे संबंधाभिशक्त्यागतार्थेति दिक्. इति व्या
सोक्तिः ३० प्रयोजनांतराभावादिति. अनुवादस्य प्रयोजनसाकांक्षत्वात् व्यावृत्तिरेव प्रयोजनमित्यर्थः नियमोपपत्तिदर्शनं उ
क्तलक्षणाक्रांतत्वात्परिसंख्यैव. किमिति. अत्र किमासेव्यमिति प्रश्नः अन्तिं द्युगंगासमीपं. नान्यनदीसविधं नापि कोलानितंबा
दि. विष्णोः पादयुगं. नान्यदेवस्य. नाप्यंगनादि. पुण्यं. न पापं. दया. न हिंसादि. किं भूषणमिति. आर्यचरितेनशिष्टसेवितं. कौटि
ल्यमिति. अत्र कौटिल्यादेरितराधिकरणकर्तव्यवच्छेद्यं व्यंग्यं. प्रश्नस्य नास्ति. भक्तिरिति. युवतिरूपे कामास्त्रे. अत्र यत्र कविप्रति
भानिर्मिता इतरव्यावृत्तिस्तत्रालंकारता. यथा कौटिल्यं कचनिचये इत्यत्र कौटिल्यादिकं कविप्रतिभया एकीकृतमिति तद्द्वारा
तत्प्रतियोगिकव्यावृत्तिर्निर्मितेति बोध्यं. इति परिसंख्या ३० यथोत्तरमिति इदमुपलक्षणं. यथापूर्वं परस्परं कारणत्वे इत्यपि
बोध्यं यथा भवंति नरकाः पापात् पापं दारिद्र्यसंभवं दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेदिति. अत्र कथितपदत्वे न दोषः प्रस्तुत राम०
पदांतरेण तस्यार्थस्योक्तौ तत्प्रतिभानाभावाद्वैचित्र्यतात्पर्यासिद्धेः उपस्थितशब्दस्यापि विशेषणतया भानांगीकारात् ज्ञितेर्दि १८८५

यत्वमिति · अत्र पद्ये मन्त्रशक्तिमत्वं दोषः जितेन्द्रियत्वं विनयस्य कारणमित्युक्तेः तत्कस्य कारणमित्युदिताकांक्षा यद्यपि उत्तरवाक्ये
न निवर्त्यते तथापि न साक्षाद्देवमयेपि · अस्याः किमुपस्कारकतया अलंकारत्वं कथारीत्या चोपस्कारकत्वमिति चिंत्यं · उत्तरोत्तरोत्तमवस्तु
कारणत्वात्सर्वे एते उपादेया इति ज्ञानं चमत्कारकारणमिति वदंति हेतुमतेति · कार्यकारणभावसंबंधनिबंधनमुद्दिसाशेषाहाध्यव
सानामूलोपमिति बोध्यं · वैचित्र्याभावेनेति कार्यवाचकपदेन कारणाभिधाने वैचित्र्याभावेनेत्यर्थः अविरलेति · अत्र विकाशमदानंद
पदे श्रुतहेतोर्लक्षणं · कोमलानुप्रासेति · कामोद्दीपको यं काल इति भंग्यंतरेणाप्रतिपादनेन पर्यायोक्तसत्त्वाच्च शृंगारोक्तरीत्या तिशयो
क्तेः सत्वाच्चेत्यपि बोध्यं इति कारणमाला ३९ क्रिययेति इदं गुणस्याप्युपलक्षणं · हंसानां सरोभिः श्रीः सार्यते अथ सरसां हंसैः अ
न्योन्यमेवैतेऽस्त्रात्मानं केवलं गुरू कुर्वंति · सार्यते साराक्रियते · प्रकृते शोभाविशेषविशिष्टान्हंसान्प्रति सरसां कारणत्वं · शोभाविशेष
विशिष्टसरांसि प्रति हंसानां कारणत्वं परस्परशोभाजननद्वारेणैवेति भावः परस्परक्रियया परस्परमुपकारजननज्ञानकृतोत्र चमत्का
रः इत्यन्योन्यालंकारः ४० ॥ उत्तरं नाम प्रश्नगम्यजिज्ञासानिवर्तकज्ञानविषयीभूतोर्थः अत्र प्रश्नेति उन्नीतप्रश्नेत्युत्तरस्यापि वा
रुत्वमिति भावः प्रश्नोत्तरान्यतरस्याकृतगर्भत्वे निबद्धप्रश्नेपि सकृदुपादानेन चमत्कारोस्त्येव · किमिति कृशासि कृशोदरि किं तव परकी
यहेतोः तेः अत्र प्रश्नेन प्रतीकारसामर्थ्यं व्यंग्यं · उत्तरेण स्वस्यापाति व्रत्यं व्यंग्यं · आकूतगर्भत्वेत्र उत्तरमलंकारएव नेत्याहुर्नव्याः तात्पर्य
मिति · वाच्यस्य प्रमाणांतरप्राप्तत्वादिति भावः वाच्यएवेति · लोकोत्तरत्वेन चमत्कारिणि वाच्य एव विषमं त्वातिशयप्रतिपादनेनास्य
य

का·टी· यो ऽदितिभावः वाणिजकहस्तिदंताः कुतोस्माकं व्याघ्रकृत्तयः यावल्लुलितालकमुखी गृहे परिसंक्रामति स्नुषा· अस्यामासक्तो मत्सु
१५१ तो मृगयां न करोतीत्युत्तरं व्यंग्यं· इह व्याधोक्तिरियं· एकधर्मी· पक्षः न च तत्स्नुषागृहनिवाससंपद्वत्ति दंताद्यभावे निमित्तत्वेन काव्यलिंगमे
वास्तु· तत्संभवे ऽपि प्रश्नोत्तरपनद्वारेणैव चमत्कारादित्याशयः काविषमा दैवगतिः किं दुर्लभं यज्जनो गुणग्राही· किं सौख्यं सुकलत्रं किं
दुर्ग्राह्यं खलो लोकः प्रश्नस्य सकृदुपादाने उत्तरस्यानेकत्वेप्ययं· किं स्वर्गादधिकं सुखं बंधुसुहृत्पंडितैः समं गोष्ठी सौराज्यं शुद्धवृत्ति
167 सत्काव्यरसामृतं स्वाद्विति एवं प्रश्नोत्तरयोरभिन्नत्वेप्ययं केदारपोषणरतेत्यादौ· एवं प्रश्नहृदयस्यैकोत्तरत्वादावपि· यथा केशवराः
किं चलं वय इत्यादौ उत्तरं ५१ अन्वर्थत्वमिति· यत्तज्जन्यस्वेदादिनेत्यर्थः संदिग्धैः प्रस्तावादिभिः पुरुषायिते श्रमाधिक्यात्स्वेदाधिक्यं·
उत्पन्नं पुरुषायितत्वं· लक्षितं· सखा स्वयमुन्नीतं· अभिव्यंजितं न तु पिकायां· वप्रस्यांतरेणैव· अत्र स्वेदलिंगकस्यानुमितिविषयस्य
पुरुषायितत्वस्य खङ्गलेखालिखनेन द्योतनं· अत्र विषमामप्यनुमानं सूक्ष्मांगं· स्ववैदग्ध्यप्रकाशनद्वारा सूक्ष्मस्यैव चमत्कारि
त्वात् संकेतेति· ईषन्नेत्रार्पिताकूतमिति विट विशेषणं· अमुं भावालंकारमाहुरुद्भटः लक्षकोक्तिरिहालंकारोप्यत्रैवांत
र्भूतः इति सूक्ष्मं ५१ धाराधिरोहितयेति जंबीरश्रियमतिलंघ्य लीलेव व्यानम्रीकृतकमनीयहेमकुंभो नीलांभोरुहनयने धु
ना कुचौ ते स्पर्द्धेते खलु कनकाचलेन सार्द्धमित्यत्रापि सार एव एतेनेदृशे विषये वर्द्धमानालंकारोतिरिक्त इत्यपास्तं· मधुरविक राम०
सितोत्पलावतंसशशिकरपल्लवितं च हर्म्यपृष्ठं· मदजननविभ्रमाचरामा सुखमिदमर्थवतां विभातिरम्यमित्यादौ तत्तनायं काव्य १५७

पर्यंतभागस्य सर्वोत्कृष्टत्वाभावात् अत्र कथितपदत्वं न दोषः प्रस्तुतेऽर्थे नैव सर्वनाम्ना वाऽनिर्देशे प्रतीतिस्थगनात्॰ उत्कर्षः श्लाघ्य
गुणानाम् अश्लाघ्यगुणानां च॰ तत्राद्य उदाहृतः अंत्यो यथा तृणाल्लघुतरस्तूलस्तूलादपि च याचकः वायुना किं न नीतोऽसौ माम
यं याचयिष्यति इति सारः ४३ स्वरूपनिर्वचनमिति॰ उद्दिष्टमात्रे वयसि दृष्ट्वा प्रियतमाधरं भावी लाक्षारसोऽद्येति कामिनो रज्य
ते मनः इत्यत्र कालभेदेऽपि असंगतेरिष्टत्वात् कार्यकारणयोर्वा पर्यविपर्ययरूपातिशयोक्तेश्च एष एव वैचित्र्यकारित्वेन समा
वेशः एवमुक्ता इति भावः प्रसिद्धायाः कार्यकारणस्वभावसिद्धायाः वैलक्षण्यादिति कारणगतं कमप्यतिशयमभिसंधायेत्यर्थः
यस्यैव व्रणस्तस्यैव वेदना भणति जनोऽलीकं तत्॰ दंतक्षतं कपोले वध्वा वेदना सपत्नीनां॰ व्रणक्षतपदयोः प्रक्रमभेदश्चिंत्यः वि
रोधरूपत्वादिति विरोधोऽनुपपत्तिः सा च सहावस्थितयोः सहानवस्थानमिव सहावस्थितयोः सहानवस्थानेऽपि तुल्यानतस्याऽपरो हे
दोष एवेत्याभासतावगमात् तथा च विरोधाभास एवेत्यर्थः व्यधिकरणविरोधस्येति॰ कार्यकारणवैयधिकरण्य एवमुक्तविरोधस्ये
त्यर्थः अत्र येन केनापि प्रकारेण कार्यांशेऽभेदाध्यवसानमप्राणकं॰ केचित्तु लक्षणे कार्यकारणभूतयोरित्युपलक्षणं॰ समा
नाधिकरणत्वेन प्रसिद्धयोर्वैयधिकरण्यनिबंधाऽसंगतिः नेत्रे निरंजने तस्याः शरन्याक्ता वयमद्भुतमित्यादौ निरंजनत्वश्यामत्वयो
रकार्यहेत्वोरपि शुद्धसमानाधिकरणत्वेन प्रसिद्धयोरसंगतिरित्याहुः एवमन्यत्र चिकीर्षितस्यान्यत्र करणेऽन्यचिकीर्षावग
तद्विरुद्धान्यकरणे चैवमेवासंगतिः॥ विषयताघटितसामानाधिकरण्येन चिकीर्षायाः कार्यमात्रं प्रति हेतुत्वात् अधिकरणां

का·टी १६८ 168

तन्भीवेनापि चिकीर्षया हेतुत्वाच्चेत्याह॥ इत्यसंगतिः ४४ इत्यादीति एककारणजन्यकार्यस्याकस्मिककारणांतरसमवधानाद्धि
तं सौकर्यं समाधिरित्यर्थः सौकर्यं च कार्यस्यानायासेन सिध्यासंगासिध्या च बोध्यं · तल्पककृताविरहादिति · घनगर्जितस्याकस्मि
कत्वादिति भावः अत्र कारणांतरयोगात इत्युपलक्षणं · तेनाकस्मादीप्सितार्थलाभस्य वांछितसिध्यर्थयत्नाद्दधिकलाभस्य उ
पायसिध्यर्थयत्नात्ताकृत्फललाभवर्णनस्य च समाधित्वमेव · सौकर्यस्य अनायासेन सिध्यादिरूपस्यैवाकस्मिकत्वादिरूप
स्यापि ग्रहात एतेनेदृशे विषये प्रहर्षणं भिन्नोलंकार इत्यपास्तं अन्यदीयगुणेनान्यत्र गुणावत्ताबुद्धिरूपः अन्यदोषेणान्यत्र दोषव
त्ताबुद्धिरूपो वोल्लासः काव्यलिंगेन गतार्थ इत्याह वक्ष्यमाणसमेनेत्यन्ये एवं कार्यसहवर्त्तितया निर्णीतकारणाभावेपि लेका
र्यस्य स्थितिरपि सौकर्यं · दीपे निर्वापितेप्यासीत्कांचीरत्नैर्महन्महः इति एतेनात्र पूर्वरूपं नाम पृथगलंकारः। विकृतेपि वस्तुनि पूर्वा
वस्थानुवृत्तिः पूर्वरूपमिति तदपास्तं इति समाधिः ४५ योगः संयोगादिरूपः कार्यकारणभावश्च · आनुरूप्यमिति तेन सतोस
तोर्योगो ऽसतासता वा सतो योग इति लब्धं तेन सदसतोर्योगे नायं · अनौचित्यात · समुच्चये सतोरसतोर्वा कारणयोः समुच्चयो अत्र
कारयोरपि तयोर्योगस्यौचित्याभिधानमिति विशेषः नियतविषयमवधावसानं · निश्चयः धातुरिति निकषस्थानं · परीक्षोपल
रूपा · स्मरस्य रूपे दन्नपत्रः कनतपत्रावलंबन इत्यर्थः चित्रमिति · फलस्फातिः फलसंपत्। कार्यकारणभावसंसर्गस्यानुरूप राम०
त्वं कारणानुत्वसमानगुणकार्योत्पत्त्या · यथा मंत्रार्पितहविर्दीप्तहुताशनतनूद्भवः शिखास्पर्शीन पांचाल्याः स्थाने दग्धः सुयोध १६८

नद्गति · यादृशगुणकवस्तुसंसर्गस्तादृशगुणोत्पत्ताविषमं · वडवानलकालकूटदललक्ष्मीगरलव्यालगणैः सहैधितः रजनीरमणो
भवेन्नृणां न कथं प्राणवियोगकारणं क्वचिदिष्टप्राप्त्यर्थं प्रयुक्तात्कारणात्तस्याप्राप्तिश्च · यथोच्चैर्गजैरटनमर्थयमान एव त्वामाश्रय
न्निह विरुद्धितोऽस्मि राजन् उच्चाटनं त्वमपि लंभयसे तदेव मामद्य नैव विफला महतां हि सेवेत्यत्र · यद्यपि स्तुत्या निंदाभिव्यक्तौ तदुप
स्कारको विषमोऽप्यत्रास्ति तथापि वाच्यस्तुतिकृतार्थसमालंकारेण वाध्यते · लंभयसे इत्यंशे तस्य हि कर्मकर्तृत्वे · न च लोकस्थिहायाः का
रणानुरूपकार्योत्पत्तेर्निबंधनं न चारुतावहं वस्तुतो ननुरूपयोरपि कार्यकारणयोः श्लेषादिना धर्मैक्यसंपादनद्वारानुरूपतावर्ण
नेन स्तुतो निष्ठस्यापि तेनैवोपायेनेष्टाभेदसंपादनेनेष्टप्राप्तिवर्णनेन चारुता यान्त्र भवतीति हृदयात् इति समं ४८ कुक्कुलाग्निः करीषा
ग्निः कुंभकारपचनाग्निरित्यत्र अत्रान्यतरगुणस्वरूपतिरस्कार्यन्यतरगुणस्वरूपत्वाद्वैषम्यं सिंहिकेति · राहुमाता सिंही च · अत्रा
नयोर्योगेऽनुचित इति व्यंग्यं प्रसह्यः करोति करस्पर्शमात्रेणेव यशो न तु युद्धापेक्षेत्यर्थः अत्र जन्यजनकनिष्ठयोः पांडुरनीलाख्यगुणा
योर्वैषम्यम् अत्र श्यामत्वगुणविशिष्टात्कारणान्नाहि निरुद्धगुणायुक्तयशस उत्पत्तिः अभेदाध्यवसानलक्षणेन अतिशयेन समवायि
कारणरूपतया स्थिते निमित्तकारणे विषयांशमालंव्यमानो विरोधो विषयांशविमर्शान्निवर्तत इति अत्राभेदाध्यवसायोऽनुप्राणकः
तदुत्थापितविरोधस्वपरिपोषकः इदमेवात्रालंकारत्ववीजं · द्वितीयभेदे इष्टानवाप्तिः अनिष्टाप्तिरिति तेषु त्वेकं च विषमपदार्थः चका
रात् · इष्टं च तस्य सुखसाधनप्राप्तिः दुःखसाधननिवृत्तिश्च · परस्परं दुःखसाधनप्राप्तिः सुखसाधननिवृत्तिश्चेति चतुर्विधं अनिष्टं च तस्य दु

का·टी· खसाधनप्राप्तिः परस्य तु खसाधनप्राप्तिर्दुःखसाधनलाभश्चेति त्रिविधं तत्राद्योदाहरणं सिंहिकेत्युक्तं · अन्येषां कुवलयानंदादौ द्रष्ट
१५८५ व्यम् आनंदमिति अत्र नायिकाविरहयोर्जन्यजनकयोरानंदजननतापक्रिययोर्विरोधः न चात्र विरोधो ऽसंगतिर्वा · विरोधे विरोधि
नोः सामानाधिकरण्यस्यासंगतौ कार्यकारणयोर्वैयधिकरण्यस्य चमत्कारप्रयोजकता ऽत्र तु कार्यकारणयोर्विजातीयक्रियागुण
169 योगस्य चमत्कारितेति विशेषात् उपलक्षणपर इति एवमन्यालंकारस्त्वेष्वपि विभाग उपलक्षणमिति ध्वनितं · संभवंतीति संबंधि
नोर्योगवैषम्यमात्रस्यैव विवक्षितत्वमिति भावः विपुलेनेति पपिरे जगन्ति रे · मदविभ्रमापूर्णा याचक्षुः कोणमात्रेणैव · पपे सादर
मेव लोकनमेव पानं · पानपदार्थयोर्भेदे ऽप्यभेदवर्णनादुदाहरणमिदं · अत्र सागरशयत्वं सागरस्य सकलभुवनग्रासमम्बुत्वेकं विष
मं । एवं यस्य कुक्षिरेव सकलभुवनपानसमर्था तस्य संपूर्णास्त्रीवयविन स्त्रिया एकदेशायानेचापरं विषमं योगवैषम्यादेव चमत्का
रात्र विरोधाशंका · एवं कस्यचिद्गुणेन कस्यचिद्दोषवर्णनं कस्यचिद्दोषेण कस्यचित् गुणावर्णनमपि विषममेव · एतेनात्रोल्लासो
तिरिक्त इत्यपास्तं · एवमिष्यमाणाविरुद्धार्थप्राप्तिरपि विषममेव · तादृशी छया तादृशार्थलाभयोगस्य विषमत्वात् एतेनेदृशस्थ
ले विषादननामालंकार इत्यपास्तं एवमन्यदीयगुणेनान्यत्र गुणाभावस्य अन्यदोषेणान्यत्र दोषाभावस्य वर्णनेपि विषमं · क्वचित
वक्ष्यमाणानद्गुणे ग · एतेनैवंविधे विषये ऽवज्ञालंकारांतरमित्यपास्तं कारणे सति कार्यानुत्पत्तिरूपविशेषोक्तेरेव गतार्थत्वाभि राम०
तितत्वं उदाहरणं चिरंजलनिधौ मग्नो मैनाको नैतिमादं वमित्यादि · एवमिष्टसिद्ध्यर्थमिष्टे विरोधक्रियमाणमिष्टविपरीतयत्नाचर १५८५

णमपि विषममेव। यथा नर्मनिति मंतरेण त्रैलोक्यादपि लब्धुं समुन्नतिं। वाच्यप्रतीतिवेलायां योगवैषम्यप्रतीतेः एतेनात्र विचित्रालंकारः
पृथगित्यपास्तं इति विषमं ४७ वर्णनीयोत्कर्षापेक्षयेति वर्णनीयोत्कर्षं बोधयितुमित्यर्थः विषये। मंव हे। महत्तया वर्णनमिति
अत्र मातुमशक्यतया महत्वेन विवक्षितस्य यशोराशे राश्रितस्य मानकर्तृत्वेन ततस्ततोरपि भुवनत्रयस्याधिक्यमभिधीयमानं वर्ण
नीययशोराशिप्रकर्षे विश्राम्यति। युगांते ति। अत्र जगदाश्रयतया महत्वेन विवक्षितस्य भगवज्जठरस्याश्रयस्य मानाभावरू
पसंबंधात्ततोप्यणीयसोपि नागमजन्यहर्षस्य वर्णनीयस्याधिक्यं चारुताहेतुः अत्र महत्वशब्देन महत्परिमाणातिशयस्य।
तेनाप्यत्र सूक्ष्मत्वातिशयवत आधाराद्धेयाद्वा तदन्यतरस्यातिसूक्ष्मत्वं वर्ण्यते तेनाप्यर्थयथा मणिमालोर्मिका ते यः करे जपव
टाय ते अत्र मणिमालामयी क्रूर्मिका अंगुलीमितत्वादतिसूक्ष्मा सापि विरहिणः करे कंकणतत्त्वे शितातस्मिन् जपमाला
वलंबते इत्युक्त्या ततोपि करस्य विरहकार्श्यं दतिसूक्ष्मता दर्शिता। एतेन दृशो विषये ल्पं नाम पृथगलंकार इत्यपास्तं यत्र आधाराधेययो
रन्यतरस्यान्तनताधिक्यं कविकल्पितं तत्रैवायमलंकारः इत्याधिकं ४८ तमेवेति प्रतिपक्षमित्यर्थः तदुत्कर्षकत्वं साक्षात्तन्निरसना
सामर्थ्यसूचकत्वेन बोध्यं अनीके। सैन्ये। अभियोज्ये। पीडनीये। त्वमिति जितकामसौंदर्यः अनुशयः आक्रोशः यस्येति। कायस्य शरीर
स्य योनिग्रहः शिरश्छेदस्तेन गृहीतो गीकृतो विरोधो येन। यस्य कृष्णस्य। रमणीयकृष्णस्य वक्त्र सदृशाकृतिं। नच भगवद्वैरानुबंधादिवभ
गवद्वक्त्रसदृशमिंदुं राहुर्बाधत इति प्रतीते गम्योत्प्रेक्षैवात्राक्षत आदौ तु शास्त्र पिबेति किमनेनालंकारेणेति वाच्यं। तदपकारासम र्थ

का॰टी॰ ल्लहरीयं पीडयतीति प्रतीतेरेवात्र चमत्कारादित्याहुः इति प्रत्यनीकं ४९ समेनेत्यस्य व्याख्यानिगूहनीयसाधारणेति· स्फुटमुपलभ्यमा
१७० नस्य कस्यचिद्वस्तुनो लिंगैरन्यसाम्यात्स्वभिन्नत्वेनारोपमाणानां वस्त्वंतरलिंगानां स्वकारणानुमापकत्वमीलितं· एवं च हिमाद्रिं
त्वद्यशो मग्नं सुराः शीतेन जानन्त इत्यादावपीदमेव· शीतेन तज्ज्ञानेपि यशःसाधारणलिंगैः श्वैत्यादिभिस्तदनुमानाभावात्· शीते
170 न जानन्त इत्यनेनापि मीलनस्यैव दार्ढ्यं नत्वन्येनेति प्रतीतेः एतेनाद्योन्मीलितं पृथगलंकार इत्यपास्तं अपांगेति· अत्रस्याभावि
केन रक्तारुण्यादिनानिगूहनीयमदसमानधर्मेणावजवतामदोऽभिभूयते· इति मीलितं ५० विशेषणतयेति· विशेष्यतयेत्य
पि बोध्यं· यथा धर्मेण बुद्धिस्तव देव शुद्धा बुद्ध्यानिबद्धा सहसैव लक्ष्मीः लक्ष्म्या च तत्क्षणमेव विसर्वलोकालोकेषु नीता ध्रुवनेषु कीर्त्तिरि
ति· अत्रोत्तरोत्तरविशेषणं पूर्वपूर्वमिति विशेष्यं अत्रैव पूर्वपूर्वैः परस्य परस्योपकारः क्रियमाणो यद्येकरूपस्तदा मालादीपकमु
क्तं प्राक् स्थापनमिति· स्थापकत्वं च स्वसंबंधेन विशेष्यतावच्छेदकनियामकत्वं· अपोहकत्वं च स्वव्यतिरेकेण विशेष्यतावच्छेदकव्य
तिरेकबुद्धिजनकत्वं· वाक्यत्येनेति तत्रैव चमत्कारादिति भावः पुराणि· गृहाणि· यस्यां तरुण्यां इत्येकावली ५१ अन्यादृशस्म
त इति· सदृशोद्बुद्धजन्मान्तरीणसंस्कारजन्यस्मृतेः चिंतादुद्बुद्धसंस्कारजन्यस्मृतेस्तावद्भिन्नदिर्मास्मृतस्त्वपृच्छ इत्यादिष्वधार
णसंबंधज्ञानजन्यस्मृतेश्चेत्यर्थः अंत्याया अपि स्मृतेः संचारितया भूः स्वद्विषयकरतिभावांगतया प्रेयोऽलंकारत्वेनैव चमत्का राम॰
रित्वेनैतदलंकारत्वाभावात्· सादृश्यमूलस्मृतेरेव चमत्कारितयालंकारत्वमिति भावः लहरीभिस्तरंगैश्चलदृशां नायिकानांनि १७०

स्तनाभिकुहरेषु यदंभः प्लाविता न तद्भवैः स्मरत कालिकंठकं स्वानि सहशेः कुहकुहेति स्वानि विशेषैरित्यन्वयः कंठे योगिस्वरूपो गमनैः
कंठाबरभ्रमगर्ज्जा इति कोऽपाततः कृतानामिति कर्मणि षष्ठी इति स्मरणं ५१ दर्शनेन मतीति प्राकरणिकार्थदर्शनोद्बुद्धसं
स्कारजन्याप्राकरणिकस्मृतिजन्यमित्यर्थः अप्राकरणिकत्वेनेति अप्राकरणिकतादात्म्येनेत्यर्थः ज्ञानं निश्चयात्मकं तेन
कौन्तेय त्व सुखं पश्य चन्द्रोऽवेतिन निर्णयः इति संदेहे नातिव्याप्तिः तत्र सत्यं तेनानुभूयमानारोपस्य चिंतादिजन्यस्मृतिजन्यारोपस्य
च वस्तुदासः अप्राकरणिकतादात्म्येनेत्युक्ते मीलितसामान्यतद्गुणालंकारेषु भ्रांतिमात्रमत्रालंकारः सा च कविप्रतिभानिर्मि
तैव तेन रंगे रजतमिति बुद्धेर्नालंकारत्वं रूपकस्थितो च नातिव्याप्तिः ममैव हारलता चिन्तेति विरहादिजन्योन्मादादिजन्यभ्रां
तेरुपनालंकारत्वं सादृश्यप्रयोज्यत्वाभावात् वस्तुतो भ्रमाभावेऽपीति स्वारसिकभ्रमाभावेऽपीत्यर्थः अत्र च प्रवृत्तिनिवृत्तिकारिस्वा
रसिकभ्रमो विवक्षितः इति भावः तयोः कुशोदरीनी सांजनिको भ्रम इति तात्पर्यं वस्तुतोऽयत्र इत्यादिपदेन भ्रमत्वेन निवक्षोव्य
ग्रो नातन्त्रोपमलंकार इति नातिप्रसंगशंकेति बोध्यं कपोले इति पयः इति पयोभ्रांत्येत्यर्थः इति भ्रांतिमान् ५३ अप्रयोजकत
या केमर्थ्येन तिरस्कारफलिको मानव्यर्थतो तिरेकं प्रतीपमित्यर्थः प्रतीपयोगार्थमाह उपमेयस्येति लावण्येति लावण्या प्र
ये प्रतापातिशयसहिते दारस्तु खे भ्रमरगासमर्थेषु जेत्रषास्वर्थः चिंतारत्नं चिंतामणिः अत्रानिषिध्यमानवस्तुगतसकलगु
णप्रतीतिर्व्यंग्यप्रयोजनं द्वितीयेत्विति तिरस्कारार्थमुपमानस्योपमेयत्वकल्पनरूपे इत्यर्थः अविरहिताचन्द्र दरीकरीन्द्रता

का॰ती॰ आगुप्तवचनीयं ॰ नवमुखेन कृशोदरि चंद्र उपमीयते जनेन ॰ वचनीयं निंद्यं ॰ उपमित्व निष्पन्नैरिति ॰ अत एव व्यतिरेकाद्भेदः तत्रोपमिति
१७१ (171) निष्पन्नावप्युपमेयाधिक्याप्रतीतेः अत्र वर्ण्यमुखस्याधिक्यं व्यंग्यं अत्र नलिनानामिति ॰ उपमानत्वेन प्रसिद्धानामित्यर्थः अत्र नेत्रयो
रुपमानत्वेनाधिक्यं फलति ॰ अत्रोपमिति निष्पन्नावपि उपमेयाधिक्याप्रतीतेर्व्यतिरेकतो भेदः त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधु
रित्यपात्रोदाहरणं असदृशत्वेनेति ॰ उपमेयासंभावितत्वनिष्ठासाधारणधर्मयोगादसंभाविते उपमानभावस्योपमानत्वकल्पन
येत्यर्थः हालाहलो हालाहलस्येति अनुत्कटदुःखहेतोरित्यर्थः असोपमातो भेद उपमाप्रकरणे एवोक्तः ५४ इति प्रतीपं अनाहतात्वे
पि ॰ असमानगुणत्वेपि ॰ प्रस्तुतस्य ॰ प्राधान्येन वर्णनीयस्य ॰ गुणसाम्यवितर्कया ॰ गुणसाम्यं प्रतिपादयितुं ॰ ऐकात्म्यं पृथक्त्वे
नाप्रतीयमानत्वं ॰ तेन मीलिताद्भेदः तत्र बलवत्सजातीयग्रहणकृताग्रहणं अत्र तु पृथक्त्वेनाग्रहणमिति विशेषात् ॰ न च भ्रां
तिमतासंकरः तत्र स्मर्यमाणस्यारोपोत्रानुभूयमानस्येति विशेषात् ॰ नापि रूपकप्रथमातिशयोक्तिभ्यां ॰ उपमेये उपमानता
दात्म्यस्य शब्दात्प्रतीते रूपकाभावात् ॰ उपमानत्वानवच्छेदकरूपेणाप्रतीयमानत्वात् नातिशयोक्तिः दंतपत्रं दंतनिर्मितताटंकं
तेउन्नयनं पूर्वकालजातैकात्म्यप्रत्ययनिवेदनं नेत्रेति ॰ यदि भृंगाः सहेलं नायातिष्यन्त दानवचंपकानि को वेदयिष्यदिति नृपः
अत्र गंडचंपकयोर्गौरत्वादेः प्रतीतिः अयेउति ॰ एवं चाग्रेतन विशेषदर्शनजन्याभेदज्ञानमुत्तरकालिकं न पूर्वोत्पन्नज्ञानं नि राम॰
रसितुमुत्सहते उत्पन्नत्वान्नस्येत्यर्थः तत्फलीभूतस्य गंडचंपकयोरत्यंतसमानगुणत्वप्रत्ययस्यानिरस्त्वाद्रश्मिगात्पर्यमेतेनेद १७१

शेः विषये विशेषकालंकारः पृथगित्यपास्तं इतिसामान्यं ५५ ननु गिरामाकाशस्याधारः प्रसिद्धो न कविरत आह किंत्विति सिद्ध
मित्ति सिद्धमपीत्यर्थः गुणागणाः गिरः जगंति कर्म विशिष्टावस्थितिर्निराधारैव · प्रमाधारांतरगतत्वेन धेयवर्णनेप्ययं · यथा गतेपि
रवौ दीपस्थास्तन च्छिंदंति तत्करा इति · सावमतिनवत्हृदये सेवाप्सरोगः सैव वचनेषु अस्माकं हृदये अवकाशः कुत्र पापानां · अतिशयोक्ति
मित्यर्थः आधुनिकोक्तेरपि कवयुक्तित्वोपचारेण हृदयादौ भावनादेर्वमतित्वोपचारेण राज्ञस्ता द्रूप्येण मनोभूत्वाद्युपचारेण च तथो
क्तिरिति भावः नन्वतिशयोक्त्यालंकारोत्र विवक्षितः न स्यात्रासंभवात् · वक्रोक्तिः वक्रतया भाणितयोक्तिः त्रिविध इत्युपलक्षणं · दोषेपि
गुणं दृष्ट्वा तदभ्यर्थनायामप्ययं विपदः संतु नः शश्वधास्तु संकीर्त्यते हरिः एतेनानुज्ञानामा पृथगलंकार इत्यपास्तं · एवं गुणे दोषं दृष्ट्वा
तदप्रार्थनायामप्ययं · एवं किंचित्सौकर्यं दृष्ट्वा दोषस्य गुणत्वकल्पने गुणस्य वा दोषत्वकल्पनेमपि सः यथा नैर्गुण्यमेव साधीयो धिगस्तु
स्त्वगुणगौरवं · शाखिनोन्ये विराजंते खंड्यंते चंदनद्रुमाः एतेनेतादृश विषये लेशनामा पृथगलंकार इत्यपास्तं एवं सूच्यार्थसूचनेमु
द्रा प्रकृतार्थपरैः पदैः यथा नाटकादौ इत्युक्तमुद्राया स्वलंकारत्वमेव न · प्रकृतोपस्कारकत्वाभावात् यत्तु क्रमिकं प्रकृतार्थानां न्या
सं रत्नावलिं विदुः चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते इति तत्र · रूपकेणैवात्र वर्णस्योपस्कारेण तत्क्रमकृतोपि तेन स्यालंकार
त्वाभावात् इति विशेषः ५६ उत्सृज्येति व्याचष्टे तिरस्कृत्येति अभिभवेवस्तुतः स्वगुणत्यागाभावादिति भावः ततो भेद इति · मीलिते
धर्मिण एवाग्रहः सामान्ये प्रतिपन्नस्य स्वगुणस्यैव अपृथक्प्रतिभासः इह तु गुणमात्रस्यैवाभिभवः धर्मिणः पृथग्भासस्त्वेति भेद इत्यर्थः

का॰टी
१७२
172

भ्रांतिमतिस्मर्यमाणस्यारोपोऽनुभूयमानस्येतिभेदः। भ्रांतेर्निर्वहत्वाभावाच्च। विभिन्नेति। स्फुरंत्या रुचेति सर्वान्वयि। वंगकरीरं क्रोम
लवंशाग्रभागः। अत्रद्वितीयं तद्गुणस्वरूपमिति व्यवहरंति केचित्पद्मरागायते नासा मौक्तिकं ते धरत्विषेत्युदाहरणं। एवं परस्मिं निधा
नेन स्वाक्रमसिद्धस्वगुणोत्कर्षोपि तद्गुणविशेष एवेत्यविरोधः। यथा नीलोत्पलानि दधते कटाक्षैरिति नीलत्वमिति। एतेनान्यगुणा
नामापृथगलंकारत्वमपास्तं। इति तद्गुणः ५७ अतद्गुणलक्षणयोगेपीति। पूर्ववान्यस्य योगादित्यस्यानुषंगादिदं लब्धं। धवलोसि
यद्यपि सुंदर तथापि त्वया मम रंजितं न हृदयं। रागभरितेपि हृदये सुभग निहितो न रक्तोसि। निहित इत्यनेन रंजनयोग्यतानकाचिदनुपप
त्तिरिति। गंगायमुनयोरप्रकृतयोर्गुणस्य वर्णपतयाप्रकृतेन राजहंसेनाग्रहणान्न इति भावः। अन्यं तु विशेषोक्तावंतर्भावयंति परे इत्यत
द्गुणः ५८ तेनैवोपायेनेति। तज्जातीयेनैवेत्यर्थः। अत्रद्दशेति। तथा च कार्यवैजात्ये कारणवैजात्यं प्रयोजकमित्यस्य व्याघात इति भा
वः। इदमुपलक्षणं। अन्यकारणत्वेन प्रसिद्धात्तदन्यकार्यनिष्पादनेप्ययं। यैर्जगत्प्रीयंते हंसि तैरेव कुसुमायुधं इत्यत्र। योगार्थमत्वात्र।
अत्र सर्वत्र कारणयोरेकत्वाध्यवसानान्मुखः स्फुरन्निरोधः प्रातिस्विकरूपेण तत्तत्कार्यहेतुताविमर्शान्निर्वहत इति बोध्यं। यदा त्वाश्रय
भेदेनैकस्यैव कारणस्य विरुद्धकार्यद्वयजनकत्वं निबध्यते तत्र नायं व्याहतेर्विरोधगर्भीयास्त्वभावात्। यथैकस्यैव पांडित्यस्य खलहृन्नि
मदजनकत्वं सुजनहृन्निशांतिजनकत्वं च। एवमेकेन कर्त्रा येन कारणेन यत्कार्यं निष्पिपादयिषितं तत्तदन्येन कर्त्रा तेनैव कारणेन तद्विरु
द्धकार्यं निष्पिपादयिषितं चेत्तदाप्ययं। यथा विमुंच मयि दयितप्रियतमेति मां मंदिरे जदा सह नयस्त मां भरणाय यंत्रणायंत्रितः। अथ प्र

राम॰
१७२

कृतिभीरुरित्याखिलभीतिरक्षाक्षमात्रजात्रभुजमंडलादवहितो बहिर्मा व्ययेति । वनं प्रति प्रस्थितं रामं प्रति जानक्या वाक्यमिदं ५९ य
नुतिकृत्क्रियायोगतो मामाप्नामस्यार्थत्वप्रकल्पनं । इह श्लेषसूरिति ज्ञाने सत्वं दोषाकरो भवानिति नियतश्लेषालंकारः सश्लेषविशेषएव । यद्यपि मि
हसेव विधानं विस्पष्टालंकारः पंचमोदंचनेकालेकोकिलः कोकिलो भवत । अत्र द्वितीयकोकिलपदं मधुरस्वनिशालित्वं लक्षयत्
सकलजनहृद्यत्वमनभिज्ञितदपि ध्वनिना गतार्थं क्वचिद्गुणीभूतव्यंग्येन वा न हि सर्वोपि गुणीभूतव्यंग्यप्रपंचश्चालंकारगोष्ठ्यां तं
र्भावयितुं शक्यते वेधसापि । एवं विहितनिषेधानुकीर्तनमपि । एवमष्टौ शब्दालंकारा अत्र दर्शिताः तत्र प्रत्यक्षं भाविकतया नि
बद्धं । अन्यानि तु शब्दानिव चमत्कारि । अनुमानं तु साक्षेपोक्तं अन्येषां तु नालंकारत्वं तत्र स्मरणं जन्यत्वमिति विषयत्वकृत चमत्का
राभावात् तद्रूपेणोपस्कारकत्वाभावात् । उपमानं तु उपमयैव गतार्थमित्याहुः । चमत्कारः अधिकश्चमत्कारः ननु संसृष्टि
नैएथ कृ यथा कामिनीशरीरे कुंडलहारकेयूरकंकणादीनां रत्नेकपोतकया शोभाजनने न विशेषस्तथार्थः समुदायिभ्यः समुदा
यस्याभेदाभावात् अन्यथा लोकेपि भेदापत्तिः तदृश्यैव काव्येषु गुणालंकारकल्पनात् इति चेन्न । तत्र स्वस्वाश्रयमित्रमित्रांगोत्कर्षा
धानपूर्वकं शरीरे वयविनिश्चार्थः शोभातिशयः इह त्वेकांगोत्कर्षकतया संसृष्टिरेव । यथा लिंपतीत्यादौ उत्प्रेक्षया तमसः प्रस्तुत
त्वं प्रतिपाद्योपमया प्रतिगाढत्वोपपादनेन संसृष्टिव्यवहारात् लोके पियत्र वहूनां कंठाभरणानामेकोत्कर्षकत्वं तत्र संसृष्टित्वमे
वांगीकारात् परस्परमनपेक्ष्येति । परस्परं नैरपेक्ष्येणालब्धात्मविश्रान्तीनामित्यर्थः एतेषामिति । वक्ष्यमविवक्षितं तेन द्वयोरपि सं

६

का·टी· ग्रहः भेदेनेत्यनेन संकरमुदाहः व्यवस्थित्वभावमुपपादयति व्यवस्थितेरिति । यथा लिंपतीत्यत्रोत्प्रेक्षालोपनविषया । उपमाऽसमत्व
१७३ रूपसेवाविषया । विषयाभेदादिति अनिश्चये इति शेषः वदनेति । स्फुरत्सौगंध्यलोभेन भ्रमतां भृंगाणां गणः संभ्रमो भ्रमणं तेन चूर्णो ग्रा
173 मया । चूर्णकुंतलैः अंचलदृशा । मधुरोसौ अलाभे विदधे इत्यर्थः लिंपतीवेति । पूर्वार्द्धे उत्प्रेक्षा । उत्तरार्धे उपमा । सतारस्त्वत्र यामेय
एनां महमहं तलावण्यं तरुस्तानं हृदयलुंठि परिसंकूलीनि गारयति महमहं तलावण्यं नवनवीभवल्लावण्यं । परिसंक्रांती
स्तानुरूपरमणीभावादितस्ततो गाढं तौ । अत्र पूर्वार्द्धे एकानुप्रासः उत्तरार्धे हृदयलुंठकीमिति रूपकं । एकवाक्ये इति क्रियायाका
रकाविज्ञेति उक्तेरर्थो व्यवच्छिन्नशब्दस्यैव वाक्यत्वं । तथा चैकं वाक्यमिति प्रतीतिसिद्धमेकत्वमादाय तयोरेकार्थसमवाय इत्यर्थः
वाक्यभेदेप्याह छंदसि वेति । चतुःपादात्मके इत्यर्थः अर्थालंकाराणामप्यत्र परंपरया स्थितिः समवेतत्वं । संबद्धत्वं । आत्मनि ।
आत्ममात्रे । परस्परमिति । कस्यचिदनुग्राह्यत्वं कस्यचिदनुग्राहकत्वमित्यर्थः योगार्थमाह संकीर्यमाणेति । आज्ञे । गृहीते । सी
मंतरत्ने । प्रथमं तत्रैव दृष्टिपातात् । मरकतमिति नीत्यनेन रूढिति विवेचनं शुद्धहेमांदेहकांत्याऽभिभवसंभवात् । तारे कपत्रे कराले का
र्ः लुनायां छिन्नायां । मणितुलाकोटियुग्मे नूपुरे । इत्वरीणां गतिशीलानां । विंबोष्ठकांत्येति । मुखस्यान्मत्वात् । हारं मुक्तानि
र्मितं आत्मानं लभते इति । अक्षरसांनिध्यासादितारूपविशिष्टमुक्ताफलानां दर्शनेन गुंजास्मरणात् भ्रांतिर्भवतीति भावः भ्रांतिम राम.
दपेक्ष्येति । तन्निर्वाहकत्वेनेति भावः एतच्च प्रकृताभिप्रायेण । अन्यत्र तस्य स्वातंत्र्येणापि चमत्कारित्वात् जटेति । जटा तु लताभिः पि १७३

६

गाभिः कांतिभिरुपलक्षितः करोद्गतः किरणास्तैर्धृतः कलंक एव वलयाकारा रुद्राक्षमाला येन विरहिणीडुपेवांगी कर्तव्यदे
राग्यं विगतरक्ततां विषयव्यावृत्तिं च · वियोक्तुं शीलं येषां ते वियोगिनो विषयास्तेषां व्यापत्तिर्नाशस्तत्र विशारदः · पांडुरः शुद्धश्चित्तश्च उ
दयकालिकलौहित्यत्यागात्तथा त्वं · श्वेतत्वान्नारा भस्मेव रूपं कपालचिह्नितस्वरूपे भस्मना पांडुर्भस्मेव पांडुश्च · पितृवनं श्मशानं ·
तत्रांतःप्रतीतेरिति · तद्वृत्तान्ताधारोप एव करधृतकलंकाक्षवलयत्वान्वयादिति भावः शशिवर्णनस्यैव प्रकृतत्वाद् दत्तैव विश्रांतिः
प्राधान्येनेति कलंककृत्वाच्छादनेनेत्यर्थः गुरुत्वात्ययेति · रूपके विषयिताद्रूप्यमारोपितया प्रतीतेरिति भावः श्लेषच्छायेति · करपदश्ले
षेण किरणे पाणौ अभेदाध्यवसायात इत्यर्थः उपचर्यप्रतीतत्वनया इत्यन्वयः साहृश्यसंबंधमूलकलक्षणापूर्वकमक्षवलयता
दात्म्यप्राप्ततथा सतीति · उपमायामप्यसदेव करधृतत्वमुपचर्यतामिति भावः प्रधानत्वेनेति इतररूपानाच्छादितत्वे सति वि
शेष्यतयेत्यर्थः गुरुत्वेपि · विशेषभूतेपीत्यर्थः अमुख्ये · विशेषणे · उपमापूर्वपदार्थप्रधाना रूपकमुत्तरपदार्थप्रधानमिति भावः
एवं कृते तस्मिन्रूपके अक्षवलयतादात्म्यापन्ने कलंके पाणिभिन्नत्वेनाध्यवसितकिरणधृतत्वान्वययोग्यतास्ति उपमायां तु तत्सदृ
शत्वेन प्रतीतौ विषये कलंकत्वविशिष्टे पाणिभिन्नत्वेनाध्यवसितेनापि किरणेन धृतत्वान्वययोग्यता नास्तीति रूपकमेवात्र · एवं
च रूपके पूर्वपदार्थप्राधान्येपि न दोष इत्यवधेयं · राजतीति · इयं नली राजति · कीदृशी अविरतं दानवानां रामः क्रीडाशङ्खो नायस्यां ·
अतिपाती शीघ्रगामी सारावः सशब्दो नदो यस्यां · राजगजनागजप्रथं अतिशयेन पातिरक्षति · किंभूता अविरतेन दानेन मदेन वरा

५

का॰टी॰ श्रेष्ठासारा । स्थिरा॰ नन्दा॰ ननखंडिका॰ चित्रभेदः चित्रनामालंकारः॰ स चात्रानुलोमप्रतिलोमरूपः तेषामाशय इति॰ एवं चानुग्राह्यानु
१७४ 175 ग्राहकसंकर इति भावः एतेन शब्दालंकारयोरयं नास्ति॰ शब्दस्वरूपजयोपकार्योपकारकत्वाभावात् किंतु संसृष्टिरेवेत्यलंकारस
र्वस्वोक्तमपास्तं॰ तस्मादेकेति । मिथस्सहभावातिशये परस्परापेक्षत्वादनुग्राह्यानुग्राहकभावोपीत्यर्थः॰ एकस्य॰ एकतरस्य॰
प्रतिबाधकप्रमाणता॰ व्यवस्थितिः निश्चयः ॥ विरोधात्॰ विरुद्धतात्पर्यकत्वात्॰ यथा गंभीरो यथा रत्ननिर्भरो यथा च निर्मल
च्छायः तथा किं विक्षिप्ता सरसपानीयो जलनिधिर्न कृतः संदेहबीजमाह न्यायदोषयोरिति॰ निरूढा॰ शं॰ निरूढ दिक् निरूढ
प्रणयांश्च अशिशिरांशुना नष्टं तमस्तिमिरं मोहश्च॰ अतिशयोक्तिर्निगीर्याध्यवसानरूपा॰ रूपकमिति॰ निगरणाभावादित्यर्थः
दीपमिति॰ चंद्रबिंबप्रसीदतीत्येतन्मुखं च प्रसीदतीत्यन्वयादिति भावः तुल्ययोगितेति द्वयोरौपम्यस्याप्युपलम्भात्वात्॰ मुख्यत्वे
नेति॰ ज्योत्स्नासाहचर्यप्राधान्यतयेत्यर्थः वक्त्रं एवेति॰ इतररूपाणामाच्छादितत्वेन वक्त्रे इत्यर्थः प्राधान्येन॰ इतराणामाच्छादितत्वेन॰ शशिनीति
ति शशितादात्म्येन प्रतीतेरित्यर्थः तद्धर्माच्छादितेन मुख्यायां हासद्युतेर्हासशोभायाः अन्वयासंभवादिति भावः गौणत्वेनापीति॰
द्युतिपदस्य शुभ्रपरत्वेनापीत्यर्थः रूपकं वक्त्रमेव शशीत्याकारं॰ तावतापि न संदेहनिरासः द्युतिपदस्य शोभारूपमुख्यार्थस्यागौ
णत्वादिति भावः ज्योत्स्ना यथा शशिनः सौभाग्यं वितनोति एवं हासद्युतिः शशिसदृशवक्त्रसौभाग्यं वितनोतीति वाक्यार्थः इंदौ राम॰
विति॰ इंदुतादात्म्यप्रतीतावित्यर्थः साधकतामिति॰ अपरत्वस्य शब्दापेक्षित्वात्स्वरूपभेदो रावणकत्वेन रूपकसाधकत्वं॰ ननूपमा १७४

५

यां वक्त्रत्वेनैव मुखप्रत्ययेशीतांशावपरत्वं आह न तेन इंदुं तरस्याप्रतीतेरत आह इंदुं समानगुणो इति · कथं चिदेव मर्थ्यं घटनासंभ
वेन वक्त्रप्राधान्ये प्रातिकूल्याभावात् उपमायां न बाधकमित्यर्थः एवं चानयोरुदाहरणयोर्यत्कोटेः साधकमस्ति तत्कोट्यंशे संशय
स्याकृतत्वात् संकरलक्षणो चतुल्यकोटिकसंशयस्याविवक्षणान्नात्र संकर इत्याशयः न तु रूपक इति · एतद्धि जमये स्फुटं कंबुजे · त
त्वेन प्रतीते विधुमुखमदीतिसमविरोधिकोऽभिभूतविधुपमदीत्यर्थः उपमासाधकमित्युक्तेः किंचिद्रूपकस्यापि साधकं स्यादिति संदेहो
नापैति बाधकेत्वभिहितेन तद्व्यवच्छेदप्रतीतेः संदेहोच्छेद इत्याशयः एवमितियस्या निशंदिविषदक्षुररणाररविंदमुन्नेसपंजमितमक्षि
भगवन्नसा इत्यादौ उन्नसनमुपमाबोधकमिति विबोध्यं · तृतीयसंकरमाह · स्फुटमिति · स्फुटमित्यनेनास्फुटालंकारद्वयसंसर्गस्य
नालंकारत्वं · वैचित्र्यानाधायकत्वादिति सूचितं · स्पष्टमुल्लसंतः किरणा एव केसरं यस्य ताहशं सूर्यबिंबमेव विस्तीर्णा कर्णिका
यस्य · मिथः संबद्धा अष्टौ दिश एव दलसमूहो यस्य तच्च जगत्पुंडरीकं रात्रेरारंभसमयदवतारेणावद्धांधकारमधुपावलिर्यत्र तत् · प्रत्येकंस
मस्तैकपदे किरणाकेसर सूर्यबिंबं हि सेषा विस्तीर्णा कर्णिकाद्दिग्दलकलापेत्यत्र · अनंतत्वादिति · शब्दगतत्वेनार्थगतत्वेन शब्दा
र्थोभयगतत्वेन चानुगतीकृत्योक्तं · उपमारूपकादीनि विशिष्टोपादायत्वानंत्यान्नत्संकरो वक्तुं न शक्यत इत्यर्थः तदाह शब्दार्थेत्या
दि पूर्वं व्यवस्थितत्वाच्चेत्यस्याप्ययमेवार्थः प्रागेवेति नवमोल्लासे इत्यर्थः परिहृत्य सहत्वमिति · तत्त्वे शब्दगतत्वं शब्दस्य तत्सहत्वेऽर्थ
गतत्वं · कस्यचिन्नदसहत्वे कस्यचित्तत्सहत्वे उभयगतत्वमिति भावः अर्थशब्देहेतुकेति · कृपादासावकृपादेत्यादौ शब्दशक्तिमूलवि

का॰टी॰ रोधालंकाराङ्गभूतार्थान्तरन्यासइत्यर्थः प्रभृतिपदात्सकलकलं पुरमेतदिति श्लेषसाम्यानिबंधनोपमादयः प्रकटनयेति॰ साध्यसाध
१७५ नभावादीनामर्थधर्मत्वादितिभावः अतएवशब्दवैचित्र्यस्योत्कटतया पुनरुक्तवदाभासः शब्दालंकारमध्ये गणितः वास्तवं सिद्धां
तमिद्धं तत्र सर्वेषां तु मयालंकारत्वमिति बोध्यं॰ अलंकारसर्वस्वोक्तां युक्तिं शंकते अथेति॰ विशिष्टस्य॰ तत्तदाश्रयविशिष्टस्य॰ न्याय
इति॰ साक्षात्तच्छब्दाश्रितत्वस्य यमकवद्बंधादौ सामान्यादर्थाश्रितत्वस्योत्प्रेक्षासमासोक्त्यादावसंभवात्कथं चित्रदाश्रितत्वस्याति
प्रसक्तत्वात्परिहृत्य समग्रशब्दाश्रितत्वं तत्सहशब्दार्थाश्रितत्वं वाच्यं तथा च कथं चित्रदाश्रितत्वं शब्दवैशेष्ये विफल इत्याशयः वैफ
ल्यं॰ चमत्काराजनकत्वं॰ वृत्तिविरोधः उपनागरिकादिवृत्तिविरोधः प्रतिकूलेति॰ माधुर्यव्यंजिकायां वृत्तौ शष्टतवर्गटवर्गादेरो
जोव्यंजिकाया युक्तगुंफविधानमुखेन शिथिलबंधस्यार्थतः पर्युदासादितिभावः ततस्वभाववत्त्वादेतितत्र कुरागाक्रांतत्वादि
त्यर्थः चक्रीति॰ अहिमरुचेः सूर्यस्य स्यंदनो रथः वनादिति संबंधः जगदुपकारार्थं नित्यप्रवृत्तस्य चक्रकीलकंपं किं चक्री विष्णुः हरी न
श्वगान्द्रहरिरिंद्रः ध्वस्तानमुखस्तत्र त्यक्तजानामयान्नृध्वजेति शिवः नक्षत्रनाथः चंद्रः अरुं गुणं अरुणसारथिं वरुणः क्रूरा युगवंधना
यं कुबेरः रंहः वेगं स्वरराणां सनहतः स्नोतीति सर्वो व्यापि हे तरुणि आनंदस्यंदी सुंदर आश्रय इंद्रत्वमु शिसलीलमुल्लास युक्तोऽस्मा सो
गमनवचनादिप्रकारः यदिरमणाभिसरिंगं कुसितदा त्वदीयं मे किं प्रयोजनं भणेत्यर्थः प्रत्येभावविहितानां प्रतिजारस्य वचः अन राम॰ म
भ्ररणादिति॰ शब्दरहितमणिमेखलं॰ तत्स्थानस्य गुरुत्वे नलघुसंचारात् अविरतासिंजानमञ्जुमंजीरं इति च परिसरणविशेषणं॰ १७५

परिसरणं गमनं । भूषणानां च शिञ्जितं । रणरणकमुत्कण्ठा । इह शंभवपरिसरणं हरणामम चेतोऽकारणमुत्कण्ठां कुरुते इत्यर्थः । तत्रा
लाभात् इतरं परं भर्तृगृहगमनाच्चेति भावः । उच्यते इति शब्दार्थरूपार्थविरहे रणनुप्रासस्सत्वेऽपि नास्वादोत्कर्षः शब्दालंकाराणाम
प्यर्थातिशयाधानद्वारेणैव चमत्कारित्वात् शब्दानां शिष्टत्वसहत्वमात्रेण शब्दालंकारव्यपदेश इत्यन्वयः । सदंभा दंभसहिता
दुरंततान्दुःखव्याप्तान्तःकरणात् । निर्गच्छतो ऽपि निश्चिन्वतो ऽपि जंतोः प्रसभं बलात् प्रभुखे इति पाठे आपाततः कर्षति सत्कांतिः
सर्पमणिरिव ग्राह्य युक्तस्सजला नदीव । कांतेरप्यंभःपदवाच्यत्वात् धर्मगते । साधारणधर्मगते । अनुचितार्थत्वमिति तद्व्या
क्ति विवक्षायां तु न दोषत्वमिति बोध्यं उपहासेति स्वरूपोत्कर्षबलाद्धुपमानकत्वे अपकृष्टोपमेयस्य अस्तत्तापर्यवसायितयोपहासा
पभवतीति भावः सम्मुनिरिति जीमूतो मेघः अंशुमान् सूर्यः अविनेति । व्याप्यभावादित्यर्थः । तं विना च सादृश्याप्रतीतेर्दोषत्वं । अ
धिकपदत्वमेवेत्यत आह उपमानस्य न्यूनाधिकधर्मत्वमेवोपमेयाधिक्यन्यूनधर्मत्वमिति श्यामाकोक्तं । शतीयमानमिव उपात्तधर्माति
रिक्तधर्मरूपमित्यर्थः । न च तत्रेति किं तु उपमाप्रयोजकतेत्यर्थः । प्रक्रान्तस्य । अभावात् असंभवात् इत्यादिना धर्मत्वेनापि उपात्तधर्म
एव बोध्यते तस्य निरुक्तोभयनिष्ठत्वे उपमानिर्वाहो नान्यथेति भावः । अपरत्र लिङ्गपरिणामेन यथा कथंचिदन्वयेऽपि स्फुटत्वाभावेन
चमत्कारापकर्ष इति तत्त्वमात्रेणोति तुल्यान्वितश्रुतत्वस्य नपुंसकत्वविशिष्टोपमानधर्मत्वाभावादिति भावः । अत एव वचनानुपात्तः
साधारणधर्मस्तत्र न दोषः कल्प्यमानस्य लिङ्गरहितस्यैव कल्पनेन उभयसाधारणत्वात् एवं वचनलिङ्गरहितार्थोपस्थापकति

कारी डं॰ तेन साधारणधर्मोपस्थितिस्तत्रापि न दोषः यथा स्त्री व गच्छतीत्यं दोयमित्यादौ एवं च चेदुद्गतसुंदरं मुखमित्यादौ दोष एवेति बो

१७५ ध्यं अत्र शङ्कानाड्इति॰ वङ्कत्वविशिष्टस्फुटत्वस्य साधारणधर्मस्य वङ्कत्वावरुद्धसत्कृष्टे वान्वयो न त्वेकत्वावरुद्धे वचनरूपे उपमाने इ

तिभावः संभवादिति॰ उभयत्रापि उपात्तरूपाभेदात् तदाहयत्रत्विति॰ रूपभेदं॰ आनुपूर्वीभेदं॰ उपात्तेनैव रूपेणेति॰ उपस्थितोर्थ

176 इति शेषः आनुपूर्वीसाम्येनोभयत्रान्वयसंभवादिति भावः अनुगमोन्वयः अत्र लिंगेति॰ गुणारत्नशाहयोर्लिंगभेदेपि अनर्घ्येरिति

धर्मवाचकस्य लिंगद्वयेपि तुल्यरूपत्वान्न दोष इति भावः तडीयो वेव उपमेयं विभ्रमा उपमानं॰ असदृशा इति मधुरता इतीति च ध

र्मवाचकानुभयत्रान्वयसमर्थानि॰ असदृशा इति कर्त्तरि एकवचनं॰ क्लिबं तत्र बहुवचनं च॰ मृत इति क्लीबे एकवचनं॰ क्लिवं तत्र बहुवचनं

च॰ दधत इति दधधारणा इत्यस्यैकवचनं॰ धाञो बहुवचनं च॰ अत्र स्त्रीषो पुरुषमोपपादकमेवेति बोध्यं अन्यासामित्यत्रीमिः अन्यस्त्रीवेषः

कालो वर्तमानादिः पुरुषः प्रथममध्यमोत्तमरूपः विधिरप्रवर्त्तनं॰ सुगलितत्वं विजातीयविषयत्वं॰ विश्रांतिश्चमत्कारः का

कुत्स्यात् कुशाते॰ कुमुद्वती कुमुदनागकन्या॰ अत्रेति॰ यद्यप्यतीतपश्चिमरात्रियामात् चेतनाप्रसारमायेति न कालभेदस्तथापि

पश्चिमरात्रियामजातीयाद्यापिप्रसादमाप्नोतीति कालभेद एवेति भावः चपयेति अभिनवस्नानविशेषेणा शुद्धामूर्त्तिः शरीरं य

स्याः कौसुंभरागेणारुचिरः स्फुरन्नंशुकपांतो यस्याः नूतनकिशलयपुष्कशाखाप्रभवालतेव॰ अत्रेति॰ तस्माद्द्विधातो इति पागे राम॰

पुंक्तः नवदेशीसंबोधो क्तेस्तत्र प्रथमपुरुषार्थान्नन्वयः ह्रे देवि भवतीं आज्ञातेरप्यन्वयसंभवात्॰ भवदर्थस्य संबोध्यासंबोध्यसाधार १७५

गात्वेनतत्रतदन्वयसंभवात्· संबोध्यानिष्टस्येति· मध्यमपुरुषवाच्यस्य संबोध्यार्थे नैवान्वयादिति भावः भेद इति· आशीर्विहितलोड्य
ग्रस्यानागतेष्टविषयार्थकत्वात्कीर्त्तेर्वेवान्वयोन तु विद्यमानेगंगाप्रवाहे· एवं च यथा गंगाप्रवहतितथा कीर्त्तिः प्रवहत्वित्यर्थे वि
धेर्भेद इति भावः ननु प्रवहनस्याभिन्नत्वेपि कस्यचिदनागतार्थस्य गंगानिष्ठस्य विधिविषयत्वं स्यादत आह एवं विधस्येति· असंभवा
दिति· उपमेयेऽसंभवादित्यर्थः वक्ष्यतइत्यादौ धर्मान्तरस्यासत्वेपि तस्य प्रकृतत्वार्थत्वाभावात्तत्र विध्यर्थान्वयासंभव इति बोध्यं· विधा
दिभेद इति· यद्यपि विधेरेकमात्रान्वयि नो न भेदस्तथापि व्यत्यासएवात्र भेदपदार्थः नान्विवपदेन धर्मान्तरे लोव स्याम्यबोध्यता त्वनुपात्त
धर्मस्यान्वयप्रसंग एवान्वेत्विति कथं लिंगादिभेदोषइति शंकते नन्विति अतिरिक्तं· कालविशेषाद्यनवरुद्धं उपात्तं· उच्चरितपदबोध्यं·
प्रतीयमाने· अ आहारलभ्ये· न दोष इति· एवं कामइवायं राजा भातीत्यादौ सोऽदयीदिनानुपात्तेन साम्य प्रतीतोपश्चात्क्रियालभ्य
कालभेदो यथा कामो भात एवमयं भातीत्याकारो न दोषः कामसदृशस्तु दरोयं भातीति प्रतीतेः यथेति· अत्रोपात्तं सत्यवादित्वमेव
साधर्म्यं तच्चाभिन्नकालमेव· युधिष्ठिरे वर्त्तमानसत्यवचनाभावात् धर्मान्तरं तु नास्त्येवेत्यभिमानः सत्यवादीति सत्यवदनशीलत्वं
धर्मान्तरमिवार्थ इति भावः अर्थव्ययेनेति ननु कार्पण्येन यथा कथं चिदित्यर्थः धनकृतं पोषणमित्यर्थे लाभाय रैपोषमित्युक्ते
नैवेयर्थ्य रैपोषमित्यत्र पुष्टेष्वयोगः साधुत्वार्थएव आजानिकेति स्वाभाविकेत्यर्थः यथा युधिष्ठिरो लोभादिना न सत्यं वक्ति किं
तु ताच्छील्यात्तथायमपीत्यर्थलाभान्नवैयर्थ्यमिति भावः एवं गंगेवेत्यादावप्युज्वलेत्यादिपदाध्याहारेणादोषोद्धार इत्याशयः एतादृ

क.टी. १७७ 177 शान्त्रयाख्याहाराद्दिकल्पनमानुभविकमित्याशयवानाह सत्यमिति स्थितेष्विति। रेफो बमित्यादि शुक्लाधुत्वार्थं नियमितेषु कथं वि
न्तमर्थनमित्यर्थः उपात्तमिति उपात्तधर्ममित्यर्थः तुच्छमिति श्रुतहान्यश्रुतकल्पनाभ्यामास्वादपञ्चकवैद्रानिवन्धादिति भावः तदा
हृउपात्तेति। आस्यादिवेत्स्वेश्रा। त्रणाहारणाकर्षणोविलंवस्यादिति। धनुर्मण्डलं परिवेषश्च विवक्षितिविवभागापन्ने। अनौचित्यमि
ति अत्र युक्तत्वसांकर्यमप्यत्रेतिबोध्यं। सुकुलं शुक्लभागापन्नं। मेचकं। नीलं। उत्प्रेक्षादूषणं। उत्प्रेक्षाविषयसमर्थनार्थान्तरन्या
सदूषणं। निरुपाख्यं। अलीकं। शशविषाणादितत्प्रख्यं तत्तुल्यं तत्र हेतुरुत्प्रेक्षाविषयस्य तात्त्विकरूपाभावः ततः। निर्विषयत्वं। अ
भिन्नेति चित्रवदर्थाभावात तदुदाहरणं दिवाकरादिति। भीतत्रस्तं तत्परित्राणमिति। अद्रेरप्यचेतनत्वादिदमप्युत्प्रेक्ष्यं। त्रासस्य चित्तवृत्ति
विशेषरूपस्य तत्परित्राणस्य च चेतनधर्मत्वात। तदाहरुत्प्रेक्षितत्राणावतरपेति। स्पृशतीति निगमरुचौ स्तुयैककुम्भो दिशः करैः स्पृशति
सति दिनश्रियायीष्मदिवसश्रिया। अन्तनुमानपरिग्रहया स्थितं। करैर्हस्तैः। रश्मिभिश्च। तापोज्वालावेदश्च। मानं। परिमाणं कोप
श्च। चिरया। दीर्घया। चिरकालीनया च। ग्रीष्मवर्णनमिदं अत्रेति। सूर्यस्य करेण स्त्रीस्पर्शकारित्वं नायकोचितं विशेषणं। दिशां चक
रेण पुरुषस्पृश्यत्वं नायिकायोग्यं विशेषणं सूर्ये पुलिंगपरिग्रहः दिशां स्त्रीलिंगपरिग्रहः तत एवेति अत तनुमानपरिग्रहयेति वि
शेषणात स्त्रीलिंगाच्चेत्यर्थः नन्विति। यथा दयिते दयितां करैः स्पृशति सति दयितान्तरस्य तापस्तथा रवौ करैर्दिशः स्पृशति दिनश्रियो राम.
पि तापः इत्येवमत्रापि श्लेषोस्त्विति भावः नस्फुटेति स्फुटमाशयः यत्रोपमानस्य स्वपदेनोपादानेपि तत्समासोक्तित्वागत्तत्रावश्यक १७

समासोक्तौ च निर्वाहे उपमानपदोपादानं व्यर्थं यथा स्पृशतीत्यादौ। अत्र दर्पितयेत्युपादाने परिखेर्नायकत्वं कुकुभां नायिकात्वं च
समासोक्तौ चेतितस्यावश्यकत्वे यत्तदुपमानपदोपादाने समासोक्तिनिवृत्तिस्तदनुपादाने च यत्रोपमानप्रतीतिः उपात्तस्याधा
रणधर्मस्यानुपमेयमात्रान्वितत्वेनैव प्रतीतेः तन्नोपमाया एव चमत्कारित्वापदेयं तत्पदं यथा स्वयं चेत्यादौ। अत्रोपमानपदोपा
दाने समासोक्तिस्त्यागादि। उपमेयस्य। शक्तस्य। विहंगमेषु। पक्षिषु आहतेषु पुरः अग्रे आयान्तं आगच्छन्तं समशाकः नवार्यन्तराम
णिः काचादिमणिः श्यामलं वा मणीनां मध्ये धुरि अग्रे तेजावत्स्ममराणीनां रत्नानां रुचं कान्तिं धत्ते रवद्योतः। अपि तेजस्विनामग्निसूर्यादीनां
मध्ये। पिशाचादये वा प्रचलितुं गन्तुं नकं पतेन विभेति एतत्सामान्यस्य चेतनेऽचेतने च विचारितपदार्थगतविशेषं प्रत्युभिव धिक्। अत्र द्योत
दत्र ये पिपठेत्यादिः अप्रस्तुतनिष्ठसामान्ये तिष्ठ तात कलितविशेषत्वरूपेत्यर्थः। जत। तस्मात् एते उक्ताः एवंजातीयकाः इति। य
था समासोक्तौ न पुंसके। नायकव्यवहारसमारोपः। उपमायां विरुद्धं दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविवेत्यत्र राजनीन्दुता दा
त्म्यारोप उपमाविरुद्धस्तदेतदनुचितार्थमेव। यथा गामिन्नाश्च यद्योर्विरोधवर्णनं। यथोत्सुभामसत्तनपायान्यापि जलं शीतलमि
त्यादौ। एकाश्रयत्वेनेव विरोधस्योक्तेरिदमनभिहितवाच्यमेव प्रोक्ता जातीति समस्मोक्तदोषजातीत्यर्थः। संपूर्णमिति। लेशतो
पि न्यूनताविरहात्। काव्यलक्षणं। काव्यं लक्ष्यते स्वरूपतो विशेषतश्च ज्ञाप्यते नेनेति प्रकृतग्रन्थरूपमिति शिवं। शृङ्गवेरपुराधीशरा
मपेरणापाद्देट। सहुक्तिः प्रज्ञासंदर्भैर्विहितस्फूर्तिमनोहरैः। सत्नौ नागेशवद्भेनालंकारमहोदधेः सतां मतिः सचरतां यावच्चंद्रदिवाकर

का॰टी॰ रो श्काव्यप्रदीपकोद्योतः शिवयोरर्पितो मया यन्निर्मितो महायोमे ज्ञाना सांप्रतिभा प्रावी १॥ ॥इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुकाव्यप्रदीपोद्योते दशम उल्लासः॥ ॥ ॥शुभमस्तु॥ ॥मंगलं चास्तु॥ ॥

१०८

अद्य पुस्तकं वैजनाथपाठकस्य

७७ ११००

ग्रन्थ॰

१०८